माहेश्वरचतुर्दशसूत्राणां व्याकरणतन्त्रागमदृष्ट्या समीक्षा

An Analysis of 14 Maheshwar Sutra in the light of Vyakaran, Tantra and Agam

लेखकः

डॉ. शेषनारायणमिश्रः

व्याकरणप्राध्यापकचरः श्रीशास्त्रार्थसंस्कृतमहाविद्यालयः, दशाश्वमेधः, वाराणसी

सम्पादकः

डॉ. सुधाकरमिश्रः

THE BANARAS MERCANTILE COMPANY

श्रीगणेशाय नमः

माहेश्वरचतुर्दशसूत्राणां व्याकरणतन्त्रागमदृष्ट्या समीक्षा

लेखकः
डॉ.शेषनारायणमिश्रः
व्याकरणप्राध्यापकचरः
श्रीशास्त्रार्थसंस्कृतमहाविद्यालयः, दशाश्वमेधः
वाराणसी

सम्पादकः
डॉ.सुधाकरमिश्रः
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः

बनारस मर्केण्टाइल कम्पनी
१२५ महात्मा गान्धी रोड
कोलकाता ७०००७
२०१६

लेखकपरिचयः

डॉ.शेषनारायणमिश्रः

व्याकरणप्राध्यापकचरः

१.श्रीशास्त्रार्थसंस्कृतमहाविद्यालयः,दशाश्वमेधः, वाराणसी ०१

सम्मानितव्याकरणाध्यापकचरः

२.श्रीसम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी ०१

शास्त्रचूणामणिसम्मानितः

३.राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः) नवदेहली ५८

ग्रामः - छतौनाकला, पत्रालयः- बैतीकला, जनपदः - सुलतानपुरम्

उ०प्र०, पिनसंख्या - २२२३०१

दूरभाषसंख्या - ९३६९३१२९२६

प्रथमं संस्करणम् 2016

मूल्यम् 325/-

ISBN : 978-81-86359-58-3

प्रकाशकः

बनारस मर्केण्टाइल कम्पनी

१२,५ महात्मा गान्धी रोड

कोलकाता - ७००००७

An analysis of 14 Maheshwar Sutra in the light of Vyakaran, Tantra and Agam

Written by
Dr. Shesha Narayana Mishra
Professor
Departmant of Grammar
Sri Shastrartha Sanskrit Mahavidyalaya
Dashashwamedha, Varanasi, U.P. 01

Edited by
Dr. Sudhakar Mishra
Asst. Prof.
Sri Sitaram Vaidic Adarsha Sanskrita
Mahavidyalaya, Kolkata 35

First Print 2016
ISBN : 978-81-86359-58-3
Price 325/- Only
Three Hundreds Only

Published by
The Banaras Mercantile Co.
125 Mahatma Gandhi Road
Kolkata 700007

About the Author
Dr. Shesha Narayana Mishra
Ex.Professor
Department of Grammar
Shri Shastrartha Sanskrit Mahavidyalaya
Dashashwamedha, Varanasi 221001
Honourable Professor
Sampurnanda Sanskrit University Varanasi 01
Shashtrachuramani Sammanit
Rastriya Sanskrit Sansthan (Deemed University)
New Delhi 58

Permanent Address
Vill. Chhatauna Kala
Post. Baiti Kala
Dist. Sultanpur, U.P. 222301

Academic Qualification
1. Acharaya in Navya Vyakaran
2. Vidyavaridhi (Ph.D.)

Mobile No. 9369312926

Publisher
The Banaras Mercantile Co.
125 Mahatma Gandhi Road
Kolkata 700007

Year 2016

॥ वाग्देवता दीव्यतु ॥

राष्ट्रपतिपुरस्कृतो महामहोपाध्यायश्च

प्रोफेसर रामयत्नशुक्लः

विभागाध्यक्षचरो व्याकरणविभागे, वेदवेदाङ्गसङ्कायाध्यक्षचरश्च

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वाराणस्याम् (उत्तरप्रदेशः)

आवासः - गर्गाश्रमः शङ्कुलधारा वाराणसी उ.प्र. सचलदूरभाषः ९७९३२८५९८९

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये व्याकरणविभागे सम्मानिप्राध्यापकपदं विभूषयता श्रीमद्भिः डॉ.शेषनारायणमिश्रमहोदयैः विहितः 'माहेश्वरचतुर्दशसूत्राणां व्याकरणतन्त्रागमदृष्ट्या समीक्षा भूमिकया मया सम्यङ् निरीक्षिता परीक्षिता च । महाविदुषा तत्र इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि इत्यभिहितम्। तैः माहेश्वरसूत्रैः व्याकरणस्य जगतः पारमार्थिकजगतः सृष्टिः परिकल्पिता । अकारो वासुदेवःस्यादित्यादिना । तन्त्रमाध्यमेनापि -

तनोति विपुलानर्थान् तत्त्वमन्त्रसमन्वितान् ।
त्राणञ्च कुरुते यस्मात् तन्त्रमित्यभिधीयते ॥

इति कारिकानुसारेणापि सम्यङ् निरूपितम् । महाविदुषोऽस्य समीक्षायां पदार्थाः निर्मले गङ्गाम्भसि मुक्तामणय इव विभान्ति ।

आगमशब्दं परिभाषयन् वक्त्रा -

आगतं शिववक्त्रेभ्यो गतञ्चपार्वतीमुखे ।
मतञ्च वासुदेवेन तस्मादागम उच्यते ॥

इत्युक्तम् । मन्त्रमात्रिकानुसारेण एकाक्षरीकोशेन च माहेश्वरचतुर्दशसूत्राणि सम्यक्समीक्षितानि । भूमिकायां प्रायः शाब्दिकानां समे गूढाः सिद्धान्ताः स्फोरिताः । यदवलोकनमात्रेण मनसि महानानन्दो भवति, चमत्कृतिरपि जायते । अद्यत्वे ईदृश्यः व्याख्याः प्रायो दुर्लभाः दृश्यन्ते । समीक्षायां पदार्थावगमे न केवलमन्तेवासिनां ज्ञानवर्धनं करोति प्रत्युत विदुषामप्युकारिणी

वर्तत अत्र नास्ति शङ्कापङ्कावकाशः। माहेश्वरसूत्राणां आगमदृष्ट्या, तन्त्रदृष्ट्या, व्याकरणदृष्ट्या, शास्त्रत्रयदृष्ट्या समीक्षणं लौहचणकचर्वणमस्ति, तथापि एतादृशेन समीक्षणेन शाब्दिकजगतः महानुपकारो भविष्यतीत्यहं विश्वसिमि।

तस्मादयं समीक्षाग्रन्थः प्रकाशितः सन् महते लोकोपकाराय भविष्यतीति मन्यमानोऽहं परं विदुषः व्याकरणशास्त्रमर्मज्ञस्य श्रीमतः डॉ.शेषनाराणयण मिश्रमहोदयस्य यशः चिरायुष्यञ्च कामयमान अस्य समीक्षाग्रन्थप्रकाशनस्य प्रचारं प्रसारं भवानीनाथं विदधातु इति भूयो भूयः अन्नपूर्णासहितं विश्वेश्वरं प्रार्थये।

प्रोफेसर रामयत्नशुक्लः
वाराणसी, उत्तरप्रदेशः

प्रथमश्रेणीस्थ-उ०प्र०राज्यसम्बद्धः

शास्त्रार्थमहाविद्यालयः

(सम्पूर्णानन्दसंस्कृतविद्यालय, यू०जी०सी० से सम्बद्ध)

डी.१७/५८ दशाश्वमेध, वाराणसी

डॉ.गणेशदत्तशास्त्री

(राष्ट्रपतिपुरस्कृतः) प्राचार्यः

श्रीमद्भिः डॉ. शेषनारायणमिश्रमहोदयैः शास्त्रार्थसंस्कृतमहाविद्यालयः, दशाश्वमेधः, वाराणस्यां प्रायःषट्त्रिंशत्वर्षाणि अध्यापितानि सन्ति । अध्यापकानामध्यापनमेवमेकं कार्यं न भवति अपितु अध्यापनेन सह विविधान् अनुसन्धानदिशा विवेचितान् लेखान् विलिख्य प्रकाशनं, ग्रन्थान् व्याख्याय तेषां व्याख्यानम् , सारगर्भितभाषणव्याख्यानादिप्रदानमपि कार्यकोटौ प्रविशति। इति कृत्वा विद्वद्वरेण्येन मिश्रमहोदयेन माहेश्वरचतुर्दशसूत्राणां व्याकरणतन्त्रागम दृष्ट्या समीक्षा इति पुस्तकं प्रकाशितम् । इदं माहेश्वरसूत्रं ढक्कानिनादेन प्रकाशितम् । प्रोक्तञ्च -

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥

महाविदुषा वैयाकरणेन इदं साधितं यत् चतुर्दशसूत्राणि व्याकरणस्य तन्त्रशास्त्रस्य च मूलभूतानि सन्ति । अपरञ्च काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम् इति दिशा एभिः विद्वद्भिः सर्वशास्त्राणां मूलभूतानि साधितानि ।

व्याकरणशास्त्रं शब्दशास्त्रमस्ति, इदं सर्वं जगत् शब्देनैव भासते शब्दातिरिक्तं न किमप्यस्ति । वाक्यपदीयेऽपि श्रीहरिणा उक्तम्

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिवज्ञानं सर्वं शब्देन भासते ॥

प्रकाशितस्यास्य ग्रन्थस्य भाषा सरला सारगर्भिता चास्ति । शैली विषयप्रतिपादनश्चातीव रोचकम् । इमे ग्रन्था: छात्राणां व्याकरणाध्येतृणां विदुषाञ्च कृते भृशमुपयोगिनो भवेयु: तथा तेषां हृदयानि सततं प्रकाशयेयु: तस्मात् ग्रन्थोऽयं सर्वदा परिरक्षित:, परिवर्धित:, सर्वजनोपकारकाय स्यादिति भगवन्तमुमारमणमभ्यर्थयते ।

डॉ.गणेशदत्तशास्त्री
प्राचार्य:
वाराणसी, उत्तरप्रदेश:

विषयसूची

प्रथमोऽध्यायः ०१-२७

१.माहेश्वरसूत्राणां महत्त्वम्

२.तन्त्रागमदृष्ट्या वर्णानां समीक्षणम्

३.योगस्वरूपम्

४.तन्त्रस्वरूपम्

५.शिवशक्तितत्त्वम्

६.विविधदर्शनेषु परतत्त्वनिरूपणे मतवैभिन्न्यम्

७.ब्रह्मविद्यैव कालरूपेण समाख्याता

८.व्यक्ताव्यक्तमयं जगत्

९.लक्षणानि

१०.शक्तिः

११.माया

१२.पुरुषः

१३.कला

१४.रागः

१५.कालः

१६.नियतिः

१७.प्रकृतिः

१८.अहङ्कारः

१९.मनः

२०.षोडशस्वराणां शक्तिबीजता

२१.भोगशास्त्रे भोगस्यापि पञ्चमपुरुषार्थत्वम्

द्वितीयोऽध्यायः २८-४२

१.आचार्यनन्दिकेश्वरः तस्य काशिका च

२.आचार्यनन्दिकेश्वरकाशिकायाः प्रामाण्यं समयश्च

३.आचार्यनन्दिकेश्वरः,काशिकाप्रणयने प्रयोजनम्
४.माहेश्वरसूत्रभूतायाः नन्दिकेश्वरकाशिकाया अष्टाध्याय्याश्च महत्वम्
५.अ इ उ ण् इति सूत्रस्याध्यात्मपरकत्वकथनम्
६.ऋ ऌ क् इति सूत्रस्य आध्यात्मपरकं निरूपणम्
७.अध्यात्मदृष्ट्या एओङ् सूत्रार्थनिरूपणम्
८.ऐऔजिति सूत्रे जगत्कारणत्वनिरूपणम्
९.हयवरट्,लण् इति सूत्राभ्यां भूतपञ्चकनिरूपणम्
१०.ञमङणनम् इति सूत्रे पञ्चतन्मात्राणां प्रतिपादनम्
११.जबगडदश् इति सूत्रे पञ्चज्ञानेन्द्रियनिरूपणम्
१२.खफछठथचटतव् इतिसूत्रे प्राणादिपञ्चमनोबुद्धिस्मृतीनां प्रतिपादनम्
१३.कपय् इति सूत्रे प्रकृतिपुरुषयोः विवेचनम्
१४.शषसर् इति सूत्रात् सृष्टौ सत्त्वरजस्तमसां सम्भूतिरितिनिरूपणम्
१५.हल् सूत्रस्य पुनरध्यात्मपरत्वकथनम्

तृतीयोऽध्यायः **४३-६३**

१.वर्णकालः
२.वर्णकालस्य त्रैविध्यम्
३.अखण्डवर्णकालः
४.कोहलीयशिक्षायाम्
५.वर्णांशकालः
६.विरामकालः
७.वर्णकालविचारस्य मध्यमवृत्यानुरोधिता
८.आधुनिकभाषाविन्मतसमीक्षा

चतुर्थोऽध्यायः **६४-८१**

१.वाग्यन्त्रम्
२.स्थानशब्दार्थः
३.वर्णस्थानानि
४.करणशब्दार्थः

पञ्चमोऽध्यायः ८२-१०५
१.प्रयत्नशब्दार्थः प्रयत्नविभागश्च
२.आभ्यन्तरप्रयत्नस्य स्वरूपं भेदाश्च
३.पाणिनीयशिक्षायामाभ्यान्तरप्रयत्नाः
४.अत्र विषये शिक्षान्तराणि
५.बाह्यप्रयत्नस्य स्वरूपं भेदाश्च
६.पाणिनीयशिक्षायां बाह्यप्रयत्नाः
७.अत्र विषये शिक्षान्तराणि
षष्ठोऽध्यायः १०६-१६७
१.मातृकादृष्ट्या वर्णानां विवेचनम्
२.आदिवर्गः
३.प्रकृत्यण्डम्
४.अहङ्कारबुद्धिमनोरूपेण त्रिविधस्य विमर्शादभिन्नस्य धर्मस्वरूपविमर्शः
५.पार्थिवसंसारप्रक्रिया
सप्तमोऽधयायः १६८-१७६
१.वर्णोत्पत्तिविमर्शः
अष्टमोऽध्यायः १७७-१९१
१.वर्णानां शिवशक्तिस्वरूपपर्यालोचनम्
नवमोऽध्यायः १९२-२०३
१.व्याकरणदृष्ट्या सृष्टिप्रक्रिया
२.वाक्यपदीयानुमतः सृष्टिक्रमः
३.सृष्टिप्रक्रियाविमर्शः
४.शब्दार्थोभयोपादानिका सृष्टिः
५.अथाभ्यन्तरशब्दानां तदर्थानां चोत्पत्तिप्रकारः
६.श्रीनागोजीभट्टसम्मतः सृष्टिप्रकारः
७.प्रपञ्चसारानुगतः सृष्टिप्रकारः
८.व्याकरणदर्शने सृष्टिप्रक्रियाविमर्शः

९.शारदातिलकसम्मतः सृष्टिप्रक्रियाविमर्शः
१०.पञ्चमषाष्ठविषयाणामालोचनम्
११.सृष्टिक्रमे व्याकरणशास्त्रप्रवर्तकस्य पाणिन्यादिमुनित्रयस्य सम्मतिः
उपसंहारः २०४-२११
सहायकग्रन्थसूची

भूमिका

निखिलेऽस्मिन् पञ्चतत्त्वाञ्चिते वैरिप्रपञ्चेऽनादिकालतो बन्धनमुपेत्य प्रारब्धपरिणतिं भुञ्जानानां जनानामाध्यात्मिकादितापत्रयचिन्ता चक्रव्यूहोत्पाटन पटीयो ज्ञानमेवामनन्ति मोक्षोपायतया निःश्रेयससाधनैकमतयो यतयो महर्षयश्च । तच्च ज्ञानमाम्नायवाङ्तात्पर्यालोचनोल्लसद्विवेकादेव समधिगन्तुं शक्यत इति नास्ति परोक्षं प्रेक्षावताम् । तात्पर्यालोचनं च तत्तच्छब्दानुबन्धित तत्तदर्थबोधशक्तिग्राह्यत्वम् । शक्तिग्राहकस्तु -

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सानिध्यतः सिद्धपदस्य वृद्धाः ॥

इति वृद्धजनोक्त्या प्राधान्येन व्याकरणादेव बोभवीतीति तदेव सर्वतः प्रागाश्रयणीयं निगमागमार्थसार्थं परिचिचीषुभिः । किञ्च षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति विधिश्रवणात् षड्भिरङ्गैः संवलितस्यैव वेदज्ञेयतत्त्वज्ञानं श्रेयःसाधनमित्यभिमतम् । तेष्वङ्गेषु च छन्दः पादौ तु वेदस्य मुखं व्याकरणं स्मृतम् । इति वचनाद् व्याकरणमेव मुखमिव प्रमुखतामावहति प्रागध्येतव्यां चेति नाविदितचरं गीर्वाणवाणीप्रणयिनाम् । व्याकरणं च मुख्यतो नवधा श्रूयते । -

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।
सारस्वतं चापिशलं शाकलं पाणिनीयकम् ॥

इति तत्त्वनिधावुक्तेः । हनुमन्तमुद्दिश्य 'सोऽयं नवव्याकरणतत्त्वार्थवेत्ता' इति बाल्मीकिवचनाच्च । ननु हनुमतः काले पाणिन्यादेरनुपपत्या नेदं सङ्गच्छते इति चेन्न धाता यथापूर्वमकल्पयत् इति श्रुत्या पूर्वपूर्वकल्पोद्भूतपाणिन्यादीनां व्याकरणसत्वानुगमात् । तत्रैन्द्रव्याकरणे तामिन्द्रो भव्यतोपक्रम्य व्याकरोत् । तस्मादियं व्याकृता वागुच्यते । इति श्रुतिरेव प्रमाणम् । चान्द्रास्तु आत्मोदरकुक्षिष्विति पेठुः' इत्यादिवचनाच्चान्द्रस्यापि सत्तामनुमीयते । "शताच्च ठन्यतावशते" इति सूत्रे भाष्ये नामतो निर्देशात् काशकृत्स्नसत्ताऽपि निश्चीयते । कौमारं त्वाग्नेयपुराणे वर्ण्यते । ऋक्तन्त्रापराभिधानं शाकटायनं चाद्यत्वे मुद्रिते उपलभ्यते । आपिशलं शाकलं च पाणिनीयसूत्रेषु तन्नाम्नोरनुवादादनुमीयेते ।

यद्यप्यद्यत्वे जैनेन्द्राशुबोधकातन्त्राद्यभिधानानि विविधानि व्याकरणान्युपपलभ्यन्ते तथापि नैतेषां वेदाङ्गत्वम् । निखिललौकिकालौकिकशब्दानां व्युत्पादकतया पाणिनीयव्याकरणमेव सर्वेषां मूर्धन्यं धन्यं च सद् वेदाङ्गतामाधत्ते । इदमक्षरं छन्दोवर्णशः समनुक्रान्तं ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भारद्वाजाय, भारद्वाज ऋषिभ्य ऋषयो ब्राह्मणेभ्यः । तं खल्विममक्षर समाम्नायमित्याचक्षते, न भुक्त्वा न नक्तं ब्रूयाद् ब्रह्मराशिः । इति ऋक्तन्त्र व्याकरणोक्तरीत्याक्षररूपस्यास्य चतुर्दशसूत्रसमूहस्याम्नायत्वं निष्पद्यते । तन्मूलकत्वाच्चेदं वेदशरीरमभ्युपगम्यते ।

एतस्य प्रणेतुः पाणिन्यादेः परिचयजिज्ञासा स्वाभाविकीति तद्विषये किञ्चिन्निवेद्यते - तत्र आदिराचार्यो महानुभावः पाणिनिः शलङ्कनामधेयात्पितुर्दाक्ष्यां जन्मलेभे । (पाणिनिस्त्वाहिको दाक्षिपुत्रः शलङ्किपाणिनौ इति त्रिकाण्डकोशात्) यद्यप्येतस्याभिधानम् आहिकः इत्यासीत्तथापि गोत्राश्रयपाणिनिनाम्नैवायं प्रसिद्धिमापेदे । पञ्चाप्रदेशेसलातुराभिधो ग्रामोऽस्य जन्मभूमिरासीत् य एवेदानीं सलातुर, हलाधुर, हलाहुर, लाहुर, इति क्रमेणापभ्रंशं गतः लाहौर इति परिणतः । एतस्याद्यावधि कियान् कालोऽतीत इति विषयमधिकृत्य मतानि वेभिद्यन्ते पाश्चात्यो विद्वान् कनिङ्घमहोदयः खीष्ठाब्दप्रवृत्तेःसार्धत्रिंशतवर्षपूर्वमेव पाणिनिसमयं सम्भावयति । अन्ये तु प्रायः सहस्त्रवर्षपूर्वमनुमन्यते । अपरे च ख्रिष्टाब्दतः सार्धद्विसहस्त्रतोऽप्यधिकपूर्वं पाणिनिकालमाकलयन्ति । एतदन्तिमं मतं युक्तिविमर्शमूलकतया समीचीनं भाति । ये किल ख्रिष्टाब्दतः प्राक् सहस्त्रवर्षाभ्यन्तर एव पाणिनिसमयं सम्मन्यन्ते ते पाणिनिकात्यायनौ नन्दराज्यकालवर्तिनौ समानकालिकावित्युररीकुर्वन्ति । आख्यायिकां चेमामुदाहरन्ति यत् मुग्धबुद्धिःपाणिनिवर्षोपाध्यायं गुरु विद्यार्थमुपश्रितस्तत्र सतीर्थ्येन कात्यायनेन वादे पराजितः पराभूतश्च सन्निर्वेदमवाप्य भगवन्तं महेशं तपसा प्रसाद्य ढक्कानिनादसमुद्भूतां चतुर्दशसूत्रीं व्याकृतिसूत्रनिर्माणशक्तिं विद्वतां तु अतुलामास सादेत्यादि । परन्तु विचारनिकषोपरि कर्षणेन तपोद्वारकमहेश्वरप्रसादादिवरप्राप्त्यन्तं वृत्तान्तमपहायान्यद् वृत्तं न विश्वासपदवीमधि रोहति, यतः पाणिनिसूत्रेषु राज्ञो जनमेजयादुत्तरकालिको न कश्चन सूत्रयते, नैतावदेव पराशर्यव्याससूनोः

शुकस्यापि नाम नोपन्यन्यस्तवान् सूत्रकृत ।

एतेषां माहेश्वरसूत्राणां व्याकरणतन्त्रागमदृष्ट्या समीक्षा अस्मिन् ग्रन्थे विहिता । तत्र प्रसङ्गादागमतन्त्रविषये किञ्चिदुच्यते -

अस्मिन् भारतवर्षे प्राधान्येन वैदिको धर्म एवासीत् । ततश्च कियता समतीतेन समयेन नानाविधाः जैनबौद्धादयः धर्माः वैदिकधर्मप्रचारविदूषका नष्टदृष्टिभिरयथातत्त्वदर्शिभिः केवलं दयामुखैर्महानिर्दयैः वस्तुतोर्मनुष्यासदैरादृताः कालदोषेण प्रसिद्धिमाययुः । येषां दृष्टधर्माणां शुष्कविरक्तिवादनिरन्तरघोषेण जातबुद्धिसंस्काराणां भारतीयप्रजानां दृढसाहसिकमनोबन्धनानि शिथिलीकृतानि येन च मनोबन्धशिथिलीकरणेन प्रतिविचारं औदासीन्यमेव प्रायो भारतीय जनानामाश्रयप्रासादो बोभवीति । अत एव च विप्रकृष्टनिकृष्टजनैर्गारुडैर्महाविषाः पन्नगा इव क्रीडोपकरणीकृताः खलु भारतीयाः । अयं महाननर्थः , जैनबौद्धादिमहापाखण्डधर्मकृतः इति सुतरां भारतीया अनुमिन्वन्तु ।

वैदिकधर्मश्च त्रेधा सात्विको राजस्तामसश्चेति । स त्रिविधोऽपि द्विविधः आभ्यन्तरो बाह्यश्च । आभ्यन्तरच्च स्वमनोव्यापाररूपः । बाह्यः इतरेन्द्रिय वृत्तिकृतव्यापाररूपः । तत्र लोकवृत्तिः बाह्यधर्मे आभ्यन्तरधर्मे च परिणिष्ठितास्ति । तच्चेत्यर्थे सकलजगदुत्पादकस्य निजमहानन्दैकमूर्तेः सच्चिदानन्दरूपस्य अनिर्वचनीयाचिंत्यगुणगणस्य अप्रच्युति स्वभावस्य परमात्मनो निजाभिन्नपरिमेय शक्तिविरचितनिखिलब्रह्माण्ड कोटिपरम्परासृष्टिस्थिति संहारकारिणी सत्वरजस्तमोगुणजननी भगवती योगमाया आदिशक्तिः दृश्यज्ञेयादिस्वरूपमिदं जगत् समुत्पाद्य तस्मिन् निजलीलया नानाविधचरित्राणि विधाय भगवती सर्वेश्वरी सदा रमते ।

भगवाँश्च तयैव योगमायया निर्गुणोऽपि स्वयं गुणवानिव साक्षितया सर्वे तच्चरितं समनुमोदते कान्त इव कान्ताकृतां कन्दुकलीलाम् ।

एतादृशगुणवैभवयोर्मायापरमपुरुषयोरादिमायासृष्टगुणश्रयकार्यभूते जगति जायमानानां त्रिविधानां जनानां स्वस्वगुणभावितदैहिकमानसिकवृत्तीनां तत्तद्गुणभाविता परमपुरुषयोगमायारूपा परमेष्टदेवता तत्तद्गुणसामग्र्या समाराधनीयतया विधीयते नत्वन्यान्यप्रकृतीनामन्यान्यदेवतान्यान्यसामग्र्या यथा

नीलपीतादिकाचतत्तद्दृष्टीनां तत्तद्वर्णदृश्यद्रव्यप्रकाशो दरीदृश्यते न त्वितरः । एवं रीत्याऽयं वैदिको धर्मः अनन्तकालतोऽस्मिन्नापूर्यभूण्डले प्रचारातिभूमिं गतः । सर्वेभ्यो धर्मिष्ठजनेभ्यो अभीष्टफलप्रदानेन कृतार्थयतीति बहुभागधेयं मन्ये वैदिकधर्मानुयायिनाम् ।

तत्र च प्रकृतं किञ्चिद् विचार्यते - वैदिका नाम वेदचतुष्टप्रोक्ताः इतिहासपुराणप्रोक्ताश्च । इतिहासपुराणयोर्वेदत्वं च ,-

इतिहासपुराणानि पञ्चमो वेद उच्यते ।

इत्यादिवचनकदम्बात् इतिहासान्तः कोटिप्रविष्टान्येन हि तन्त्राणि तेषामपीतिहासत्वात् । इतिहासः पुरावृत्तम् इत्याभिधानिकवचनात् । तन्त्रेष्वपि पुरावृत्तस्यैव संवादादिरूपेण सत्वात् एवं च तान्त्रिकधर्माणामपि वैदिकधर्मत्वम् सिद्धम् ।

आगमो नामादिसम्प्रदायसिद्धगुरुशिष्यपरंपरोपदेशक्रमागतः शास्त्रसन्दर्भः । आगमशब्दो वैदिकानिवावैदिकान्यागमान् क्रोडीकरोति । तत्रावैदिका बौद्धाद्यागमाः । वैदिकास्तु वेदा इतिहासपुराणानि तन्त्राणि च । वेदा निगमापरपर्यायनामानः ऋगादिभेदाश्चतुर्विधाःप्रसिद्धाः । इतिहासपुराणानि महाभारपद्माादीनि । आगमपरनामानि तन्त्राणि शैवाशाक्तवैष्णवभेदेन त्रेधा भिद्यन्ते । तत्र प्रथमे कापालकालमुखपाशुपतशैवभेदेन चतुर्धा भवन्ति । तत्रापि चरमे काश्मीरशैवसिद्धान्तभेदेन द्विधा भिद्यन्ते । सर्वेऽपीमे शैवागमाःशिवपराख्यं शिवपूजादिकं च प्राधान्येन प्रतिपादयन्ति । काश्मीरागमनामुत्तरदेशेष्वेव प्रचुरः प्रचारः क्वचिदक्षिणदेशेष्वपि । शैवसिद्धान्तागमानां तु दक्षिणदेशेष्वे प्रचारः । शाक्तागमा दक्षिणाचारवामाचारभेदेन द्विविधा भवन्ति । दक्षिणाचारः प्रायेण वैदिकमार्गानुसारी । वामाचारस्तु वैदिकमार्गपरिभ्रष्ट इति वदन्ति । तथा चाह भास्कररायदीक्षितः वामा वाममार्गरताः । पञ्चयज्ञादिविलोपकत्वात् कुत्सिता इति वामकाः । (ललितासाहस्रनामभाष्यम् श्लोक २२५) इति । उभयेऽपीमे शक्तिमारभ्य शक्तिपूजादिकं च विशेषतः प्रतिपादयन्ति । वैष्णवागमश्च वैखानसपाञ्चरात्रभेदेन द्विविधाः भवन्ति । उभयेऽपीमे विष्णुमारभ्य विष्णुपूजादिकं च प्राधान्येन

प्रतिपादयन्ति ।

पूर्वोक्तानां त्रिविधागमानां प्रामाण्ये किं सर्वेषामप्यास्तिकानां महर्षीणामाचार्याणां चैकमत्येन संप्रतिपत्तिः । उत् केषाञ्चितसमस्ति विप्रतिपत्तिरिति विमर्शे शैवागमानां शाक्तानां च विषये तत्तन्त्रनिष्ठा एव प्रामाण्यमभ्युपगच्छन्ति, नेतरे । निखिलधर्मस्थेयतया सर्वैरप्याचार्यैः परिगृहीतो भगवान् बादरायणः शारीरिके शास्त्रे पाशुपताधिकरणे पत्युरसामञ्जस्यात् (२.२.३५) इत्यादिना शैवागमानां श्रुतिविरोधात् अप्रामाण्यमातिष्ठेति नैतदपह्नवार्हम् । तुल्यन्यायतया शाक्तागमानामप्यप्रामाण्यमेव तदभिमतमित्यवगम्यते । वैष्णवागमानां विषये तु वैखानसागमसंप्रदायस्य परमभागवतवैखानसमुन्युपज्ञत्वात् तदनुसारित्वाच्च भृगुमरीच्यादिसंहितानां वेदविरोधगन्धाभावात् सर्वथा सुप्रतिष्ठितमेव प्रामाण्यम् । पञ्चरात्रविषये तु भवति केषाञ्चित् विप्रतिपत्तिः । तथा हि शास्त्रे वासुदेवात् संकर्षणोनाम जीवो जायते इति वेदविरुद्धायाः जीवोत्पत्तेरभिधानात् अवैदिकमिदं पाशुपतादिवत् अप्रमाणमेवेति केचिदभिप्रयन्ति । व्याचक्षते च स्वाशयानुगुणं शारीरकसूत्रस्थमुत्पत्यसंभवाधिकरणम् । पाञ्चरात्रिणस्तु तस्य शास्त्रस्य वेदविरोधगन्धाभावात् सर्वतोमुखं प्रामाण्यमतिष्ठन्ते । आचक्षते च । संकर्षणो नाम जीवो जायते इति वचनं न जीवोत्पत्तिप्रतिपादनपरम् ।तस्मिन्नेव शास्त्रे स ह्यनादिरनन्तश्च परमार्थेन तिष्ठति । (परमसंहिता२/२९) इत्यादिना जीवोत्पत्तिप्रतिषेधात् । किन्तु जीवाभिमानसन्निकर्षणाख्यभगवदवतारपरमिदं वचनम् । भगवदवताराश्च अजायमानो बहुधा विजायते इत्यादिश्रुतेः । (तैत्तिरीयसंहिता ३/१३/१)

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय संभाम्यात्ममायया ।। भगवद्गीता ४.६

इत्यादिस्मृतेश्च संमञ्चैव । अतः सर्वथा प्रमाणमेवेदं शास्त्रमिति व्याकुर्वन्ति । च स्वसिद्धान्तानुगुणं शारीरकमुत्पत्यसंभवाधिकरणम् । एवं सर्वथा सुप्रतिष्ठितं पाञ्चरात्रप्रामाण्यमभिसंधायैव न्यायमञ्जर्यामागमप्रामाण्यप्रकरणे जयन्तभट्टोऽप्याह -

पाञ्चरात्रे तेनैव प्रामाण्यमुपवर्णितम् ।

अप्रामाण्यनिमित्तं हि नास्ति तत्रापि किञ्चन ।।४आह्निकम्

इति भामतीकारोऽपि औडुलोमिं पाञ्चरात्रमतानुसारिणं मन्यते । तथा चाह उत्क्रमिष्यत एवं भावादित्यौडुलोमिः इति सूत्रभाष्यव्याख्यानामवसरे औडुलोमिमतं निरूपयन् यथाहु पाञ्चरात्रिकाः -

आमुक्तेर्भेद एव स्याज्जीवस्य च परस्य च ।

मुक्तस्य न तु भेदोऽस्ति भेदहेतोरभावतः ।।१.४.२१

सौविध्याय ग्रन्थोऽयं नवमोध्यायेषु विभक्तः । तत्र प्रथमाध्याये माहेश्वरसूत्राणां परिचयः । तन्त्रागमदृष्ट्या वर्णानां समीक्षणञ्च । द्वितीयाध्याये आचार्यनन्दिकेश्वरः तस्य काशिका च । तृतीयाध्याये वर्णकालः. चतुर्थाध्याये वर्णानां स्थानविवेचनम् । पञ्चमाध्याये प्रयत्नानां विवेकः । पष्ठाध्याये मातृकादृष्टया दर्शनदृष्ट्या च वर्णानां विवेचनम् । सप्तमाध्याये वर्णोत्पत्तिविमर्शः । अष्टामाध्याये वर्णानां शिवतत्त्वरूपपर्यालोचनम् । नवमाध्याये व्याकरणदृष्ट्या सृष्टिप्रक्रिया इति । शम् ।

विदुषां वशंवदः

डॉ.शेषनारायणमिश्रः

वाराणसी

कृतज्ञता ज्ञापनम्

माहेश्वरसूत्राणां व्याकरणतन्त्रागमदृष्ट्या समीक्षणमिति गूढरहस्यस्य स्फुटप्रतिपादने निबन्धकारस्य सन्तुलितरूपप्रदाने तत्तद्विषयाणां समुचितरूपविधाने सन्देहास्पदस्थले यथावसरं सस्नेहममूल्यं समयं विचारं दत्वा यैः वयमनुगृहीतास्तेषामुदारचरितानां देववाणीसमुन्नयनसंसक्तचेतसामतिगूढग्रन्थरहस्य प्रकाशनभास्कराणां सरस्वतीसमुपासनैकव्रतीनां शाब्दिकमौलिकरत्नानां पण्डितवर्गलब्धश्रुतिकीर्तिनां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य व्याकरणविभागाध्यक्षचराणां राष्ट्रपतिपुरस्कारसभाजितानां भारतराष्ट्रस्य संस्कृतशास्त्रचूणामणीनां परमपूज्यानां प्रोफेसररामयत्नशुक्लवर्याणां सश्रद्धं कृतज्ञतां विज्ञापयामि येषामहैतुकी कृपा मयि वर्तते । अतः परं वाराणसीस्थदक्षिणामूर्तिसंस्कृतमहाविद्यालयस्य प्राचार्यपदमधिष्ठितचराः परमकारूणिकाः श्रीरामसन्मुखद्विवेदिमहाभागाः मम सर्वथा सर्वदा प्रणम्याः सन्ति येषामहैतुकीकृपा विद्याप्राप्तिकाले मया सुलब्धा तथा सर्वदैव सर्वस्मिन्नपि क्षेत्रे तेषामाशीर्वादः जीवने वर्तते । तेभ्योऽपि हार्दिकं धन्यवादं विज्ञापयामि ।

श्रीशास्त्रार्थसंस्कृतमहाविद्यालयस्य प्राचार्यपदभाजाः श्रीगणेशदत्तशुक्ल महोदया अपि सादरं प्रणम्यन्ते यैः लेखने आपेक्षिकं साहाय्यं प्रदत्तम् । सम्पूर्णानन्दसंस्कृतविश्वविद्यालये योगतन्त्रविभागे प्राध्यापकचराणां श्रीमतां हीरालालमिश्रमहोदयानां हृदयतः स्मरामि येषां लेखने सदैवोत्साहपूर्णं निर्देशमासीत् । ग्रन्थस्यास्य प्रकाशने यथाशक्त्या संशोधनटङ्कणादिकार्यं कृत्वा सहयोगं कृतवद्भ्यो स्वतनुजेभ्यो सुधाकरमिश्रेभ्यो हार्दमाशीर्वादः प्रदीयते । एवं परिवारस्य सम्पूर्णं दायित्वं निर्वाहकर्तृभ्यो स्वजेष्ठतनुजेभ्यो दिवाकरमिश्रमहोदयेभ्यो हार्दं स्वागतं विधायान्ते डॉ.विनयकुमारमिश्रवर्येभ्यो चाभिनन्दयन् विरमामि ।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥

विद्वच्चरणानुरागी
डॉ.शेषनारायणमिश्रः

सङ्केतसूची

अ.सू.पा.	अष्टाध्यायीसूत्रपाठः
म.भा.	महाभाष्यम्
ल.श.	लघुशब्देन्दुशेखरः
का.	नन्दिकेश्वरकाशिका
तन्त्रा.	तन्त्रालोकः
मातृ.	मातृकाचक्रविकेकः
लक्ष्मी.	लक्ष्मीतन्त्रम्
महार्थ.	महार्थमञ्जरी
भा.	भाट्टतन्त्ररहस्यम्

प्रथमोऽध्यायः

माहेश्वरसूत्राणां महत्त्वम्

प्रथमोऽध्यायः

माहेश्वरसूत्राणां महत्त्वम् -ः

भाषामधिकृत्य वैज्ञानिकसरण्या यावत्सुव्यवस्थितं सुदृढ़ञ्च भारतीयै र्मनीषिभिर्मूर्धन्यैर्विचारितं न तावदन्यत्र दृग्गोचरी भवति । भाषायाः वर्गीकारः, प्रकृतिप्रत्ययविश्लेषणम् , पदानां मूलभूतशब्दान्वेषणम् , धातुप्रत्यय-वाच्यनिश्चयनम् , पदार्थानां सम्बन्धनिरूपणं, प्रकृतिप्रत्ययवाच्यनिश्चयनम् , पदार्थानां परस्परसम्बन्धनिरूपणं प्रकृतिप्रत्ययार्थसंसर्गस्थानञ्च भारतीयसंस्कृत-शाब्दिकानां बुद्धिवैभवस्य परां काष्ठां बोधयति । देशेऽस्मिन् शताब्दीं यावत् मेधाविनो वैयाकरणमूर्धन्याश्शब्दविद्यावगमाय माहात्म्यसम्पन्नानि तानि तानि निबन्धरत्नानि निरमासुरिति न परोक्षं प्रेक्षावताम्, अमीषां निबन्धानां सामर्थ्येनैव संस्कृतभाषा परामरतां भजति । किमधिकं वैदेशिकैरपि विद्वन्मूर्धन्यैरेषां निबन्धानां स्वकीयेषु भाषाशास्त्रेषु बहुतमामुपयोगः कृतः । इति केषां सुमनसां नाविदितचरम् । अथ च आसृष्टेरथ यावत् व्यवस्थितभाषाशास्त्राराहित्येनाप्यनेकाः भाषाः नातिचिरमेव विलयं गताः, दुःखबोधाः वा जाताः । परन्तु संस्कृतभाषा शाब्दिकानां विपुलयानुकम्पया संस्कृतवाङ्मयं सहस्रं परप्रहारान् सोढ्वाऽपि जीवत् सत् सुतरां सुगमतां गच्छति ।

भाषां स्थिरयितुं व्यवस्थापयितुं वा प्रातिशाख्यादिषु प्राचीनतमग्रन्थेषु निर्दिष्टेषु सङ्केतितेषु सम्प्रति स्वसत्तामासादयत्सु चानेकेषु शब्दानुशासनेषु पाणिनीयशब्दानुशासनमेव सर्वातिशायीयति केन विरोधातुं साहसमाद्रियेत । संस्कृतवाङ्मयमधिगन्तुमपेक्ष्यमाणसकलसामग्रीसम्भूतमिदं पाणिनीयाष्टकमस्ति । पाणिनीयाष्टकं च माहेश्वरसूत्राश्रितमिति ज्ञातमेव । माहेश्वरसूत्राणि यथा -

"अइउण् ,ऋऌक् , एओङ् ,ऐऔच्, हयवरट् ,लण् ,ञमङणनम्, झभञ्, घढधष् ,जबगडदश् ,खफछठथचटतव् ,कपय् ,शषसर् ,हल् १"। महामहिम्भट्टोजिदीक्षितः स्वकीये सिद्धान्तकौमुदीग्रन्थे लिखति यत् माहेश्वराणि सूत्राणि इति । अत्र महेश्वरादागतानीत्यर्थः । तत "आगतः२" इति अण् प्रत्ययः । तथा चोक्तम् -

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः [३]।।

न चात्र न मानम् , येनाक्षरेति शिक्षावचनस्यैव मानत्वादिति तन्न, तथा सति श्रुतित्वाभावापत्तेः । अतोऽत्र 'तत आगतः' इति सूत्रेणैवात्र । महेश्वरप्रसादात् अनेन लब्धा एषा चतुर्दशसूत्री उक्तानुपूर्वीका श्रुतिरेवेति, एवञ्च नादित्वेन अष्टाध्यायी ततोऽस्य बाह्यत्वेन तत्तद् वृद्धव्यवहारो नानुपपन्न इति, अत एव प्रोक्तं महामहिमनागेशभट्टेन लघुशब्देन्दुशेखरे -

"एवञ्चानुपूर्वीका श्रुतिरेवैषा तत्प्रसादात्पाणिनिना लब्धा"[४] । श्रुतिमूलकत्वादस्यैव वेदाङ्गत्वम् । अत्र प्रमाणं -

येनाक्षरसमाम्नायमधिगम्यमहेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तम् ....

इति शिक्षावचनम् । लण् सूत्रे णकारविषयकाचार्यप्रवृत्तिर्ज्ञापयति 'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्' इति । आचार्यपदेन महेश्वररिति [५]। एतेन पञ्चम्यन्तोक्तिश्छन्दानुरोधादिति सामान्यस्य विशेषपरत्वेन न मानमिति परास्तम् । एतेन महेश्वरेण प्रोक्तानीत्यपि व्याख्यानं निरस्तम् । एवं सति प्रसक्तं भाष्यविरोधं परिहरति । लण्सूत्रे इत्यादिना शेखरकारः । पुनश्च शेखरकृता - अनुबन्धाश्च महेश्वरकृता एवेत्यनुपदं स्फुटी भविष्यति । ञमङणनानामित्यत्र मकारप्रत्याख्यानपरभाष्यं तु किमदृष्टार्थमेव तदुच्चारणमुत दृष्टार्थमपीत्येवं विचारपरं सर्वत्र प्रत्याख्यानमेवं परमेव अन्यथाऽङ्गानामपि पारायणे धर्मश्रवणेन तत्र तत्र पाणिनिन्यास प्रत्याख्यानस्याप्यसङ्गति स्यात् । तदुक्तं 'इको यणचि' इति सूत्रे सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यादिति । किञ्चिद् दृष्टादृष्टार्थवत् । किञ्चिच्छुद्धाऽदृष्टार्थवत् । सर्वथाऽनर्थकं न किञ्चिदिति तदर्थः । वृद्धिसूत्रस्थे वर्णेनाप्यनर्थकेन न भवितव्यमिति भाष्यग्रन्थेऽनर्थकत्वं बोध्यार्थराहित्यरूपमिति न निष्प्रयोजनत्व - रूपानर्थक्येन तत्र तत्र प्रत्याख्यानपरभाष्यासङ्गतिः । अत एव चतुर्दशसूत्र्यां वेदत्वादेव सोऽयमक्षरसमाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिरिति भाष्यमुपादायोक्तं भर्तृहरिणा यथैवेदमव्युच्छिन्नं चन्द्रतारकादि,

एवमस्याक्षरसमाम्नायस्य न कश्चिदाधुनिकः कर्ताऽस्ति। एवमेव वेदपारम्पर्येण स्मर्यमाण इति । आधुनिकः = शरीरी। शरीरीति पदमधिकृत्य विषमपद विवृत्तिकाराः श्रीराघवेन्द्राचार्याः "अनेनाऽशरीरेणेश्वरेण वेदः कृतः इति लभ्यते। इदन्तु न युक्तम्, तस्य पौरुषेयत्वात् अस्य महतो भूतस्य निःश्वसितमिति श्रुतेश्च अनायासेनोच्चारितार्थकत्वम् । विमर्शे = विचारे क्रियमाणे शिवादागतमेवैतत्सूत्रजालं न तु ढक्कानिनाद एव। अग्रे शेखरकारः पुष्पितत्वम् तन्मूलकशब्दशास्त्रद्वारेण,शब्दप्रयोगेण च फलितम्। शेखरे वेदपारम्पर्येण स्मर्यमाण इत्यस्यायं भावः परम्परैव - पारम्पर्ये गुरुशिष्यपरम्परेति इति यावत्। वेदसम्बन्धिनी या सा तया स्मर्यमाणम् । वेदस्य येऽध्यापकाः चाऽध्येतारस्तैरधीयमानत्वादध्याय्यमानत्वाच्चास्यापि वेदाङ्गत्वमिति । उक्तं च चतुर्दशसूत्रव्याख्यायां नन्दिकेश्वरकृतकाशिकायाम् -

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।
उद्धर्तुकामः सनकादिसिद्धान्नेतद् विमर्शे शिवसूत्रजालम् ।।[६]
अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णचतुर्दशम्।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये ।।[७]

अत्र शेखरकृता अनुबन्धानां सादित्वं प्रतिपादयता तत्त्वे मानान्तर - मुपस्थापितम् । आत्मतत्त्वं वागाद्यगोचरमिति ज्ञापनाय ढक्कानिनादव्याजेन सनकादिसिद्धानुद्धर्तुकामो नटराजराजः विश्वरूपविलासवैचित्र्यचमत्कारप्रवीणत्वं नृत्तसमाप्तौ चतुर्दशवारं स्वात्मतत्त्वं प्रकटयितुं ढक्कां ननाद। यत्तदेतदुद्भूत वर्णात्मकमाद्यमिति । अतिरहस्यं पाणिनिशिवप्रसादलब्धसूत्रसमूहरूपम्। अहं नन्दिकेश्वरो विमर्शे विचार्य स्फुटी करोमीति भावः । एषु नादरूपेषु सर्वेषु सूत्रेषु अन्त्याः वर्णाश्चतुर्दशयस्मिन् समूहरूपे तत् णादिलान्तानुबन्ध-रूपमिति। वर्णचतुर्दशमिति अच्प्रत्ययसमासान्तः । अन्त्यो वर्णो लः चतुर्दशसंख्यापूरको यस्मिस्तत्। एवञ्च अनुबन्धाः तदा नासन्। तत्र बुद्ध्या तन्नादः कृत इति ते तेनैव कृताः ।

अत्र शेखरोऽपि प्रमाणम् - धात्वर्थं = धातुमूलकशब्दशास्त्रप्रवृत्त्यर्थम्। अत एव अनुबन्धकरणार्थश्च वर्णानामुपदेशः इत्युक्तं भाष्ये । अत्र

करणशब्दप्रयोगेणानुबन्धानां सादित्वं सूचितम्। तत्करणञ्चोपदेशकर्तृकर्तृकमेव प्रत्यासत्तेः। तेन तद्व्यतिरिक्तस्य सर्वस्यनादित्वं सूचितम्। अत्र सनकाद्युद्धरणेच्छयाऽस्य ब्रह्मोपदेशरूपत्वं सूचितम्। तच्च श्रुतित्वाभावे न सङ्गच्छते। "श्रोतव्यो श्रुतिवाक्येभ्यः" इति श्रुतेः। ऋक्तन्त्रव्याकरणे शाकटायनोऽपि इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं यथाऽचार्या ऊचुर्ब्रह्मा, बृहस्पतये प्रोवाच बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय भरद्वाज ऋषिभ्यः ऋषयो ब्राह्मणेभ्यस्तं खल्विदमक्षरसमाम्नायमित्याचक्षते। 'न भुत्त्वा न नक्तं प्रब्रुयाद् ब्रह्मराशि'रिति। ब्रह्मराशिरित्यस्य ब्रह्मप्रतिपादको वर्णराशिरित्यर्थः। तत्त्वञ्च नन्दिकेश्वरकृत काशिकायां स्पष्टम्। अत एव तेषामन्यकर्तृकत्वादेव। वृत्तिसमवायार्थो वर्णानामुपदेशकर्तव्यः इति भाष्ये उक्तम्। पाणिनेर्लाघवेन शास्त्रप्रवृत्तिफलको यः समवायो वर्णानां क्रमेण सन्निवेशस्तदर्थ इति तदर्थः। स च अणादिप्रत्याहार द्वारा शास्त्रप्रवृत्यर्थः। एवञ्चायमुपदेशः पाणिनेरन्यकृत इति स्पष्टमेवोक्तम्। मन्त्रोपदेश इतिवच्चात्रोपदेशपदप्रयोगः, अत एवास्य ज्ञाने सर्ववेदपारायणजं पुण्यं फलमिति भाष्ये उक्तम्। व्याकरणमुपागम्य वेदानां वेद इतिच्छान्दोग्य श्रुतिरप्येतत्परैवेति।

अत एव अथ कः उपदेशः ? उच्चारणम् , इत्येवं भाष्ये उक्तम्। न तु आद्योच्चारणमिति। तस्य च ढक्कानिनादेनाभिव्यक्ति इति एतेनोपदेशपद प्रयोगाणामनुबन्धवद् वर्णानामपि सादित्वमित्यर्धजरतीयं हेयमिति परास्तम्।

तन्त्रागमदृष्ट्या वर्णानां समीक्षणम् -ः

तनोति विपुलानर्थान् तत्त्वमन्त्रसमन्वितान्।
त्राणं च कुरुते यस्मात् तन्त्रमित्यभिधीयते ॥
आगतं शिववक्त्रेभ्यः गतं च पार्वतीमुखे।
मतञ्च वासुदेवेन तस्मादागम उच्यते ॥

योगतन्त्रदृष्ट्या - योगो नाम शिवशक्त्योः सामरस्यमेव। एतदेव शिवशक्तिसङ्घट्टनाम्नाऽपि। शिवो नाम चिदभिन्नप्रकाशात्मकत्वम्। विमर्शो नामेच्छापरपर्याया सर्वाकारयोगिनीशक्तिः।

अकार: सर्ववर्णाग्र्य: प्रकाश: परम: शिव: ।
हकारोऽन्त्यकलारूपो विमर्शाख्य: प्रकीर्तित: [८]॥

अकारहकारयोरनयो: शिवशक्त्यो: समाहार: अर्थादन्योन्यमवस्थानं सामरस्यं नाम इयमेव समरसता शिवयोगिभि: प्राप्यं परंधाम । एतादृश: शिवशक्त्यात्मक: संविशेषो योगस्तन्यते विस्तार्यते 'तनु विस्तारे'[९], 'तनुश्रद्धोप - करणयो:'[१०] तनोतीति तन् ,त्रायते इति त्र:, तं श्चासौ त्र: तन्त्र:, विस्तारो वैशिष्ट्यापन्नो रक्षक:, तानयति श्रद्धां समुत्पादयत्युपकरोति कल्याणलीलां समुल्लासयति अयत्नसम्पन्नसमीहितार्थं करोतीति तन्त्रम् । विद्या - योग - क्रियाचर्यादिप्रक्रियापरकै: शास्त्रैरनेनेति योगतन्त्रम् । सनक-सनन्दन - सनत्कुमार - वशिष्ठ -शुकादिभि: पञ्चयोगिभिर्ब्रह्मनिष्ठैकनिष्ठब्रह्मचारिभिश्चीर्णमवगतं प्रचारितश्च ज्ञानक्रियासामरस्यमपि योगस्तन्त्रनाम्ना लोके प्रसिद्धिमवाप ।

योगस्वरूपम् -:

कुण्डलिन्या अपरपर्याया सा योगरूपा शक्ति: सर्वेषां योगतन्त्राणामाधार भूमि: । यत्र यत्र तन्त्रागमेषु प्रक्रिया प्रकरणात्मना योगवर्णनं विराजते कुण्डलिनीमधिकृत्य तत्सर्वं योगतन्त्रम् यथा -

सशैलवनधातॄणां यथाऽधारोऽहि नायक: ।
सर्वेषां योगतन्त्राणां तथाऽधारो हि कुण्डली[११]॥

परमयोगिन: शिवस्येशान:, तत्पुरुष:, अघोर:, वामदेव:, सद्योजात: पञ्चमुखैर्निर्गतं ज्ञानं गुरुशिष्यपरम्परयाऽथ यावदागच्छतीत्यागमशब्दस्य पारम्परिकोऽर्थ:। अत एव "आगमो ज्ञानमित्युक्तमनन्ता ज्ञानकोटय:[१२]" इति वचनादागमस्य ज्ञानमिति पर्याय: । तज्ज्ञानं योगादृते नहि -

योगात् सञ्जायते ज्ञानं ज्ञानाद् योग: प्रवर्तते ।
योगज्ञानाभियुक्तस्य प्रसीदति महेश्वर:[१३] ॥

कौलोपनिषन्मतेन सर्वात्मतासिद्धिरेव मोक्ष: । सर्वात्मतेत्यत्र सर्व एव आत्मा यस्य तद्भाव: । तस्य च सिद्धिरित्यर्थ: कृत:, अर्थात् सर्वस्य स्वात्माभेदेन ज्ञानमेव मोक्षपदार्थ: । अत एव देवीभागवते -

"सर्वं खल्विदमेवाहं नान्यदस्ति सनातनम् "[१४]

इत्यत्र समानार्थकज्ञानस्य मोक्षजनकत्वस्वीकारात् । पञ्चविषयाणां प्रपञ्चस्वरूपं विवृण्वन् तेषामपि ज्ञानस्वरूपमेव निर्धारितम् । यथोक्तं योगवाशिष्ठे -

सर्वत्र पञ्चभूतानि षष्ठे किञ्चिन्न विद्यते ।[१५]

ज्ञानशब्दस्यापि विग्रह्य अर्थौ दर्शितः । ज्ञश्चासावनश्च ज्ञानमिति । अत एव प्राणवन्तोऽपि जीवाविषयानजानन्तास्तिष्ठन्तीति तेषां ज्ञानस्वरूपत्वं निर्धारितं "योगो मोक्षः"[१६] इत्यादिना स च मोक्षः । प्रपञ्चस्वरूपं विवृण्वन् तेषामपि ज्ञानस्वरूपमेव निर्धारितम् ।

मोक्षो हि नाम नैवान्यः स्वरूपप्रथनं हि सः ।
स्वरूपं चात्मनः संवित् --------------।।[१७]

तन्त्रस्वरूपम् -ः

आत्मनः संविदेव सर्वत्र तन्त्रागमेषु योगः । तन्त्रागमशब्दो च भारतीय वाङ्मये शाक्तशैवदर्शनयोर्निरूढिं गतवानादिकालादेव प्रसिद्धौ । सत्यपि भेद आगम तन्त्रयोः तात्त्विकम् । षट्त्रिंशत् तत्त्वस्वीकारे किमपि पार्थक्यं नास्ति । अस्य दर्शनस्य स्वच्छन्दमालिनीविजयोत्तरादितन्त्रादितन्त्राम्भोधेराडोलनं कृत्वा काश्मीरशैवाचार्यैर्महामाहेश्वरैरीश्वराद्वयवादिरूपसयदेदीप्यमानग्रन्थमालाऽऽविस्कृता । अस्य दर्शनस्य उद्धारकेण कैलासशिखरे भ्रमता श्रीकण्ठाभिधेन शिवेनैतद्दर्शनसिद्धान्तानां शैवसम्प्रदायदृढाभिमानी दुर्वासाज्ञानोपदेशेनानुगृहीतः । दुर्वाससा च मानवभूम्यवतारणपूर्वकं शिवसूत्रं शिवोपलगुहातः प्राप्य शिवप्रेरणया काश्मीराभिजनस्य वसुगुप्तस्य स्वप्नावस्थायां ज्ञानशक्तिसमुद्दीप्य प्रदत्तम् । तदुक्तम् -

कैलासाद्रौ भ्रमन् देवो मूर्त्या श्रीकण्ठरूपया ।
मुनिं दुर्वाससं नाम भगवानूर्ध्वरेतसम् ।। इति ।।[१८]

अन्यच्च-

लब्धं महादेवगिरौ महेश स्वप्नोपविष्यत् शिवसूत्रसिन्धौ ।
रूपन्दामृतं यद्वसुगुप्तपादैः श्रीकल्लटस्तत्प्रकटीचकार ।।[१९]

इदं ज्ञानं दिव्यौघसिद्धौघमन्त्रत्रयमानवोघोघत्रयपरम्परया लोकेऽवतीर्णमस्मद्गुरुपर्यन्तं कालक्रमेण गतं ज्ञानं तन्त्रागमशब्दवाच्यम् । महामाहेश्वरेण

जयरथेनापि -

इत्यागमं सकलशास्त्रमहानिधानाच्छ्रीशम्भुनाथवदनाधिगम्य सम्यक् ।
शास्त्रे रहस्यरससन्ततिसुन्दरेऽस्मिन् --------- ॥[२०]

एतेन स्फुटं प्रतीयते यद् गुरुमुखोद्गतं ज्ञानमेव तन्त्रागमपदेन सङ्केतितमत्र श्लोके - अग्रेऽपि जयरथेन -

स तन्त्रं यज्ञे रूद्रशिवभैरवाख्यमिदं त्रिधा ।
वस्तुतो हि त्रिधैवेयं ज्ञानसत्ता विजृम्भते ।
भेदेन भेदाभेदेन तथैवाभेदभागिना ॥[२१]

एतेन भेद-भेदाभेद-अभेदप्रतिपादकक्रमेण त्रिप्रकारकमिदं ज्ञानसत्रात्मकं शास्त्रमुद्भूतमिति राद्धान्तः । नेत्रतन्त्रे षोडशाधिकारे षड्विंशकारिकायां -

"ह्यागमस्य प्रवक्ष्यामि क्रियते तु यथेच्छया[२२] "

इत्यागमस्य वचनकर्मत्वं निर्धारितम् । एतेनाप्यस्यागमस्य तन्त्रापर-पर्यायस्य ज्ञानमेवार्थो वाचि प्रयुक्तं निर्धार्यते । इममेवार्थं लक्ष्यीकृत्य तत्त्ववैशारद्यां वाचस्पतिमिश्रेणोक्तं "आगच्छन्ति बुद्धिमारोहन्ति यस्मादभ्युदयनिः श्रेयसोपायाः स आगमः, तन्यते भावि जगतः सूक्ष्मं रूपं यत्र तत्तन्त्रमिति शब्दव्युत्पत्या सूक्ष्माकृतिसम्पन्नाभेदतत्त्वात्मकज्ञानस्यस्यैव तन्त्रत्वं वक्तुं पार्यते । तदेव सूक्ष्मं वस्तुतत्त्वं किञ्चिदुन्मिषितं सद् भेदाभेदरूपे गृह्णाति । प्रकटस्फुरणरूपेण विकासे तु देशकालाकारदिभेदप्राकट्ये भेदरूपतामपीत्येकस्यैव ज्ञानस्याभेदापन्नस्य देशकालाकाराद्युन्मेषक्रमेणोक्तयोजना निष्पद्यते । तदेव -

तस्मात् सर्वप्रयत्नेन शिवज्ञानं समभ्यसेत् ।
तदा सिद्ध्यन्त्यशेषाणि कर्माण्येवान्यथा न हि ॥[२३]

शिवशक्तितत्त्वम् -:

एतेन सर्वकर्मसम्पादनहेतुभूतं शिवप्रोक्तं योगतन्त्रात्मकं ज्ञानमेव सदाभ्यस्ततया साधकं महोपकारकत्वञ्चोक्तम् । अतः शिवशक्त्योरन्योन्या-वस्थानं सामरस्यात्मकात्मनः संविद्रूपयोगार्थं यतनीयं शैव-वैष्णव-दौर्गार्कबौद्धजैन गाणपत्याद्यागमेषु प्रक्रिया प्रकरणात्मना स्थितं शास्त्रं योगतन्त्रम् ।

तत्र शैवशाक्तागमयोः क्रमेण शिवस्य शक्तेर्वा प्राधान्यमवलम्ब्य

तत्तत्वर्णनं क्रियते। "योगस्त्वमसि देवेशि" इत्यादिना शक्तेर्जगद्रूपत्वं शिवस्य च शक्तिस्वामित्वेन योगाधिष्ठातृत्वमर्थाद् योगित्वं स्फुटरूपेण प्रतिपदोक्ततया प्रतिपादितम्। अत एव "शाम्भवैक्यदीपिकायाम् "विश्वमिदं मन्मयं मत्कार्यत्वात् यदित्थं तत्तथा, यथा शरीरम् , इदञ्च मत्कार्यम् , तस्माद् मन्मयमिति । अत्रानुमानाकारे कार्यकारणयोरभेदोपचारेण मत्कार्यत्वाद्विश्वस्य शिवमयत्वमुक्तम्। पूर्ववचनेन च शक्तिमयत्वमिति, पूर्वोत्तरसन्दर्भेण शक्तिशक्तिमतोरभेदत्वसिद्धान्तः साधुपरिपोषितः । एतेनापि योगशास्त्रस्य तद्गतसकलशाखाप्रशाखादेः शिवसम्बन्धित्वं सिद्ध्यति। तस्य द्वौ पक्षौ दृग्गोचरी बाह्यान्तररूपौ। अन्तर्गता हि प्रकाशपरिपूर्णः, तस्यान्तर्गतत्वं वा भवेत् । बहिर्गतत्त्वं वा । नह्यन्तर्गतत्त्वबहिर्गतत्त्वमात्रेणैकस्य वस्तुन उक्तावस्थानपरिवर्तने भेदेन भेदो भवितुमर्हति। तस्मात् पूर्वोक्तव्यवहारस्यद्वयं सर्वजनप्रसिद्धमनपह्नवनीयमिति। अन्तर्गतं प्रकाशत्वं चिन्मयानन्दमयं च स्वात्मपरमेश्वरेणाभिन्नम्। यथोक्तम् -

स्वात्मैव सर्वजन्तूनामेक एव महेश्वरः ।
विश्वरूपोऽहमिदमित्थमखण्डानन्दबृंहितः ॥[२४]

अनया कारिकया सुस्पष्टमुद्घोष्यते यत् स्वात्मतत्त्वं विश्वात्मकमिद मात्मकमहमात्मकत्वञ्च। आपातदृष्ट्या भेदत्रयस्य भानेऽपि विचारदृष्ट्याऽखण्ड वस्तुनि वस्तुतः पारमार्थिकमेकत्वमेव भेदाभासस्तु काल्पनिकः। न ह्यन्तर्बहिर्भाव भेदेन तस्याभेद औपाधिकः ।

अत एवैक शक्तिः प्रयोजनभेदेन कार्यभेदेन देशकालवस्तुभेदेन भिन्नतयाऽपि धीयते । सैव शक्तिः सर्जनकाले सृष्टिरूपेण, रक्षणकाले स्थितिरूपेण, संहरणकाले संहाररूपेण, निग्रहकाले तत्तद्रूपेण, अनुग्रहकाले कृपारूपेणाभिधानाद्। भिद्यते तु वस्तुगतत्वेन। प्रोक्तञ्च -

एकैव शक्तिः परमेश्वरस्य भिन्नास्चतुर्धा व्यवहारकाले ।
पुरुषेषु विष्णुः भोगे भवानी समरे च दुर्गा संहारे काली ॥

अत एकमेव मूलं तत्त्वं विश्वोन्मुखत्वेन विश्वात्मकरूपेण, एकोन्मुखत्वे ह्रदन्तत्वेनान्तर्गतस्य चिदानन्दपरमार्थस्यैव हि रूपत्वेऽहं रूपतया भासते । न तु तत्तदभेदाभासेन वस्तुनो भेदो भवति। यथोक्तं विरूपाक्षपञ्चाशिकायाम् -

सन्तानान्तरवाहे ज्ञाता व्यावृतभासनः क्रमिकः ।
जीवाख्यो मद्योगान्मद्वत् स्यादक्रमाभासः ॥[२५]

अयं भावः - नीलसङ्कल्पाद्येकसन्तानसमनन्तरं पीतसंकल्पविकल्पादौ सन्ताने वहति सति व्यावृत्तभासमानो ज्ञाता क्रमिको नीलस्यावभासकोऽस्मि, पीतस्यावभासकोऽस्मीति परस्परपरिहाररूपेणावस्थितग्रहणत्वाद् ग्राहकः पूर्वोक्तो ज्ञाता क्रमवान् । यदा चेत्थं क्रमिकता , तदैव चासौ परमेश्वरो जीवाख्यां लभते । परमेश्वरयोगात् पारमेश्वरे या क्रमिकता, सा वैद्यौपाधिक्येव वस्तुगत्या नीलपीतयोरनुवृत्तोऽवभासोऽनुवृत्तप्रवाह्यानुकरणमात्रमेव । न तत्र क्रमस्य कापि सत्ता, मूलतत्त्वस्याक्रमिकत्वात् । न हि प्रकाशे क्रमिता काप्यपेक्षिता । तस्याक्रमिकत्वात् । तथैव ज्ञातर्यपि तत्तज्ज्ञानबोधपरकस्य तस्य भेदस्य न ग्राहकाभेदः । वेद्यज्ञानस्याकस्मिकत्वान्मध्यपातित्त्वादणिकत्वाच्च नीलपीतादिग्रहण - दशायामपि प्रकाशैकात्मतया प्रकाशात्मकं वस्त्वक्रममेवाव तिष्ठते । अतः प्रबुद्धस्य यदा विश्वप्रतियोगित्वं तदेव शिवत्वम् , यदा तु प्रतिनियतार्थ प्रतियोगित्वं तदा ग्राहकत्वमिति द्वैरूप्यानतिक्रमाज्जीवत्वसंस्कारः सदानुवृत्तो ममैवाक्रमपरिपूर्णैकघनप्रकाशात्मकस्वात्मशिवत्वस्वभावत्वप्रबोधः उक्तदृष्टान्तेन नीलपीतादिज्ञानदशायामपि पूर्वोक्तभेदज्ञानं दूरमुत्सरितं प्रबुद्धेनेति । 'प्रबुद्धः सर्वदा तिष्ठेत्' इति स्पन्दकारिकोक्तसिद्धान्त अक्षुण्ण एव । शक्तिशक्तिमतोरभेद ज्ञानग्रहकः, विपश्चितः सदैव बाह्याभ्यन्तरोपाधिग्रहं विधूय सदा निराभासत्वमेवानुसन्दधते । तत्र शक्तिसूत्रापरपर्यायप्रत्यभिज्ञा हृदयनाम्नि ग्रन्थे शक्तेः सृष्टिसंहारयोर्हेतुत्वं वर्णितमुपलभ्यते । 'चितिः स्वतन्त्रा विश्वसिद्धिहेतुः'[२६]। इति सूत्रेण चिदेव भगवती स्वच्छस्वतन्त्ररूपा तत्तदनन्तजगदात्मना स्फुरति । मार्कण्डेयपुराणेऽपि -

"चितिरूपेण या कृत्स्नमेतद् व्याप्य स्थिता जगत्"[२७]

अन्यच्चापि-

यदा सा परमा शक्तिः स्वेच्छया विश्वरूपिणी ।
स्फुरत्तामात्मनः पश्येत् तदा चक्रस्य सम्भवः ॥[२८]

यस्मिन् काले प्राणिनामदृष्टवशात् स्वान्तः संहृतविश्वसिसृक्षया सैव

पराशक्तिर्विमर्शरूपिणी स्वेच्छया विश्वरूपिणी विश्वं सृजति । तदा षट्त्रिंश त्तत्त्वात्मकविश्वसृष्टिकाले चक्रस्य विश्वमयस्य परदेवताचक्रस्य सम्भवः । यथा वदति महामाहेश्वाभिनवगुप्तपादाचार्यः चक्रशब्दस्य प्रवृत्तौ किं निमित्तमित्या - शङ्क्याह-

विकासाच्तृप्तितः पाशोत्कर्तनात्कृतिशक्तितः ।
चक्रं कसेश्चकेः कृत्या करोतेश्च क्लोदितम् ॥[२९]

धातुर्चतुर्थान्वयादत्र चक्रशब्दः । तेन विकसति, चकास्ति, कृन्तति , करोतीति चक्रम् । आज्ञावतारेऽप्युक्तम् । स्वेच्छयैव जगत्सर्वं निगिरत्युद्गिरत्यपि । विश्वसर्जनमेव पराशक्तेः स्फुरता, तस्याः सृष्टिरूपत्वात् । जगतः शक्तेश्च कार्यकारणभावे एतावानेव परमार्थः । यथा चितिः शक्तिः स्वप्रकाशा, स्वतन्त्रा व्यापकनित्योदितपरिपूर्णरूपा, एवं जगदपि चितेर्भिन्नं नैव किञ्चित् । अर्थात् विश्वमपि चिद्रूपमेव तदुद्भूतत्वात् । यथा "तत्सृष्ट्वा तमेवानुप्राविशत् " इति । विश्वं ग्राह्यं शक्तिग्राहिका, किन्तु सर्वप्राणिसुलभग्राह्यकादिसम्बन्धो दत्तावधानतया व्यवस्थापनीयः । अर्थादनयोः सम्बन्धस्त्वभेद एव । भेदस्त्वापाततोऽभेदाज्ञानवशादाभासते । जगद्भासने किं कारणम् ? किञ्चाधिष्ठानम् ? किं प्रयोजनम् ? इति प्रश्नानामुत्तरं तत्रैव द्वितीयसूत्रे स्पष्टीकृतम् । स्वेच्छया विश्वमुन्मीलयति । इति [३०]।

अयम्भावः - स्वातन्त्र्यस्वाभावाशक्तिर्विश्वाविर्भावे न किमपि निमित्तोपानादिकमिच्छति, अपितु स्वेच्छयैव स्वभित्तौ स्थितं दर्पणे नगरवद भिन्नमपि विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतम् । भिन्नमिव पूर्वावस्थितस्य प्रकटीकरणमेवोन्मीलनम् । तद्विश्वं स्वरूपेणावस्थाभेदेनौचित्य विचारेणाधिकारा-धिकारिभेदेन चानेकप्रकारतया भिद्यते । शिवोऽपि विश्वात्मक एव, चितिसङ्कोचात् । स्वमाया शक्त्या स्वस्य सदाभासितमपि विश्वं भेदेन संकोचेन संकुचित-मिवाभासयति । तदुक्तं -

तेन शब्दार्थचिन्तासु न सावस्था न सः शिवः ।
भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः ॥[३१]

शिवजीवयोरभेदमुक्तैर्तत्त्वपरिज्ञानान्मुक्तिरज्ञानाच्च बन्ध इति निर्धारितम् ।

चित्तमपि शक्तिस्वरूपमेव चितिरेव सङ्कुचितग्राहकतामासाद्यार्थग्रहणोन्मुखी घटपटादिरूपेणात्मानं सङ्कोच्य यदा भासयति तदा चित्तपदेनाभिधीयते । अतः परमार्थानुसारिणो योगिनः स्वरूपस्यावभासात् सर्वस्यामप्यवस्थायां स्वप्रकाशकत्वं न तिरोधीयते इति मन्वते । देहेन्द्रियबुद्धिप्राणादिज्ञानं चित्तप्रधानम् । सर्वं शिवमिति ज्ञानं चैतन्यप्रधानम् । एकस्यैव चिदात्मनोरूचिभेदेनोपासना सौविध्याय दत्तनाम्नो भगवतो भगवत्या वा स्वातन्त्र्यप्रच्छादनोन्मीलनन्यूनाधिक भावभेदिता इमाः सर्वाः भूमिका नटस्यैव स्वेच्छापरिकल्पिता एव ।

विविधदर्शनेषु परतत्त्वनिरूपणे मतवैभिन्यम्

तत्तद्दर्शनप्रवर्तकाः विद्वान्सो भिन्नभिन्नरूपेण भगवदिच्छैवाभिमानं ग्राहिता परतत्त्वस्वरूपं भिन्नतयाऽभिदधति । यथा -

१. चैतन्यविशिष्टं शरीरमात्मेति चार्वाकाः ।

२. ज्ञानाधिष्ठानमात्मेति नैयायिकाः ।

३. सुखदुःखाद्युपाधिरहिताहं प्रतीतिप्रत्ययस्य आत्मेति मीमांसकाः ।

४. ज्ञानसन्तानमेव तत्त्वमिति सौगताः ।

५. प्राणा एवात्मेति केचनौपनिषदाः ।

६. असदेवेदमासीदिति श्रुत्याऽभावं शून्यमेव ब्रह्मवादिनो माध्यमिकाः ।

७. पराप्रकृतिर्भगवान् वासुदेवस्तद्विस्फुलिङ्गसदृशाः जीवा इति वैष्णवाः ।

८. त्रिगुणात्मिका साम्यावस्थापन्ना, प्रधानावस्थापन्ना, प्रधानापरपर्याया प्रकृतिः कर्त्री, पुरुषस्तु पुष्करपलाशवन्निर्लेप इति सांख्याः ।

९. सर्वसाङ्ख्यवत्प्रतिपद्यमाना अपि केवलं क्लेशकर्मविपाकाशयैरपरामृष्ट-पुरुषाविशेष ईश्वरः । इतीश्वरतत्त्वमधिकं मन्यमाना योगदर्शनाभिमानिनः ।

१०. सदेव सोम्य इदमग्रमासीदितीश्वरतत्त्वपदमास्तिता अपरे वेदान्तिनः ।

११. शब्दब्रह्ममयं परारूपमात्मतत्त्वमिति वैयाकरणाः ।

१२. आगमदर्शनोक्तगुणतत्त्वसदृशीमास्थामातिष्ठन्ते जैनाः ।

अत एवागमप्रोक्तसप्तप्रमातृभूमिषु शिव-मन्त्र-महेश्वर-मन्त्रेश्वर-मन्त्र विज्ञानाकलप्रलयाकलसकलादिष्वेते पूर्वोक्ताः सर्वेऽपि दार्शनिकाः षट्त्रिंशत्तत्त्वेषु सदाशिवादिप्रकृतिपर्यन्तेषु भिन्नभिन्नभूमिष्वेवाभिनिविष्टाः शिवशक्तित्वाभ्यामधः

स्थिता: शिवशक्तितत्त्ववैशिष्ट्यं नावाप्ता इति वक्तुं शक्यते। एतदेव तुलनयाऽऽगमेष्वभिव्यक्तम् -

बुद्धितत्त्वे स्थिता बौद्धा गुणेष्वेवार्हता: स्थिता: ।
स्थिता वेदविद: पुंसि अव्यक्ते पाञ्चरात्रिका: ।।[३२]

एतेषु सर्वेष्वपि दार्शनिकतन्त्रेषु वैयाकरणा एवास्माकं सदाशिव - पर्यन्तमनुधावन्तीत्यागमदृष्ट्येतरेभ्यो विशिष्टा इति प्रतिपाद्यन्ते ।

१३. तान्त्रिकदृष्ट्याऽऽत्मतत्त्वं विश्वोत्तीर्णम् ।

१४. कौलमतेनात्मतत्त्वं विश्वमयम् ।

१५. प्रत्यभिज्ञादित्रिकदर्शनवादिनां मते आत्मतत्त्वं विश्वतीर्णं विश्वमयत्वञ्च ।

सा शक्तिर्यदा यदा बहिर्मुखं रूपं स्वरूपे विश्राम्यति । तदा बाह्यवस्तूपसंहारादन्त: पदावस्थिति: संहार:, तत्तदुश्य संवित्संतत्या सृष्टिपदार्थ - विग्रहस्त्वित्थं 'सूत्रणं सृष्टि:' । इयं संविद्रूपा शक्तिभट्टारिका तत्तत्सृष्ट्यादि भेदानुद्वमन्ती संहरन्तो च सदा पूर्णा कृशा चोभयानुभयात्मिका क्रमाक्रमरूपा च सततं स्फुरन्ती स्थिता । एषा भट्टारिकैर्वाधिकाधिकमनुशील्यमाना भक्तजन मनुगृह्णाति । चिदात्मा परमेश्वर: स्वातन्त्र्यवशादभेदमाच्छाद्यभेदं प्रकट्येच्छादि शक्तिसहकारेणासङ्कुचितमपि सङ्कुचितमिव विधाय प्रकाशयति । अतएव सङ्कोच-ग्रहणेन निर्मलोऽपि जीवो बलात् त्रिविधमलावृततया संसारी भवति ।

१. सङ्कोचं गृहीत्वा स्वात्मानमपूर्णं पश्यन्नाणवमलेन युज्यते ।

२. अनन्तरं क्रमेण ज्ञानशक्तिसङ्कोचात् सर्वज्ञत्वं तिरस्कृत्य देहेन्द्रियादि बुद्धिष्वात्मत्वं ग्राहितेनात्मस्वरूपाद् विश्वस्य वेद्यरूपस्य भेदज्ञानान्मायामलेन युज्यते ।

३. सर्वकर्तृत्वनिमज्जने किञ्चित्कर्तृत्वप्राप्तौ कर्मेन्द्रियरूपमत्यन्तं सङ्कोचं परिगृह्णन् शुभाशुभकर्मानुष्ठानेन कार्ममलेनाप्लुतो भवति । इत्थं त्रिविधमलेन नियन्त्रितो जीव: कलादिशक्तिभिर्विलुप्तविभव: शक्तिदरिद्रसंसारी पशुरित्युच्यते ।

तदुक्तम् - शब्दराशिसमुत्थस्य शक्तिवर्गस्य भोग्यताम् ।
कलाविलुप्तविभवो गत: सन् स पशुस्स्मृत: ।।[३३]

अज्ञानमेवान्धस्य कारणम् । शब्दराशिस्वरूपा वर्णमातृका तु स्वभावप्राच्याविका । अतः स्वरूपात् प्रच्याव्यात्मानं पशुत्वे विनियोजयति । स्वशक्तिविकासलाभे तु शिव एव संसारापन्नोऽपि शिववत् पञ्च कृत्यानि करोति । देहेन्द्रियप्राणादि भूमिमवतीर्य महेश्वरो बहिर्मुखीभावावसरे घटपटादिकमर्थं तत्तान्नियतदेशकालादि तया यदाऽभासयति तदा तत्तदाभासे विलयकारिता प्रकाशेन सहैक्यमासाद्य प्रकाशे त्वनुगृहीतृता । एवमिदं पञ्चविधकृत्यकारित्वमात्मीयं ज्ञातुः साधकस्य दृढ़प्रतिपत्तिदशायां महेश्वरत्वं जीवन्मुक्तित्वञ्चास्त्येव । य आत्मनो भेदेन प्रपञ्चं पश्यन्ति ते बद्धा एव ।

शब्दान्तरेणान्यथापि पञ्चविधकारित्वं वर्णितं तत्र तत्र ग्रन्थेषु । यथा - आभासशक्तिविमर्शन-बीजस्थापन-विलापनताभिस्तानि पञ्चविधकृत्यानि करोतीति पूर्वेण सम्बन्धः । दृष्टिसृष्टिवदत्रापि चक्षुरादिज्ञानेन्द्रियसमक्षं यद्यदाभाति तत्तत्सृज्यते । सृष्टे वस्तुनि यदा किञ्चित्कालं निमेषपरिवर्जनक्रमेण यावत्कालं रज्यते तावत् स्थितिः, विमर्शकाले संहृतिः, संह्रियमाणमपि हृदि यदा विचित्रशङ्कादिसंस्कारेण विलापयति, तदा विलय अनुभूयमानमपि वस्तु चिदग्निसद्भावमापद्य पूर्णत्वापादने त्वनुग्रह एव । एतदनुभूतये सद्गुरोरुपदेश आवश्यकः । सद्गुरूपदेशं विना एतत्सर्वं भवितुं न शक्नोति । अनुभूतावपि भ्रमः स्थातुं शक्नोति । अतोऽनुभूतिर्गुरूपदेशात् परीक्षिता शास्त्रीया चास्थेया । सद्गुरूपदेशं विना स्वीयैरेव स्वस्याच्छादनं व्यामुक्तश्च भवति, एतद्व्यामोहित त्वमेव सृष्टिसंहारादिप्रपञ्चेऽणुं पातयति । निर्विकल्पभूमिञ्च विभज्य दूरमपसारयति । अस्यां स्थितो अ, क, च, ट, त, प, य, श इत्यष्टवर्णानां क्रमेण ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी ,वाराही, इन्द्राणी ,चामुण्डा , महालक्ष्यादिभिर्व्यामोह्य देहेन्द्रियादिश्वात्मतत्त्वं ग्राह्यति । तदुक्तं त्रिपुरामहिम्नस्तोत्रे सकलमातृकाप्रपञ्चमूलभूतप्रत्याहारन्यायेनाकारहकारसमहारासमुपहृतपरशक्ति संस्तवे-

पञ्चाशन्निजदेहजाक्षरभवैर्नाविधैर्धातुभि-
र्बह्वर्थैः पदवाक्यमानजनकैरर्थाविनाभावितैः ।
साभिप्रायवदर्थकर्मफलदैः ख्यातैरनन्तैरिदं
विश्वं व्याप्य चिदात्मनाहमहमित्युजृम्भसे मातृके ।।३४

अयि विश्वप्रपञ्चाधिष्ठातृमूलभूते मातृके ! त्वं नानारिधैर्धातुभिर्विश्वं व्याप्य चिदात्मनाहमहमित्युजृम्भसे इति सारांशः । पञ्चाशन्निजदेहजाक्षरभवैः निजदेहः = पराशक्तेः शरीरं तस्माद् जातानि आविर्भूतानि, आविर्भूय बहिः प्रसृतानि विश्ववस्तूनि तेभ्यो भव उत्पत्तिर्येषां तैः । एवं पराशक्तेरक्षरमयत्वं सर्वत्रागमे प्रसिद्धम् । यथोक्तमभियुक्तैः भर्तृहरिभिः-

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।।[३५]
शब्दस्य परिणामोऽयमित्याम्नायो विदो विदुः ।
छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत ।।[३६]

यद्यपि प्रत्यभिज्ञादर्शने आभासापरपर्यायस्वातन्त्र्यस्यैवोद्धोषः, तथापि तान्त्रिकदर्शने परिणामवादः स्वीक्रियते । ललितसहस्रनामटीकायां भास्कराचार्येण संसारो ब्रह्मपरिणामरूप इति निर्धारितः । किन्तु परिणामो न दधिपयसोरिव, अपितु मृदघटयोरिव, सुवर्णकुण्डलयोरिव । श्रीशङ्कराचार्येणापि सौन्दर्यलहर्याम्-

मनस्त्वं व्योमस्त्वं मरुदसि मरुत्सारथिरसि ।
त्वमापस्त्वं भूमिस्त्वयि परिणतायां नहि परम् ।
त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा
चिदानन्दाकारं शिवयुवतिभावेन विभृतो ।।[३७]

तन्त्रानुयायिकद्वैतपरम्परायामाभासवाद एव परिणामनाम्ना परिगृह्यते। किन्तु नासौ ब्रह्माद्वयवादवन्मिथ्यारूपः, अपितु सुवर्णकुण्डलवद् मृद्घटवद् वा सत्स्वरूपः । तदुक्तमीश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्याम् - आभासरूपा एव जडचेतनपदार्थाः । श्रीतन्त्रालोकविवेके तेन यथा भगवता दर्पणादावाभास मात्रसारा एव भावा अवभासन्ते , तथा संवित्तावदर्थान्न बहीं रूपत्वेनैषा सत्वमस्तीति बोधं वर्धयितुं बाह्यार्थाभिनिवेशिनामेतदुपदिष्टम्।

अतः सर्वमेवैतदाभासमात्रसारमेव, न बाह्येऽर्थेभिनिवेष्टव्यम् , येन द्वैतमोहः शाम्यते । अत एवाह -

न देशो नो रूपं न च समययोगो न परिमा ।
न चान्योन्यासङ्गो न च तदपहानिर्न घनता ।।

न चावस्तुत्वं स्यान्न च किमपि सारं निजमिति ।
ध्रुवं मोहः साम्येदति निरदिशद्दर्पणविधिः ।।३८

ब्रह्मविद्यैव कालीरूपेण समाख्याता :-

सैव ब्रह्मविद्या, पराशक्तिः, स्वरसंवाहिनी, परावाक् ,पूर्णाहन्तासंवित् काली आदिनाम्ना व्यवह्रियते । कथं सा काली इति निरूप्यते । कालीशब्दः कल, किल, विल विक्षेपे, कलगतौ, कलशब्दे, कलसंख्याने, इति धातुचतुष्टयात् कर्मणि घञ्प्रत्ययान्तात् ङीपि कृते सिध्यति । एवञ्च कल्यते यया , सर्वं ज्ञायते स्वात्माभेदेन परामृश्यते यया, संख्यायते प्रमातृप्रमेयादित्रिपुटीवर्गं परस्परं व्यपोह्यते इदमिदं नानिदमिति प्रतिनियततयाऽवस्थाप्यते गम्यते भेदिकः सकलोऽर्थः स्वरूपमारूह्यते दर्पणगतप्रतिबिम्बवत् स्वस्मादव्यतिरिक्तत्वेऽप्य वस्थाप्यते यया, शब्द्यते स्वात्मपरामशेषतमं नीयते सर्वमविकल्पज्ञानादि विलोप्यते यया सा काली ! स्वरूपावभासनक्षमस्यात्मनो यो विश्वात्मनाऽवभासः स एवाहमिति नाम्ना आम्नातस्तस्यैव प्रत्यवमर्शात्मिका दशा अहन्ता नाम ।

अयमाशयः योऽयं प्रत्यवमर्शादिनीलान्तस्य योऽयं प्रत्यवमर्शादि घटान्तस्य वेद्यस्यावभासको वेदनैकस्वभावः सर्वप्रमितिभाक् प्रकाशो नासौ स्वयमिति पर इति वा व्यपदेष्टुमर्हस्पतयोरेवाद्यात्वात् । वेद्यज्ञानास्कन्दितैकत्वस्य सत्वेन भेदकप्रमाणस्यासम्भवेन तस्यैव मूलभूतप्रकाशस्य चिद्रूपस्य प्रत्याहार-न्यायेन अश्च हश्च इति अहौ, अनयोः समाहारोऽयमिति । अकारहकाराभ्यां समस्तशब्दराशिमयस्य प्रकृतिप्रत्ययार्थसदृशस्याहन्तया व्यवहार आगमेषु तन्त्रेषु च । मूलकारणस्य मूलतत्त्वस्य शब्दार्थसङ्घातरूपस्योद्भूतावयवविवक्षायां ज्ञानाकरेण भावात्मकतल्प्रत्ययसंयोगेऽहनोभावोऽहन्तेति व्यवहारोऽयभियुक्तानाम् । अर्थादिदमिति वेद्यस्याहमिति वेदकस्य तयोर्मूलकस्य प्रकाशस्य मूलभूतो धर्म एक एव । स एव विच्छिन्नाभासत्वे परस्य न भेदव्यवहारग्राहके इदन्तया अविच्छिन्नभावाभासकत्वेऽहन्तया भासते ।

वस्तुगत्या तु सृष्टेः प्रसारात् प्राक् संहारानन्तरञ्चाभास्यमानभासक रहितमेकमेव निर्विशेषणं रूपम् । तस्यैव बहिरून्मुखतायामिदन्तयाऽन्तराभास कतात्वहन्तया प्रथनम् । आभासकत्वेनाभासयनिराभासमेकमखण्डमेव । स

एव प्रकाशः स्वाङ्गमिति भूते चिदाकाशेऽनवच्छिन्नचिन्मये स्वाभिन्नशक्तीनां संभेदविभेदाभ्यां खेचर्यादिरूपाणां स्वरश्मीनामेकार्थग्रहणोन्मुखत्वे जगदात्मना सर्वथा ग्रहणोन्मुखत्वे तु शिवात्मना व्यवहारः ।

व्यक्ताव्यक्तं जगत् :-

स्थूलसूक्ष्मात्मकमेतज्जगत् स्थूलतया व्यक्तम् । सूक्ष्मतया अव्यक्तमित्युच्यते । तत्र नाना नामरूपात्मकं पदार्थात्मकं दृश्यं जगति नित्यमेव स्थूलनम् । उदयास्तदशासु सर्वदा शक्तिलग्नत्वाज्जगतश्चिदराहित्ये उत्पद्यमानत्वा सम्भवात् । न हि जलराहित्ये तरङ्गबुद्बुदानामुत्पद्यमानता सङ्घटते । अतो लोकस्थित्युपपादनायैकस्यैव तत्त्वस्य नानात्मकता भेदाभेद सहिष्णुता लोक व्यवहारसंसाधनाय परिकल्प्यते । नानाविधसिद्ध्यपेक्षयैकस्यैव वस्तुनो भेदं परिकल्प्योपासना क्रियते । न तूपास्य वस्तुनो वास्तविको भेदः । उपास्योपासक भेदोऽपि परिमितशक्तीनां मितयोगिनामेव, न तु दिव्यसिद्धानाम् । न तु चिदैक्यप्रतिपत्तिदार्ढ्यलक्षणजीवनमुक्त्यैकरसा श्चितिमेकात्मतया सततमुपासते । तच्च पूर्वोक्तचर्चितविश्वब्रह्माण्डानांमवान्तरकक्षाविभागेनोपन्यस्य स्वात्ममित्ति लग्नतां स्वानुभवसाक्षिकीं विज्ञाप्य चतुर्विधत्वेन समुपस्थाप्यते । तदुक्तम् -

शक्तिर्माया प्रकृतिः पृथिवीति चतुर्विभागमण्डवत् ।
यश्च विभागोऽस्य बहुधा सर्वं स्थितमेतत् ॥

सर्वमपि ब्रह्माण्डं चतुरण्डयुक्तम् । शक्त्यण्ड - मायाण्ड - प्रकृत्यण्ड - पृथिव्यण्डभेदात् । तन्त्रेषु विश्वकल्पनायां षट्त्रिंशत् तत्त्वानि स्वीक्रियन्ते। तद्यथा -

१. शिवः,	२. शक्तिः,	३. सदाशिवः,
४. ईश्वरः,	५. शुद्धविद्या,	६. माया,
७. कला,	८. विद्या (अशुद्धविद्या)	९. रागः,
१०. कालः;	११. नियतिः,	१२. पुरुषः,
१३. प्रकृतिः,	१४. बुद्धिः ,	१५. अहंकारः,
१६. मनः,	१७. श्रोत्रम् ,	१८. त्वक्
१९. चक्षुः,	२०. जिह्वा,	२१. घ्राणः,

२२. वाक् , २३. पाणिः, २४. पादः,

२५. पायुः, २६. उपस्थः, २७. शब्दः,

२८. स्पर्शः, २९. रूपम् , ३०. रसः,

३१. गन्धः, ३२. आकाशः, ३३. वायुः,

३४. अग्निः, ३५. सलिलम् , ३६. भूमिः,

इत्येतानि षट्त्रिंशत् तत्त्वानि विश्वब्रह्माण्डत्वेनाभिधीयन्ते । तत्र शुद्धाध्वा, शुद्धाऽशुद्धा, अशुद्धावेति त्रिधा विभागः, शिवादीनि शुद्धविद्यान्तानि, पञ्चतत्त्वानि शुद्धानीत्युच्यन्ते । अनन्तरं माया, कला , विद्या (अशुद्धविद्या) रागः, कालो, नियतिः, पुरुष इति सप्त तत्त्वानि शुद्धाऽशुद्धावेति । अवशिष्टान्य शुद्धावानाम्नोच्यन्ते ।

एतेषां लक्षणानि :-

तत्र शिवतत्त्वं नाम इच्छाज्ञानक्रियात्मककेवलपूर्णानन्दस्वभावरूपः परमशिव एव सर्वप्रमातॄणामन्तः स्फुरत्पूर्णाहन्ताचमत्कारमयं सर्वतत्त्वोत्तीर्णसरल तत्त्वसकलतत्त्वराशिगतसृष्टिसंहारशतसहस्रप्रतिबिम्बनसहिष्णुमहाप्रकाशवपुः शिवतत्त्वम् ।

शक्तिः :-

अस्य जगतः स्रष्टुमिच्छां परिगृहीतवतः परमेश्वरस्य प्रथमस्पन्द एव इच्छाशक्तितत्त्वम् । अप्रतिहतेच्छात्वात् सदेवाङ्कुरायमाणमिदं जगत् स्वात्मना ऽहन्तयाऽच्छाद्य स्थितं रूपम् । यदा परमेश्वरः शुद्धचिन्मात्राधिकरण एवाहमित्यंशे इदमंशमुल्लासयति तथा तस्य प्रोन्मीलितमानचित्रकल्प भावराशिविषय-त्वेनास्फुटत्वादिच्छाप्रधानं सदाशिवतत्त्वम् । अङ्कुरित जगदहन्तयाऽवृत्या स्थितमीश्वरत्वम् । स्फुटी भूते च इदमंशे यदा अहमंशं निषिञ्चति तदा ज्ञानशक्तिप्रधानमीश्वरतत्त्वम् । अहन्तेदन्तयोरभेदप्रतिपत्तिः शुद्धविद्यानां प्रपञ्चतत्त्वम् । यदा तु पुनः प्ररूढभेदभावराशिगतेदमंशस्फुरणे चिन्मात्रगतत्वेन नाहमंशः समुल्लसति भेदाद्वैतवादिनामिवेश्वरस्य यः समुधृततुलापुटन्यायेना-हमिदमिति परामर्शस्तदेव क्रियाशक्तिप्रधानं शुद्धविद्या तत्त्वम् ।

माया :-

स्वरूपेषु भेदप्रथा भेदज्ञानं माया । दुष्करतमवस्तुसम्पादन प्रतिघातापाचिद्रूपे शून्यादौ च प्रमातृतयाऽभिमानं प्ररूढ़ं कुर्वती चिन्मयान्नपि भावान् स्वबलेन हठाद्वा भेदानाभासयन्ती वस्तुनो मौलिकं स्वरूपमन्यथायन् तिरोदधति कलादिक्षित्यन्तानां भावानामुपादानकारणञ्च माया । एतदेव तत्त्वं स्वातन्त्र्यशक्तिनाम्नाप्यागमेश्वभिधीयते ।

पुरुषः :-

यदा परमेश्वरः पारमेश्वर्या मायाशक्त्या स्वातन्त्र्यापरपर्याया स्वस्वरूपं ग्राहयित्वा सङ्कुचिताग्रहकतामश्नुते, तदा पुरुषसंज्ञोऽयमेव मायया मोहितः कर्माणि स्वात्मनो बन्धकानीत्यभिमानः शुभाशुभकर्मनिबद्धः संसारी परमेश्वराभिन्नोऽप्यस्य मोहः परमेश्वरस्य न भवेत् । इन्द्रजालमिवेन्द्रजालिकस्य स्वेच्छयासम्पादितभ्रान्तेः, शुद्धविद्यास्वरूपप्रकाशनशक्त्या स्वेश्वर्यमभिज्ञाय जीवः यदा सच्चिदानन्दघनत्वमानयेत तदा तु बन्धहीन आणवमयीयकार्मेति त्रिविधमलाख्यपाशविहीनः सन् चिदाघनतया मुक्तः परमशिव एव भवति । देहे किं संसरणमिति चेद् देहोऽपि स्वरूपसादृश्य बाल्य- कौमार- यौवन - वार्धक्यादिष्वनुवर्तयन् संसारतीवोत्प्रेक्ष्यते । बुद्ध्यहंकारमनसां तु जन्मान्तरेऽपि संसरणं भवत्येव । अन्यथा योगिभेदसिद्धान्तव्याघातापत्तेः । परमेश्वरस्य सर्वकर्तृत्त्व-सर्वज्ञातृत्व-पूर्णत्व-नित्यत्व-व्यापकत्वानि शक्तयोऽसंकुचिता अपि सङ्कोचग्रहणेन कला, विद्या, रागः, कालः, नियतिरूपया परिणमन्ते ।

कला :-

अस्य पुरुषस्य किञ्चित् कर्तृता हेतुः, प्रतिबद्धं सङ्कुचितं तत्त्वं यया प्रतिबद्धौ जीवः किञ्चिदेवपरोवर्ति घटादिकं ज्ञातुं न पुनर्दूरव्यवहितं वस्तु ।

रागः :-

रागो नाम विषयेष्वभिसङ्गः । अपूर्णमित्यतदेयं ममोपयुज्यते इत्थमहं भूयांसं मा कदाचिदहं निर्धनो भवेयम् इत्येवरूपः ।

कालः :-

कालो हि जागतिकपदार्थानां प्रकाशाप्रकाशात्मकानामवच्छेदकः क्रमो

भूतादिभिन्नोऽपि तत्सदृशः काल एव क्रमः । क्रम एव काल इत्यनर्थान्तरम्। अहमज्ञासिषं जानामि, ज्ञास्यामीत्यहमकर्षं करोमि करिष्यामीति ज्ञानक्रियारूपेण पदार्थान् तथा तथा कलयन् कालोऽवच्छिनत्तीति अवच्छेदकत्वेन क्रमः काल इति वा व्यवह्रियते ।

नियतिः :-

ममेदं कर्तव्यम् , ममेदं न कर्तव्यमिति नियमनस्य कारणं नियतित्त्वम् । इदं स्वर्गादिफलमश्वमेधादिकं मया कर्तव्यम् । नरकादिफलकं ब्रह्महत्यादीनि न कर्तव्यम् । स्वाभीप्सितकर्तव्यस्य नियमनं नियतित्वात् क्रियते । किञ्च नियतादेव कारणाद् नियतं किञ्चित् कार्यं कुत्रचिद् भवति, नान्यथेति सर्वस्यापि नियतकार्यकारणभावस्य नियामिका नियतिरेव । एतत् पञ्चकं पुरुषस्वरूप परकत्वात् पञ्चकञ्चुकमित्य भिधीयते। स्वस्वरूपाव्यतिरिक्तमप्येषां बलेन व्यतिरिक्तमिवाव भासते । एभिः पञ्चककञ्चुकैः पूर्णसंवित्स्वरूपमाच्छाद्य अपूर्णतयाऽवभासते ।

प्रकृतिः :-

महदादिपृथिव्यान्तानां त्रयोविंशतितत्त्वानां मूलकारणं प्रकृतिः । एषैव प्रधानाव्यक्तादिनाम्ना तन्त्रान्तरेषु व्यवह्रियते । एषा च प्रकृतिः सुखदुःख मोहात्मकानां सत्त्वरजस्तमसां प्रकाशक्रियानियमनस्वभावानां साम्यावस्था अविभक्त रूपा, वैषम्ये तु प्रकृतिः संज्ञा । प्रकृतेः सकाशान्महानुत्पद्यते, तच्च महत्वं बुद्धिनाम्नाऽभिधीयते। विकल्पप्रतिबिम्बधारिणी बुद्धिरिदमित्थमित्येवं रूपनिश्चयस्य विधात्री ।

अहंकारः :-

अहङ्करणमहङ्कारः । अहं मूलेति अहं क्रियया ममेदम् , न ममेदमित्य मित्यभिमानस्य साधनमहंकारः ।

मनः :-

मननं मनः, सङ्कल्पविकल्पात्मसाधनं मनः । इदं कुर्याम् , इदं न कुर्यामिति विकल्पस्य मानसकर्मणः संकल्पस्य च साधनं मनः । एतत् त्रयं सम्भूयान्तः करणमित्युच्यते। अन्तर्वेधस्य सुखदुःखादेर्ज्ञानसाधनत्वादेतान्यन्तः

करणानि। शब्द-स्पर्श-रूप-रस-गन्धात्मकानां विषयाणां क्रमेण ज्ञानसाधनानि। क्रमेण वाक्पादपाणिपायूपस्थानि पञ्च कर्मेन्द्रियाणि। शब्दस्पर्शरूपरसगन्धाः सामान्याकारः। तदेव नान्यदित्यवान्तरविशेषरहिताः शब्दाद्यास्तन्मात्रा शब्दवाच्याः। पञ्चभूतानि तु आकाशः अवकाशप्रदः, वायुः सञ्जीवनम् , अग्निर्दाहकः, पाचकश्च, सलिलमाप्यायकं द्रवरूपञ्च, भूमिः धारका गन्धग्राहिका इति। एतत् सर्वं जगत् परमट्टारिकारूपे हृदयबीजे अन्तर्भूतम्। प्रोक्तञ्च -

यथा न्यग्रोधबीजस्य शक्तिरूपो महाद्रुमः।
तथा हृदयबीजस्थं विश्वमेतच्चराचरम्॥

षोडशस्वराणां शक्तिबीजकता :-

तत्र 'अ' एवानुत्तरः प्रकाशः, परमः शिवः। तस्य विसर्गो जायते। अः विसर्ग एव विश्वजनने भगवतः शक्तिः। चिच्छक्तिरेव प्राणिनामाभ्यन्तरे सिंहासनारूढ़ा विराजते। तस्यैव स्वाभिमुखविश्रामावस्था स्वेच्छया स्वातन्त्र्य बलात् ,यथा सा एवानन्दात्मना परिणमते, तथैवानन्दस्य बहिर्मुख तयेच्छाज्ञान क्रियात्मना परिणामः। पूर्वोक्ता अकचटतपयशेत्यष्टवर्गाणां ब्राह्मादि देव्यस्तु पशुदशायां भेदविषये सृष्टिस्थिती, अभेदविषये संहारपरिमितविकल्प पात्रतां जनयन्ति। पतिदशायां तु भेदे संहारमभेदे सृष्टिस्थिती। एवं क्रमेण विकल्पमपसार्य निर्विकल्पं ग्राह्यन्ति। अत एवोक्तम् - शरीरी परमेश्वरः।

"मनुष्यदेहमास्थाय छिन्नास्ते परमेश्वराः"।

प्रत्यभिज्ञाटीकायामपि शरीरमेव घटाद्यपि वा ये षट्त्रिंशत्तत्त्वमयं शिवरूपतया पश्यन्ति, तेऽपि सिध्यन्ति। आत्मीयपञ्चकृत्यकारित्वपरिज्ञानेन स्वशक्त्यापहारता निवृत्तौ स्वातन्त्र्यशक्तिलाभे चित्तं बहिर्मुखतां विहाय चेतन भूमिमधिकृत्य स्वस्मिन् चैतन्यं भावयित्वा पूर्णो भवति। अत एवोक्तमुत्पलदेवेन निजस्तोत्रे --

वर्तन्ते जन्तवोऽशेषा अपि ब्रह्मेन्द्रविष्णवः।
ग्रसमानास्ततो वन्दे देवविश्वं भवन्मयम्॥४०

यच्चानन्दलाभे देहाद्यनात्मग्रामसत्वेऽपि चिदानन्दज्ञानस्य दार्ढ्याद् मल्लग्रामादिभूयसा व्यपदेश इव प्राणान् धारयतोऽपि मुक्त एव। यथोक्तं

स्पन्दस्तोत्रे-

इति वा यस्य संवितिः क्रीडात्वे नाखिलञ्जगत् ।
स पश्यन् सततं युक्तो जीनन्मुक्तो न संशयः ।।[४१]

एतेनेदं सुस्पष्टं प्रतिभाति यद् भक्तिमतां सामर्थ्यशालिनां जगत्परिवर्जनं मुक्तये नावश्यकम् , अपि च त्वखिलं जागतिकं प्रपञ्चं निमीलयन्नपि स्वशक्तिवलमवाप्यं समस्तं जगदपि स्वात्मभावेन जानीयाच्चेन्महेश्वरत्व मक्षुण्णमेव । तदुक्तमीश्वरप्रत्यभिज्ञायाम् -

सर्वो ममायं विभव इत्येवं परिजानतः ।
विश्वात्मनो विकल्पानां प्रसरेऽपि महेशिता ।।[४२]

अनेन' स्वात्मनि चिदानन्दसमावेशः समानेयः । कथं तल्लाभो भवेदिति चेदुक्तं प्रत्यभिज्ञाहृदये - "मध्यविकासाच्चिदानन्दलाभः" इति । अथवा मध्यमानाड्या विकासाच्चिदानन्दस्य लाभ इत्यपि सूत्रार्थः । इन्द्रियणां बहिर्मुखतया एकाग्रता सुदुर्लभा महता धैर्येण प्रत्यगात्मनि निवेशेऽमरपदं लभ्यते । तदुक्तं कठबल्याम् --

पराञ्चि खानि व्यतृणत्स्वयम्भू-
स्तस्मात् परां पश्यन्ति नान्तरात्मन् ।
कश्चिद्धीरः प्रत्यगात्मानमैक्ष-
दावृत्तचक्षुरमृतत्त्वमिच्छन् ।।[४३]

शक्तेर्विकासोऽन्तर्निगूढाया शक्तेः क्रमं परिहाय सकलेन्द्रियचक्र विस्फोरणेन अन्तर्लक्ष्यो बहिर्दृष्टिनिमेषोन्मेषवर्जितः इति खेचरीमुद्रया बहिः प्रसरणं विकासशक्तेः सङ्कोचविकासावुन्निमिषतसूक्ष्मप्राणशक्त्याऽज्ञानचक्रं भेदयित्वोर्ध्वकुण्डलिनीपदप्राप्तौ पूर्णविश्रामदशानुभवः । अधः कुण्डलिन्यां च षष्ठवक्त्ररूपायां सर्वतः सञ्चिन्त्य शक्तितन्मूलतदग्रतन्मध्यभूमिस्पर्शावेशः । एषः शक्तेः सङ्कोचविकासक्रमः ।

भोगशास्त्रे भोगस्यापि पञ्चमपुरुषार्थत्वम् :-

भोगस्य शक्तिपर्यायत्वादेव पञ्चमपुरुषार्थमपि योगतन्त्रेषूद्घुष्टं

यथार्थतामेति । तथा ह्युक्तम् -

भोगमोक्षविरोधोऽत्र साधने नास्ति निश्चितम् ।
भोगेन लभते मोक्षं नरोऽपि विद्ययानया ।।[४४]

स्वमाया शक्त्या यदाऽसौ शक्तिर्घटपटादिजागतिकपदार्थेष्वभिमानं ग्राह्यति । तदा ज्ञानसङ्कल्पाध्यवसायपरामर्शविमर्शरूपतया मायाप्रमातृभिरभिमन्यते । वस्तुगत्या त्वसावेकाऽक्रमा अनन्ता चिद्रूपा च । यथोक्तमीश्वर प्रत्यभिज्ञायाम्-

या चैषा प्रतिभा तत्तत्पदार्थक्रमरूषिता ।
अक्रमानन्ताचिद्रूपः प्रमाता स महेश्वरः ।। [४५]

अन्यच्च -

मायाशक्त्या विभोः सैव भिन्नसर्वाद्यगोचरा ।
कथिताज्ञानसङ्कल्पाऽध्यवसायादिनामभिः ।।[४६]

अथ च -

सा स्फुरता महासत्ता देशकालाविशेषिणी ।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः ।।[४७]

तस्याः सहजसंविद्देवतायाश्चक्रेऽधिष्ठाने स्वतः प्राप्यते । सृष्टिसंहारयोः प्रभुत्वं लभ्यते । यदुक्तं स्पन्दे --

यदा त्वेकत्र संरूढ़स्तदा तस्य लयोद्भवौ ।
नियच्छन् भोक्तृतामेति ततश्चक्रेश्वरो भवेत् ।।[४८]
एकत्रारोप्यते सर्वं ततोऽन्येन न पीडयेत् । [४९]
देहप्राणसुखादिभिः प्रतिकलं संरूध्यमानो जनः ।
पूर्णानन्दघनामिमां न चिनुते माहेश्वरीं स्वां चितिम् ।
मध्ये बोधसुधाब्धिविश्वमभितस्त्फेनपिण्डोपमं
यः पश्येदुपदेशतस्तु कथितः साक्षात् स एकः शिवः[५०] ।।

एक एव शिवो निजानन्दतयाऽवस्थितोऽप्यनन्ताभिः शक्तिभिर्नाना रूपाकारधारकत्वेन विलसन् स्वस्मिन् प्रतिष्ठितः स्वेन महिम्ना लोके प्रतिष्ठां गतस्स्वयमेवाखिलव्यवहारान् भजत इति निरूत्तरं तस्य नास्त्युत्तरं यस्मात्

तच्छिवतत्त्वम् । तथा च --

अप्लुतशक्तिमानित्यं सर्वाकारतया स्फुरन् ।
पुनः स्वेनैव रूपेण एक एवावशिष्यते ॥[५१]

परमशिवस्य स्वभावभूत एकस्वरूपः सर्वतोमुखतयाऽलुप्तशक्तितया सर्वाकारतया स्फुरितं शक्नोतीति परं कारणस्य परमेश्वरस्य परात्परत्वमेकत्वेऽपि बहुधात्वं कल्पयितुं शक्यत एव । अत एव शक्तिरहितस्य शिवस्याकिञ्चित्कर्तृकत्वं तत्सहितस्य सर्वकर्तृत्वं विश्वमयत्वं युगपदेव विश्वातीतत्वञ्च सर्वं सुस्थमिति ।

तत्त्वसाक्षात्कारे गुरोर्महत्वम् :-

एवं शिवशक्तिसामरस्यार्थमात्मनः संविद्रूपपरपदप्राप्त्यर्थं सद्गुरुशरणं परमं सहायकमुपकारकञ्च । एवं गुरुकृपां विना चित्तविश्रान्तिः सुदुर्लभा गुरुरपि योगतत्त्वसाक्षात्कारेण कृतात्मसाक्षात्कार एव । तदुक्तं -

संवित्क्रियाविकरणोदयचिद्विलासो ।
विश्रान्तिमेव भजतां स्वयमेव भाति ॥
ग्रस्ते स्ववेगनिचये पदपिण्डमेकं
सत्यं भवेत् समरसं गुरुवत्सलानाम् ॥

गुरुविषयेऽन्यत्रापि :-

ज्ञानहीनो गुरुस्त्याज्यो मिथ्यावादीविडम्बकः ।
स्वविश्रान्तिं न जानाति परेषां किं करोति सः ॥[५२]
शिलया किं परम्पारं शिलाजालं प्रतार्यते ।
स्वयं तीर्णो भवेद्योऽसौ परन्निस्तारयत्यलम् ॥[५३]

अत्र दर्शने गुरुतत्त्वादधिकं शिवशासनातिरिक्तं वा किमपि तत्त्वं नास्ति । सद्गुरुरेव करुणाखण्डनिपातेन शिशोः शिवमयस्य पाशाष्टकं छित्वा सम्यगानन्दजनकमात्मतत्त्वं क्षणाद् बोधयति । अत एतादृशो गुरुः सर्वथा प्रणम्यः । सद्गुरुकृपां विना स्वरूपज्ञानं सुदुर्लभम् । का कथा तत्र सिद्धीनाम् । अतः शब्दब्रह्मोपासनायाः प्राक् क्रियामार्गस्य सम्यग् लाभाय शक्तिज्ञानं सद्गुरूपदेशाल्लब्धव्यम् । तत्तत्कर्मोपदेशकानि शास्त्राणि गुरुमुखादेव

लभ्यन्ते । विवेकसम्भवज्ञानं शिवज्ञानस्य प्रकाशकं बाह्यभावकामनावर्जनं विना पशुभावेन वीरभावातिक्रमणं दिव्यज्ञानरूपस्याध्यात्मज्ञानस्य प्राप्तिराकाश कुसुमोपमैव । अतः सर्वसिद्धिसोपानीभूतमानवजीवनस्य सार्थक्याय सर्वविधसिद्धिलाभाय चतुर्विधपुरुषार्थसंसाधनाय नित्यज्ञानप्रसाधनाय ज्ञानिजनसंसर्गोऽपेक्षितः । एतदर्थं योगतन्त्रप्रक्रिययैव श्रमं विधाय सद्गुरूपदेशं प्राप्य यत्नः कर्तव्यः । शक्तेरूपासना येन केनाप्युपायेन कर्तव्या । केवलमहं ब्रह्मास्मि, अहं ब्रह्मज्ञोऽस्मि, सर्वं खल्विदं ब्रह्म इत्यादिवाक्यघोषपरम्परया न कदाचिदप्यात्मसिद्धिर्भवितुमर्हति । नहि बाह्याचारप्रदर्शनेन कापि सिद्धिर्भवति । अतो लोके सेवाप्रवीणाऽपि चतुष्पदा रासभादयः सिद्धा इति न मन्यन्ते । सततं संरक्षणे निवासिनस्तृणपर्णोदकाहारा हरिणादिमृगास्तापसा न मन्यन्ते । शीतवातातपसहाः, भक्ष्याभक्ष्ययोः समा अपि सूकरादयो व्रतिनो नोच्यन्ते । आकाशचारिणो विहगाः, जलनिवासिनो मण्डूकमत्स्यग्राहप्रभृतयो व्रतिनो नामन्यन्ते । तथैव बाह्याचारनिविष्टाः पण्डिता अपि भावदोषदृष्ट्या कर्मदोषग्रस्ता असद्गतिं प्राप्नुवन्ति । कौटिल्यालस्यसंग्रहवर्जिताः श्रद्धाभक्तिसमन्विताः भावनिष्ठाः पुरुषाः सद्गति प्राप्नुवन्ति, शरीरजकर्मदोषेणैव नरोऽपि स्थावरतां प्रपद्यते । इहाचरितदोषेण पूर्वजन्मकृद्दोषेण वात्मदोषेणदुष्टाः प्राणिनो योनिविपर्ययं प्राप्नुवन्ति । एतावता प्रघट्टकेनैतदेव साध्यते यच्छशरीरिकाचारसम्पन्ना अपि सद्गतिविपर्ययं लभन्ते । अत्र को हेतुर्भवितुमर्हति ? योगतन्त्रानुसारमत्रात्म शक्तिज्ञानवैमुख्यमेव मुख्यं कारणम् । अतः शक्तिमुपास्य श्रद्धाविद्योदये जाते योगतन्त्र शास्त्रोक्तपशुवीरदिव्यभावप्राप्तिक्रमेणोत्तमोत्तमपदप्राप्त्याऽऽत्मप्राप्ति रूपमहायोगो लभ्यते । इति शम् ॥

पादटिप्पणी

१.पाणिनि अष्टाध्यायी, माहेश्वरसूत्राणि
२.पा.सू.४.३.७४
३.पाणिनीयशिक्षा
४. लघुशब्देन्दुशेखरः संज्ञाप्रकरणम्
५. लघुशब्देन्दुशेखरः
६.नन्दिकेश्वरकाशिका
७.नन्दिकेश्वरकाशिका
८. सङ्केतपद्धतिः१७
९.वैयाकरणसिद्धान्तकौमुदी१४६४
१०.तत्रैव १८४१
११.हठयोगप्रदीपिका ३/१
१२.स्वच्छन्दतन्त्रम्४/३४०
१३.कूर्मपुराणम् उ.भा.११
१४.देवीभागवतम्
१५.योगवाशिष्ठे
१६.कौलोपनिषद्
१७.श्रीतन्त्रालोकः१/१५६
१८.शिवदृष्टिः७/१०९-१०
१९. स्वप्रवृ.कल्लटः
२०.श्रीतन्त्रालोक.वि.१/३२
२१.श्रीतन्त्रालोक वि.१/४५
२२.नेत्रतन्त्रम्२६
२३.श्रीनेत्रतन्त्रम् ८५
२४.ईश्वरप्रत्यभिज्ञा ४/२
२५.विरूपाक्षपञ्चाशिका
२६.प्रत्यभिज्ञाहृदयम् १.

२७.दुर्गासप्तशती ५/७८
२८.योगिनीहृदयम्
२९.श्रीतन्त्रालोकम्
३०.प्रत्यभिज्ञाहृदयम्
३१.स्पन्दकारिका३/२
३२.श्रीतन्त्रालोकः
३३.स्पन्दकारिका४५/१२४
३४.त्रिपुरमहिम्नस्तोत्रम् २७
३५.वाक्यपदीयम् ब्रह्मकाण्डम् १.१
३६.वाक्यपदीयम् ब्रह्मकाण्डम् १.१२०
३७.सौन्दर्यलहरी १
३८.श्रीतन्त्रालोकः३
३९.वि०प०नि०प०२१
४०.उत्पलस्तोत्रम्
४१.स्पन्दकारिका ३/३
४२.ईश्वरप्रत्यभिज्ञा४/१/१२
४३.कठोपनिषत् अ०२प्र०बल्ली १
४४.कङ्कालमालिनी पट०४/१८
४५.ईश्वरप्रत्यभिज्ञा ७/१
४६.ईश्वरप्रत्यभिज्ञा१/५/१८
४७.तत्रैव १/५/१४
४८.स्पन्दकारिका४/२१
४९.स्पन्दकारिका४/१४
५०.प्र०हृ०पृ०५०
५१.सिद्धसिद्धान्तपद्धतिः
५२.सिद्धसिद्धान्तपद्धतिः ५/पृ.१११
५३.सिद्धसिद्धान्तपद्धतिः५/पृ.१११

द्वितीयोऽध्यायः

आचार्यनन्दिकेश्वरः तस्य काशिका च

द्वितीयोऽध्यायः

आचार्यनन्दिकेश्वरः तस्य काशिका च -:

वेदवेदाङ्गदर्शनादिसम्प्रदाये वर्णितानि यानि शास्त्राणि तेषां समेषां तात्पर्यं भौतिकं साधनामयजीवनपूर्वकं नैतिकादर्शं स्थापयन् चतुर्षु पुरुषार्थेषु मोक्षपुरुषार्थप्राप्तिरेवोद्देश्यम्। इतोऽपि नाना शास्त्रपरम्परायां बहव आचार्यारपि स्व स्व रुचिवैचित्र्यानुसारेण चिन्तनमपि कृतवन्तः। तेषु व्याकरणपरम्पराऽपि अतीव गौरवशालिनी यतो हि अस्यामपि परम्परायां लिपिरुचिरारभ्य आत्मतत्त्वान्वेषणकर्तारः शोभन्ते। यतो हि वेदस्य परमार्थतत्त्वं परब्रह्मावाप्तिरेव तदङ्गतया एतेषामङ्गानमपि परिपूर्णताऽपि सारूप्यावाप्तिरेव। उद्धर्तुकामः सानकादिसिद्धानेद्विमर्शे शिवसूत्रजालम् इति पङ्क्तिपावनकर्तृषु नन्दिकेश्वरस्यापि शब्दशास्त्रे महदद्भुतं स्थानं वरीवर्ति। तेषं चिन्तनं यथा सामर्थ्यं प्रस्तौमि।

तन्त्रागमसम्प्रदाये अद्वैतशैवदर्शनेतिहासे चाचार्यनन्दिकेश्वरकृतं माहेश्वरसूत्राणां दार्शनिक व्याख्यारूपं नन्दिकेश्वरदर्शनं प्रथमं स्थानमलङ्करोति। नन्दिकेश्वरविषये परम्परागतमिदं वृत्तमुपमन्युकृतायां नन्दिकेश्वरकाशिकाटीकायां समुपलभ्यते। नन्दिकेश्वरव्याघ्रपादादीनामुद्धर्तुकामः शिवो डमरूनिनाद व्याजेन पाणिन्यष्टाध्यायिप्रारम्भोलभ्यमानं चतुर्दशसूत्रात्मकं तत्त्वमुपादिदेश। सूत्रजातस्य तत्त्वार्थं बोद्धुमसमर्थाः व्याघ्रपादादयो नन्दिकेश्वरं त्वर्थं विस्पष्टार्थं प्रार्थयामासुः। स च सूत्रनिक्षिप्तं रहस्यार्थं सप्तविंशति कारिकाभिरुपदिदेश।

आचार्यनन्दिकेश्वरेण माहेश्वरचतुर्दशसूत्राणां व्याख्यानं शैवाद्वैतस्थापनार्थं शब्दशास्त्रप्रवृत्यर्थञ्च प्रकारद्वयेन कृतम्। तत्र एकैव कारिकापाणिन्यादि वैयाकरणानां कृते यथाह —

अत्र सर्वत्र सूत्रेषु ह्यन्त्यं वर्णचतुर्दशम्।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये ॥[१]

शेषास्तु शैवाद्वैतप्रतिपादनपरा आह -

आचार्यनन्दिकेश्वरकाशिकायाः प्रामाण्यं समयश्च :-

आचार्यनागेशभट्टो महाभाष्ये स्वीयोद्योते ऋऌक् इति सूत्रव्याख्यावसरे

प्राह —यद्यपि एतच्चतुर्दशसूत्री विवृत्तौ नन्दिकेश्वरकृतकाशिकायामनेकेषामृषीणां नानाविधार्थजिज्ञासायां शिवेन सर्वजिज्ञासानिवृत्तये एषा ढक्कानिनादेन प्रकाशितेत्युक्तमिति। इदमनुपपन्नम् । तथापि पाणिन्युद्देश्यकं फलमस्ति न वेति एतत्तात्पर्यम् । अन्त्यवर्णचतुर्दशं तु पाणिन्यूद्देश्येनैवोपदिष्टमित्यपि तत्रैव स्पष्टम् ।

अनेन नन्दिकेश्वरापरनाम नन्दिकेश्वरकृतकाशिका प्रामाण्यं स्वीक्रियते । नन्दिकेश्वरं पाणिनेरूपदेष्टा मनुते । पतञ्जलिरपि स्वीय महाभाष्ये चतुर्दशसूत्र्या अद्वैतशैवदर्शनानुसारिणीं नन्दिकेश्वरकृतां व्याख्यां प्रामाणिकीं मन्वानः सोऽयमक्षरसमाम्नायो ब्रह्मराशिः इत्युक्तवान्[२]। इदं मतं कैयटकृतेन व्याख्यानेनापि समर्थ्यते । ब्रह्मतत्त्वमेवशब्दरूपतया प्रतिभाति।

आचार्यनन्दिकेश्वरस्य काशिकाप्रणयने प्रयोजनम् :-

नृत्तावसाने नटराजराजो ननादढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥[३]

निखिलब्रह्माण्डनायकः परमतत्त्वभगवच्छिवः सनकसनन्दनसनत्कुमारा दीनृषीन् नन्दिकेश,पतञ्जलि - पाणिनि - वशिष्ठादीन् मुनीनुद्धर्तुकामो ढक्का (डमरू) ननाद व्याज्येन चतुर्दशसूत्र्यात्मकं तत्त्वमुपदिदेश ।

अस्य तत्त्वस्य समाम्नायस्य प्रयोजनं ब्रह्मज्ञानमित्युच्यते । उक्तञ्च -

वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते ।
तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते ॥

इति वार्तिकस्य भाष्ये सोऽयमक्षरसमाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः । सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति । मातापितरौ चास्य स्वर्गे लोके महीयेते इति ।[४]

अस्य सूत्रजालस्य तत्त्वार्थं नन्दिकेश्वरः जानाति, अतः तं गुरुं मत्वा सर्वे मुनीन्द्राः पृष्टवन्तः तेषु पृच्छ्यमानेषु स चतुर्दशसूत्रजालस्य तत्त्वं अध्यात्मपरतया, सृष्टिपरतयोपपादितं, नृत्तावसानेति— । नटराजराजः भगवानशङ्करः । नर्तनावसाने सनकादिसिद्धान् उद्धर्तुकामः नवपञ्च (चतुर्दश) वारं ढक्कां नादितवान् । अहं नन्दिकेश्वर एतत् सूत्रसमूहं विमर्शे इत्यर्थः ।

माहेश्वरसूत्रभूतायाः नन्दिकेश्वरकाशिकायाः अष्टाध्याय्याश्च महत्वम् :-

ननु चतुर्दशसूत्र्याः इत्थमनिवर्चनीयमहत्वशालिन्याः किं फलं प्रसूतमिति चेत् विचार्यते यदर्थं सा उपदिष्टा तत् प्रसूतवत्येव । तथाहि नन्दिकेश्वरकाशिकायामादौ चतुर्षु सूत्रेषु आध्यात्मपरत्वमर्थं विहितं येनाद्वैतं सिध्यति । ततः सृष्टिप्रक्रिया उक्ता, तत्र प्रकृतिपुरुषयोः विवेचनम् । पञ्चमहाभूतानि पञ्चकर्मेन्द्रियाणि तथा ज्ञानेन्द्रियाणि प्रतिपादितानि मनबुद्धिरहङ्कारा: कथिताः । ततः पञ्चतन्मात्राः विचारिता इति तत्त्वज्ञानेनैव कैवल्यप्राप्तिरिति उक्तञ्च -

पञ्च विंशतितत्त्वज्ञो यत्र कुत्राश्रमे वसन् ।
जटी मुण्डी शिखी वापि मुच्यते नात्रसंशयः ॥[५]

किं बहुना नन्दिकेश्वरकाशिकायां शब्दस्य ब्रह्मणः स्वरूपं व्यवहारदशायां कीदृशी व्यवस्था इत्युच्यते ईश्वर अनादि जीवोपाध्याश्रित मायापरिणाममुपेत्य हृदि पश्यन्त्याख्यमुपेत्य विशुद्धचक्रे मध्यमाख्यमुपेत्य पश्चाद्वक्त्रे वैखर्यास्थमवाप्यवेदादिरूपो भवतीत्यर्थः । श्रुतिरपि संगच्छते यत् वागेव विश्वाभुवनानि जज्ञे [६] । सूक्ष्मा वागेव विश्वाऽकारेण परिणमते इति बोध्यम् । उक्तञ्च -

सर्वपरात्मकं पूर्वं ज्ञप्तिमात्रमिदं जगत् ।
ज्ञप्तेर्वभूवपश्यन्ती मध्यमावाक् ततः स्मृताः ॥
चक्रे विशुद्धचक्राख्ये वैखरी सा मता ततः ।
सृष्ट्याविर्भाव माध्यात्ममध्यमावाक् समायुतम् ॥[७]

तत्फलभूताश्चैह लौकिकमपि महन्महनीयं फलम् । पाणिनिमहामुनेरन्तः करणे प्रकटितमष्टाध्यायीरूपम् । यस्यां चाष्टाध्याय्यामुदितायां सर्वोऽपि अन्यो व्याकरणसम्प्रदायो विलुप्त बभूव । सवितुरुदिते नक्षत्रगण इव । यां चाधीयमानाः पाश्चात्यवैदिका अपि विद्वान्सः एक स्वरेणोच्चैस्तद्घोषयन्ति । यदियमष्टाध्यायी मानवमस्तिकस्य चरमादर्श इति ।

जगन्मान्येन श्रीमहर्षिणा पतञ्जलिना उच्यते - सोऽयमक्षरसमाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिरिति । पुष्पितत्त्वञ्च वृद्धिरादैच् प्रभृतिसूत्रद्वारा, फलितत्त्वञ्च शब्दसाधुत्वसम्पादनद्वारा । अत्र चतुर्दशसूत्री

न चतुः सहस्रीसूत्राणां वर्तते । तत्र संज्ञापरिभाषाभेदभिन्नानि षड्विधानि सूत्राणि सन्ति । अनुवृत्तिक्रमोचातीव वैज्ञानिकीं पद्धतिं द्योतयतः। वृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालः न चान्तं जगाम । यं व्याकरणमहोदधिम्। तमेव खलु विन्दुमिव कृत्वा महता कौशलेन सूक्ष्मातिसूक्ष्मेकिकया पूरितवान् तत्राष्टाध्याय्यां गगर्य्याम् । किं किं लोके व्यवह्रियते ? क्व क्व को विधिः ? क्व यण् , क्व च गुणः, क्व च वृद्धिः, क्व च सवर्णदीर्घः, क्व क्व च जश्त्वरुत्वयत्वविसर्जनीयत्वादयः? इति परितः सर्वं विविच्य विविच्यैव सूत्राणि प्रणयति स्म । क्वचिदपि एकोऽनुस्वारः एका मात्रापि निष्प्रयोजनतां न भजतीति, महुर्मुहुः प्रशंसति भगवान् पतञ्जलिः । उक्तश्च -

सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात् । इति वर्णेनाप्यनर्थकं न भवितव्यमिति च ।

असंख्याताः शब्दा अनया साधयितुं शक्यन्त इति संस्कृत भाषायाः एव न अपितु भाषान्तराणामपि महद्दुपजीव्यभूताया अस्या अष्टाध्याय्याः पठनं पाठनं महेश्वरं भूयो भूयो सम्प्रार्थये, स्मार्यते च -

यद्यपि बहुनाधीषे तथापि पठ पुत्र ! व्याकरणम् ।
स्वजनः श्वजनो मा भूत सकलं शकलं सकृच्छकृत् ।।

अइउण् ।१। इति सूत्रस्याध्यात्मपरत्वकथनम् :-

अकारो ब्रह्मरूपः स्यान्निर्गुणःसर्ववस्तुषु ।
चित्कलामिं समाश्रित्य जगद्रूप उणीश्वरः।।

अकारः परमेश्वरः, इः = मायाशक्तिम् आश्रित्य, उः व्यापकः सगुणः, ण् = आसीत् । अतति सर्वं जगद् व्याप्नोतीति विग्रहे अत धातोरौणादिको ड प्रत्यय: । अथवा अवति पालयति सर्वं जगदिति विग्रहे , अवरक्षणे धातोर्डप्रत्ययः। डित्वसामर्थ्याट्टिलोपः । एवं परमात्मा परः अ शब्दो निष्पन्नः । एति शक्तिरूपेण सर्वत्रानुगता भवतीति इः = माया इण् गतौ इत्यतः कर्तरि क्विप् । आगमे शास्त्रस्यानित्यत्वान्न तुक् । अथवा औणादिको डिप्रत्यय एव । अवति विश्वं पालयति इति उः = विष्णुः , अवतेर्डुप्रत्ययः । यथाभ्युक्त

व्युत्पत्तिभ्याम्। अ उ शब्दयोः समानार्थकत्वमेव लभ्यते। तथापि लक्षणादिना अ शब्दस्य निर्गुणत्व परत्वे न किञ्चिद् बाधकम्। अध्यात्मपक्षे ण् इत्यादयोऽनुबन्धाः निरर्थकाः एव। नत्वर्थवन्तोऽसम्भवात्। किन्तु नन्दिकेश्वरेण एवमेव काशिकायामुक्तम् -

अत्र सर्वत्र सूत्रेषु ह्यन्त्यं वर्णचतुर्दशम्।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये ॥[१०]

इत्यत्र पाणिन्यादीनां कृते एवानुबन्धानामुपदिष्टत्वाच्च। एवञ्च ण् इत्यस्य आसीत्, क् इत्यस्य अदर्शयत् इत्याद्यर्थाः काशिकाकारैरुक्ताः, अनुभवमात्रगोचरा एव। सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेनापि इति माहेश्वराणि सूत्राण्यणादिसंज्ञाऽर्थानि। एषामन्त्या इतः।[११] एतेन ज्ञायते अनुबन्धाः पाणिन्याद्युद्देश्यका एव। अस्य सूत्रस्योक्तार्थे इयं शिष्टोक्तिरपि मानम्।

अकारो ज्ञप्तिमात्रं स्यादिकारश्चित्कला मता।
उकारो विष्णुरित्याहुर्व्यापकत्वान्महेश्वरः ॥[१२]

ऋॡक् इति सूत्रस्याध्यात्मपरकं निरूपणम् :-

ऋ ॡ क् सर्वेष्वरो मायां मनोवृत्तिमदर्शयत्।
तामेव वृत्तिमाश्रित्य जगद्रूपमजीजनत् ॥[१३]

ऋः परमेश्वरः, ॡ= मायाख्यां मनोवृत्तिम्, क् = अदर्शयदित्यर्थः। उक्तञ्च - ऋॡक् = सर्वेश्वरादयः। अत्र ऋच्यते = स्तूयते इति आ। ऋच् धातोर्डः। लाति = आदत्ते प्रलयकाले सर्वं जगत् आत्मनि प्रविलापयति इति विग्रहे, लाधातोर्डृप्रत्यये कृते ॡशब्दो निष्पद्यते। छान्दसत्वात् ङीबभावः। एवञ्चात्र ऋपदार्थः परमात्मा ॡ इति तस्य माया रूपा वृत्तिः। ननु सर्वं वेदान्तेषु परमेश्वर एक इति निश्चितत्वान्मायाभिर्चित्कलां समाश्रित्य जगद्रूपोऽभूत्। इत्युक्तेरद्वैतहानि स्यादित्याशङ्कायामाह-

वृत्तिवृत्तिमतोरत्र भेदलेशो न विद्यते।
चन्द्रचन्द्रियोर्यद्वद् यथा वागर्थयोरपि ॥[१४]॥

ऋः परमेश्वरः इत्यत्र ऋतं सत्यं परब्रह्मपुरुषं कृष्णपिङ्गलम् इति श्रुतिरपि - प्रमाणम् । श्रुत्यन्तरंमपि - सोऽकामयत् बहुस्यां प्रजायेय इति । श्रीतन्त्रेऽपि ममचाभून्मनोह्वपं ऌकारः परमेश्वर इति ।[१५]

स्वेच्छया यस्यचिच्छक्तौ विश्वमुन्मीलयत्यसौ ।
वर्णानां मध्यमं क्लीबम् ऋ,ऌ वर्णद्वयं विदुः ॥[१६]

एओङ् सूत्रास्याध्यात्मदृष्ट्या निरूपणम् :-

ए ओ ङ् । ननु अ इ उ ण् इत्यादिसूत्रे परब्रह्मपरमेश्वरः इम् मायावृत्तिं समाश्रित्य उः विष्णुः तं जनयामास, इत्युक्ते जन्य जनकभावेऽद्वैत हानिः स्यादित्याशंकायां तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविष्टमिति श्रुतिमाश्रित्याह -

ए ओ ङ् मायेश्वरात्म्यैक्यविज्ञानं सर्ववस्तुषु ।
साक्षित्वात् सर्वभूतानां स एक इति निश्चितम् ॥[१७]

अत्र जन्यजनकत्वञ्च स्वस्यैव जगद्रूपेणवर्तमानत्वात् इति नाद्वैतहानिः ।

अः अक्षरात्मकः इ इति माया युक्तः सन् प्रज्ञानस्वरूपः प्रज्ञानात्मा एव शब्देनोच्यते । एति सर्वं जानाति विग्रहे 'इण् गतौ' इति धातोर्विच् प्रत्ययः । अकारोकाराभ्यां निष्पन्नप्रणवरूपेणोकारेण सगुणनिर्गुणयोरैक्य बोधितेनैव दृष्टान्तेन सर्वत्रैक्य बुद्धौ द्वैतनाशो ध्वनितः । समष्टिव्यष्टिभेदेन पूर्णवर्णयुत् द्वितीयस्य पुनः पूर्ववर्णयुत् तृतीयस्य च समन्वयबोधमेतत् सूत्रम् । वटवीजन्यायेन च पूर्वसूत्रद्वयजनितं वर्णपञ्चकमेव सकलजगत्कारणमिति प्रागुक्तम् । एओङ् इति सूत्रवर्णानामपि तस्मादेव सम्भवः । समष्टिव्यष्टिभेदेषु पूर्ववर्णयुत् द्वितीयस्य, पूर्ववर्णयुत्तृतीयस्य च संयोगजनमिदं सूत्रम् । समन्वयबोधनमप्येकत्वेनोक्तम्।

उक्तञ्च - शृणुत्वं सावधानेन चतुर्णामपि साम्यता ।
वेदानां च महाभाग चतुष्काणामिहोच्यते ॥
ब्रह्मशब्देन यत् वस्तु तत्प्रज्ञामुदीरितम् ।
प्रज्ञानं ब्रह्मास्माद्धि तस्माद्ब्रह्मास्यमहं ततः ॥
तदब्रह्मसर्वसाक्षित्वात् तत्त्वमस्येव तत्त्वतः ।
अन्यत्ववारणार्थाय ह्ययमात्मेत्यथर्वणि ॥१।[१८]

ऐऔजितिसूत्रे जगत्कारणत्वनिरूपणम् :-

स्वात्मभूतस्य परमेश्वरस्य जगत्कारणत्वमुच्यतेऽत्र -

ऐ औ च् ब्रह्मरूपः सन् जगत् स्वान्तर्गतं ततः ।
इच्छया विस्तरं कर्त्तुमाविरासीन्महामुनिः ॥१४॥[१९]

इति कारिकया स्वान्तर्गतं जगद्विस्तारयितुमिच्छुः ऐ आदिशक्तियुतोऽक्षरः परमात्मा ऐकारत्वमौकारत्वं च लेभे । दीर्घाकारस्य दीर्घ एकारस्यैव योगो ऐकारः । एवमेवदीर्घाकारोकारयोर्योगे औकारत्वं प्रतिपादितम् । तथाहि अ +इ इत्यत्र ए इत्यस्य सम्पन्ने पुनराकारेण मेलने ऐ इति बोध्यम् । एवमेव अ + उ इत्यत्र ओ इति जाते ततः दीर्घाकारेण मेलनेन औ इति निष्पद्यते । अत्र यः प्रज्ञानात्मा माया शंवलितः स औकारो यः स आ उ इत्याविर्भावः । उक्तञ्च - उकारज्ञानसंयोगात् सर्वसम्भूतिरिष्यते इति ।[२०] अत्र ह्रस्व दीर्घभेदाच्चतुर्दशस्वराणामेव कीर्तनम् । यथा अ, इ, उ इति ह्रस्वदीर्घभेदात् षट् । ऋ लृ इति भेदद्वयेन चत्वारः । तथा ए ओ ऐ औ इति कृत्वा चतुर्दशस्वराः सन्ति । इत्यनेन चतुर्दशभुवनानि जातानि । उक्तञ्च -

तत्त्वमत्रमहेशानि मम रूपं त्वमेव हि ।
चतुर्दशात्मकं चक्रं तवचक्रमितीरितिम् ॥
त्रयोदशात्मकं तुर्यमावयोर्मन्त्रात्मिके ।
उच्छूनकाले विन्द्वात्मास्माददक्षरसम्भवः ।
विन्दुस्फोटेन मात्रेण वर्णानां च समुद्भवः ।
तस्मादाकाश मुख्यानि भूतानि समजायत ।
विन्दुश्रीचक्रराजस्य परब्रह्मात्मकं त्विति ।
चतुर्दशात्मकं पश्चाच्चक्राकारेण सम्भवः ।
उत्पन्नभुवनान्यत्र चतुर्दश चतुर्दश ॥[२१]

हयवरट्, लण् सूत्राभ्यां भूतपञ्चकनिरूपणम् :-

हयवरट्लण् अनयोः सृष्टिप्रक्रिया उक्ताऽस्ति । अत्र पूर्वकथितमकार इ मायामाश्रित्य कया रीत्या व्यापको भवति इति जिज्ञासायामत्र भूतपञ्चकसृष्टिः प्रतिपाद्यते । तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः आकाशाद्वायुः

वायोरग्निरग्नेरापोऽद्भ्यः पृथिवीचोपपद्यते ।[२२] इति श्रुतेरेतस्मात्परमेश्वरात् भूतपञ्चकमाकाशादिकं प्रपञ्चकारणमासीत् । तथा हि जिहते गच्छन्ति प्राणिनो यस्मिन्निति हम् आकाशम् । ओहादङ् धातोर्ड । याति गच्छति इति यं वायुतत्त्वम् । या प्राणने इति धातोर्डः । वाति निम्नं गच्छति वं जलम् । वा गतिगन्धनयोर्डः । राति देवेभ्यो हव्यं ददाति इति रम् । अग्नितत्त्वम् । रादाने इति धातुः । ड प्रत्यययोजना तु सर्वत्र विधेया । लाति बीजानि आदत्ते इति लं पृथिवी तत्त्वम् । ला आदाने इति धातुः । तथापि व्याकरणशास्त्रेऽनुग्रहायात्र आकाशाद्वायुरिति श्रुत्युक्तिः सृष्टिक्रमे समाहतो भगवता महेश्वरेण, तथापि पाठक्रमादार्थक्रमो बलीयान् इति तत्त्वमाश्रित्य तथोपदेशः न कृतः । तथा न किमप्यनुपपन्नम् । उक्तं च-

भूतपञ्चक्रमस्तस्माद्ध य व र ट् महेश्वरात् ।
व्योमवाय्वम्बुवह्न्याख्यभूतान्यासीत् स एव हि ॥[२३]
हकाराद्व्योमसंज्ञं च यकाराद्वायुरुच्यते ।
रकाराद्वह्निस्तोयं तु वकारादिति सैव वाक् ॥[२४]

लण् ।।६।।

आधारभूतं भूतानामन्नादीनां च कारणम् ।
अन्नद्रेतस्ततो जीवः कारणत्वाल्लणीरितम् ॥[२५]

सृष्टिपक्षे भूतपञ्चकसृष्टिप्रतिपादनायोक्तसूत्रद्वयमेकं कृत्वा व्याख्यातम् । पार्थक्यस्यायुक्तत्वात् ।

ञमङणनम् इति सूत्रे पञ्चतन्मात्राणां प्रतिपादनम् :-

पञ्चवर्गेष्वान्तिमाः वर्णाः शब्दस्पर्शादयो गुणाः इति वचनात् अत्र सूत्रे शब्द - स्पर्श - रूप - रस - गन्धाः आकाशादिपञ्चमहाभूतानां गुणाः बोध्यन्ते । पुनश्चान्नपानभावादीनां कारणतत्त्वेन स्थितानां तन्मात्रामामुत्पत्ति क्रममुच्यते ।

शब्दस्पर्शौ रूपरसगन्धाश्च ञ म ङ ण न म् ।
व्योमादीनां गुणा ह्येते जानीयात् सर्ववस्तुषु ॥[२६]

अत्र सर्वं नामधातुजमाह - इति शाकटायनोक्तसिद्धान्तेन ञकारादयोऽवश्यं

व्युत्पादनीयाः इति कुङ् खुङ इति दण्डकपठितात् ङ,ङ शब्दे धातोर्डः । ङकारस्य चवर्गादेशे ञकारः पुषोदकारादिकत्वकल्पनया । ङ्यते शब्द्यते इति विग्रहः। एवञ्च ञ इति शब्दरूपार्थबोधकः । एवमेव मीयते त्वगिन्द्रियेण साक्षात् क्रियते योऽसौ मः । स्पर्शगुणः माङ्माने इति धातु। ङ्यते कीर्त्यते इति ङः रूपगुणः । ङुङधातुः प्रसिद्धैव । नह्यति समवायेन सम्बन्धाति जलं पृथिवीं च यौऽसौ णः रसः गुणः। णः बन्धने इति धातुः । पृषोदरादित्वाण्णत्वम् । नमति वायुसाहचर्येण नासिकाग्रं योऽसौ नः गन्धगुणः । णम् प्रह्वत्वे शब्दे प्रसिद्ध एव धातुः । एवं प्रकारेण पञ्चतन्मात्राणामुत्पत्तिः स्वीक्रियते ।

झभञ् , घढधष् इति सूत्राभ्यां पञ्चकर्मेन्द्रियनिरूपणम् :-

इत्याभ्यां सूत्राभ्यां पञ्चकर्मेन्द्रियाणि प्रतिपाद्यन्ते । इत्यनयोस्सूत्रयोः वर्गस्य चतुर्णां वर्णानामुपस्थापनम् । अतीववैशिष्ट्यं प्रतिपादयति । उक्तञ्च-

घढधष् सर्वभूतानां पादपायू उपस्थकः ।
कर्मेन्द्रियगणा ह्येते जाता हि परमार्थतः ॥[२७]

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च इति श्रुत्या सह संवादोऽप्यत्र समीचीनः । तत्र व्युत्पत्या सह व्याख्यायते - झटिति मुखे वायु संयोगेन वर्णमुत्पादयति यत् तद् झम् वागिन्द्रियम् । झट् संघाते इति धातुः । भाति ग्रहणाख्येन स्व व्यापारेण शोभते इति भाम् पाणीन्द्रियम् । भाधातुः दीप्यर्थकः । धवते शब्दायमानं सद् गच्छति इति घम् । पादेन्द्रियम् । घुङ् शब्दे इति धातुः । ढौकते मलापनयनाय गुद् द्वारं गच्छति यत् तद् ढम् । पायु इन्द्रियम् । ढौकृधातुर्गत्यर्थे प्रसिद्धः । दधाति गर्भधारणाय स्वव्यापारेण स्त्रियं प्रेरयति यत्तद् धम् उपस्थेन्द्रियम् । डुधाञ्धारणे धातुरन्तर्भाविताण्यर्थोऽत्र ग्राह्यः । उक्तञ्च -

वाक्पाणी च झ भ ञासीद्विराड्रूपचिदात्मनः ।
सर्वजन्तुषु विज्ञेयं स्थावरादौ न विद्यते ॥[२८]
घढधष् सर्वभूतानां पादपायू उपस्थकः ।
कर्मेन्द्रियगणा ह्येते जाता हि परमार्थतः ॥[२९]

अत्रापि सृष्टिपक्षे इदमपि सूत्रत्रयमेकत्वेन व्याख्यातुं युज्यत

इति । द्वादशत्वसंख्यापि न विरुद्धा ।

जबगडदश् इति सूत्रे पञ्च ज्ञानेन्द्रियनिरूपणम् :-

वर्गाणां मध्यवर्णोत्थो ज्ञानेन्द्रियगणाः स्मृताः । इति वचनात् सर्वत्र सर्वेषां प्राणिजातानामेव जबगडदश् वर्णाः ज्ञानेन्द्रियाणां जनकाः इति । उक्त सूत्रेण ज्ञानेन्द्रियाणि प्रतिपाद्यन्ते

श्रौत्रत्वङ्नयनघ्राणजिह्वाधीन्द्रियपञ्चकम् ।
सर्वेषामपि जन्तूनामीरितं ज ब ग ड दं श् ॥[३०]

जयति शब्दग्रहणे उत्कर्षेण वर्तते यत्तद् जम् श्रोत्रेन्द्रियम् । जि जये इति धातुः प्रसिद्धः । वदति सर्वशरीरे तिष्ठति यत्तद् बम् । त्वगिन्द्रियम् । बद्धातुः स्थैर्येपवर्गीयादिः । गच्छति दूरस्थमपि विषयं गत्वा गृह्णाति इति गम् चक्षुरिन्द्रियम् । गम्लृगतौ इति प्रसिद्ध एव धातुः । इयते वायुसम्बन्धेन विहायसा गच्छति यत् तद् डम् घ्राणेन्द्रियम् । डीङ् विहायसा गतौ इति धातुः । ददाति रसं गृहीत्वा भोक्त्रे समर्पयति यत् तद् दम् रसनेन्द्रियम् । डुदाञ् दाने इति धातुः । अत्रापि घ्राणरसनयोरार्थक्रमानुरोधेन पाठक्रमोऽतीव नादर्तव्यः ।

खफछठथचटतव् इति सूत्रे प्राणादिपञ्चकमनोबुद्ध्यस्मृतीनां प्रतिपादनम्-

उक्तसूत्रे प्राणापानसमानोदानव्यानादयः पञ्च वायवः एवं मनोबुद्ध्यहंकाराः सृष्टिपराः प्रतिपाद्यन्ते । सर्वाप्येषा प्रक्रियासांख्यतत्त्वकौमुद्यां, पञ्चदश्यादिसांख्यवेदान्तग्रन्थे च विस्तृतमुक्तम् । नन्दिकेश्वरेणापि निगदितम् -

प्राणादिपञ्चकं चैव मनो बुद्धिरहङ्कृतिः ।
बभूव कारणत्वेन ख फ छ ठ थ च ट त व् ॥[३१]

एतेष्वष्ट वर्णेषु पूर्वं पञ्चमवर्णाः वर्गस्य द्वितीयाक्षराः । पश्चाच्च चकार टकार तकारादयः पठिताः। एतैव जगतां कारणत्वेन संभूताः । उक्तञ्च -

वर्गद्वितीयवर्णोत्थाः प्राणाद्याः पञ्च वायवः।
मध्यवर्णत्रयाज्जाता अन्तः करणवृत्तयः ॥[३२]

तत्र खनति मुखमीषद् विवारयति वर्णोच्चारणायेति ख प्राणवायुः । खनु अवदारणे इति धातुः । फक्कति मलादि निःसारणाय नीचैर्गच्छति

योऽसौ फः अपानवायुः । फक्कधातुर्नीचैर्गतौ । छ्यति नाभिमाश्रित्य मुक्तस्यान्नजलादेः समानत्वापादनेन पार्थक्यं निवारयति योऽसौ छः समानवायुः। छो छेदने धातुः । टलति टालयति मुक्तस्यान्नादरूद्वारार्थं निरासयति योऽसौ टः उदानवायुः । टल्टूल्वैक्लव्ये इति धातुरूपः । पृषोदरादित्वात् ट इत्यस्य ठ इत्यादेशो बोध्यः । तिष्ठति सर्वशरीरे रसरुधिरादीनां विततनायं योऽसौ थः व्यानवायुः । ष्ठागतिनिवृत्तौ इति धातुः । पृषोदरादितष्ठा सकारलोपः। चिनोति संकल्पविकल्पात्मकं कर्म च मनः । चिञ् चयने इति धातुः। टङ्कति देहादौ तादाम्याध्याससम्पादनेन जीवं वध्नाति इति टम् बुद्धितत्त्वम् । टकि गतौ इति धातुः । तनोति विस्तारयति शरीरादिष्वहन्ताध्यासायादनेन बुद्ध्यापादितां चिज्जडग्रन्थिं योऽसौ तः अहङ्कारः । तनुविस्तारेऽर्थे प्रसिद्धोऽस्ति इति ।

कपय् इति सूत्रे प्रकृतिपुरुषयोः विवेचनम् :-

अत्र सर्वप्राणि कारणत्वेनाद्यन्तवर्गद्वयाक्षरग्रहणेन सम्पुटीभावं प्रकृतिपुरुषाभ्यां प्रकाशयति । ककार पकारात् प्रकृतिपुरुषौ सम्भूतौ ।

तथा हि -

प्रकृतिं पुरूषञ्चैव सर्वेषामेव सम्मतम् ।
सम्भूतमिति विज्ञेयं क प य् स्यादिति निश्चितम् ॥[३३]

कचते जगद् वध्नाति इति कम् प्रकृतितत्त्वम् । कच् धातुर्बन्धनार्थकः । कचिदीप्तौ इत्यस्माद्धातोर्वा कशब्दो निष्पाद्यः। जगद्रूपकार्येण प्रकृतिर्दीप्यमानत्वात् । पाति विश्वमिति पः पुरुषः । पाधातुरक्षणे उपदिष्टमेव ।

शषसर् इति सूत्रात् सृष्टौ सत्त्वरजस्तमसां सम्भूतिरितिनिरूपणम् :-

उक्तसूत्रे सत्त्वरजस्तमसां गुणत्रयाणां विशिष्टरूपेण विचारः कृतोऽस्ति । प परमतत्त्वरूपः शिवः । त्रयात्मकान् गुणानाश्रित्य सर्वभूतेषु क्रीडति । उक्तञ्च-

सत्वरजस्तमस इति गुणानां त्रितयं पुरा ।
समाश्रित्य महादेवः शषसर् क्रीडति प्रभुः ॥[३४]

शक्नोति मनुष्यदेहादिकार्यं कर्तुं योऽसौ शः रजोगुण; । शक्लृशक्तौ इति धातोर्डः । स्यति अन्तं करोति इति षः। तमोगुणः । षोऽन्त कर्मणि इति

धातुः । अथवा सायति क्षायं करोति इति षः । षोक्षये इति धातुः । पृषोदरादित्वात् षत्वम् । सीदन्ति तिष्ठन्ति अस्मिन् ज्ञानवैराग्यप्रभृतयो धर्माः इति सः सत्त्वगुणः । षद्लृविशरणाद्यर्थे इति धातुः प्रसिद्धः । उक्तञ्च -

शकारद्राजसोद्भूतिः षकारात्तमसोद्भवः ।
सकारात् सत्वसम्भूतिरिति त्रिगुणसम्भवः ॥[३५]

हल् इत्यन्तस्य सूत्रस्य पुनरध्यात्मपरत्वकथनम् :-

सर्वतत्त्वजनकः शिवः स्वयं तत्त्वातीतः इति ज्ञापनार्थमेवैतत्सूत्रं चकार । अस्मिन् सूत्रे पुनरध्यात्मतत्त्वं स्मारितम् । तथाहि - हन्ति अविद्यामिति हः शम्भुः । हन् धातुः हिंसागत्युभयार्थकः । अथवा हन्ति सर्वत्र गच्छति सर्वं जानातीति वा विग्रहः । अनेन प्रकारेण ढक्का निनादव्याजेन सनकसनन्दन सनत्कुमारादिमुनिजनेभ्यः तत्त्वमुपदिशन् आद्यमकारम् अन्त्येन हकारेण विन्दुनापि च सह संयोजयाहमेव यूयमित्युपदिश्यान्तर्दधौ भगवान् शम्भुरिति तत्त्वार्थः सम्पन्नः । उक्तञ्च -

तत्त्वातीतः परः साक्षी सर्वानुग्रहविग्रहः ।
अहमात्मा परो हल् स्यामिति शम्भुस्तिरोदधे ॥[३६]

इति कारिकामेवानुवदता शैवागमदर्शनेऽपि — हकारः शिववर्णः स्यादिति प्रतिपादितम् ॥[३७]

पादटिप्पणी

१-नन्दिकेश्वरकाशिका ०२

२-व्याकरणमहाभाष्यं प्रथमाह्निके)

३-नन्दिकेश्वरकाशिका-१

४- (व्याकरणमहाभाष्ये द्वितीयाह्निके)

५-सां.का. गौणपादभाष्यम्

६-(ऋग्वेदः)

७-नन्दिकेश्वरकाशिका ५-६

८-व्याकरणमहाभाष्यम्

९- नन्दिकेश्वरकाशिका ०३

१०-नन्दिकेश्वरकाशिका ०२

११-वैयाकरणसिद्धान्तकौमुदीसंज्ञाप्रकरणम्

१२-नन्दिकेश्वरकाशिका ०९

१३- नन्दिकेश्वरकाशिका १०

१४ - नन्दिकेश्वरकाशिका ११

१५ - श्रीतन्त्रम्

१६ - नन्दिकेश्वरकाशिका १२,

१७- नन्दिकेश्वरकाशिका १३

१८ - सनकदक्षिणामूर्तिसंवादमहावाक्यविवरणम्

१९ - नन्दिकेश्वरकाशिका १४

२० - स्वरविमर्शिन्याम्

२१ - महामन्त्रप्रकाशिन्याम् , शिवगौरीसंवादे । इति ।

२२ - औपनिषद् सृष्टिक्रमे

२३- नन्दिकेश्वरकाशिका १५

२४- नन्दिकेश्वरकाशिका १६

२५- नन्दिकेश्वरकाशिका १७

२६- नन्दिकेश्वरकाशिका १८

२७- नन्दिकेश्वराकाशिका २०

२८- नन्दिकेश्वरकाशिका १९

२९- नन्दिकेश्वरकाशिका २०

३०- नन्दिकेश्वरकाशिका २१

३१- नन्दिकेश्वरकाशिका २२

३२- नन्दिकेश्वरकाशिका २३

३३- नन्दिकेश्वरकाशिका २४
३४- नन्दिकेश्वरकाशिका २५
३५- नन्दिकेश्वरकाशिका २६
३६- नन्दिकेश्वरकाशिका २७
३७ - शैवागमदर्शनम्

तृतीयोऽध्यायः

वर्णकालविश्लेषणम्

तृतीयोऽध्यायः
वर्णकालविश्लेषणम्

वर्णकालस्य त्रैविध्यम्

वर्णानामुच्चारणस्य महत्वपूर्णं स्थानं वरीवर्ति यतो हि उच्चारणेन तस्य वक्तुः सर्वं ज्ञायते । तस्य स्वभावः, स्वरूपम् , ज्ञानम् , व्यवहारः, सच्चरित्रम् एवमेव सर्वेषां ज्ञानं भवति । तस्योच्चारणस्य व्याकरणप्रक्रियायां बहुवैशिष्ट्यं वर्णितमस्ति । लिखति आचार्यपाणिनिः शिक्षाग्रन्थे यत् -

व्याघ्री यथा हरेत् पुत्रान् द्रष्ट्राभ्यां न च पीडयेत् ।
भीता पतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत् ।।[१]

यद्यपि उच्चारणं वक्त्रा यथेच्छं वर्णानां दीर्घता ह्रस्वता वा कर्तुं शक्या । अतः इयत्येवकाले अस्य वर्णस्योच्चारणं भवति इति वक्तुं न शक्यते । दृश्यते च गानादौ एकस्यैव वर्णस्य बहुकालपर्यन्तमुच्चारणम् । तथापि कियत् काले कस्य वर्णस्य उच्चारणे साधुता, 'एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुष्ठुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति' । इति श्रुतिप्रतिपादितफलप्रयोजकीभूतं सुप्रयुक्तत्वञ्च सम्पद्यते इत्यादि बोधनार्थं शिक्षाग्रन्थेषु वर्णानां कालनियमाः उक्ताः । अपि च व्याकरणादिशास्त्रेषु ह्रस्वादीनुद्दिश्य कार्याणि निर्दिश्यन्ते । यथा ' ह्रस्वस्य पिति कृति तुक् ' ह्रस्वादयो व्यवहाराश्च कालनिबन्धना एव अयमेकमात्रिको वर्ण इत्यादिकालपरिज्ञानं च प्रयोगे एव इति ह्रस्वादीनां कालनियमाज्ञाने अयं ह्रस्वः दीर्घो वा इत्यादि निर्णेतुमशक्यत्वात् व्याकरणशास्त्रीयकार्याणामपि तत्र प्रवृत्तिर्न कर्तुं शक्यते । अतो वर्णकाल ज्ञानमावश्यकमिति, वर्णानां कालनिर्णयः कृतः शिक्षाकारैः । स एव इदानीं संक्षिप्य अनूद्यते -

अखण्डवर्णविषयो वर्णांशविषयोऽपि च ।
विरामविषयश्चैव त्रिविधः काल उच्यते ।।

कालनिर्णयशिक्षोक्त्यनुसारं सम्पूर्णवर्णविषयकः वर्णांशविषयकः । वर्णद्वयमध्ये क्रियमाणविरामविषयश्चेति त्रिधा विभज्य वर्णकालः क्रमशः निरूप्यते ।

अखण्डवर्णकालः :-

वर्णा द्विविधा एव । स्वराः व्यञ्जनानि च । यदुक्तं शैशरीयशिक्षायाम् -

द्विविधवर्णजातं हि स्वरो व्यंजनमेव च ।[२]

स्वरो नाम स्वयं राजन्ते उच्चार्यन्ते इति स्वराः । व्यज्यते स्वरसाहाय्येन प्रकाशते इति व्यञ्जनम् । ते च स्वराः त्रिविधाः ह्रस्वाः, दीर्घाः, प्लुताश्च । तत्र एकमात्राकालिकः स्वरो ह्रस्वः, अथवा एवं वक्तव्यं यद् यस्य वर्णस्य मात्राकाले उच्चारणं स शास्त्रेषु ह्रस्वत्वेन व्यवहरणीयः । द्विमात्राकालिको स्वरो दीर्घः । त्रिमात्राकालिको प्लुत । मात्रार्धकालिकं व्यञ्जनम् । इदमत्रबोध्यं ह्रस्वादीनां लक्षणेषु न केवलं मात्राकालिकत्वमेव प्रविष्टम् । किन्तु स्वरत्वमपि तत्र अपेक्षितं तेन व्यंजनसमूहस्य मात्राकालिकत्वेऽपि न ह्रस्वत्वादिकम् । मात्राकालस्य परिणाममनुपदमेव वक्ष्यामः । अयं च ह्रस्वादीनां कालः सामान्यतः सर्वजनीनसिद्धः । पाणिनीयशिक्षायां हि ह्रस्वादयो व्यवहाराः कालकृता इत्येव प्रतिपादितम् ।

ह्रस्वो, दीर्घः, प्लुत इति कालतो नियमा अचि [३]।

न तु ह्रस्वादीनां विशिष्य कालः निर्दिष्टः परन्तु -

चाषस्तु वदते मात्रां द्विमात्रेत्येव वायसः ।
शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम् ।।[४]

मात्रादिकालानां चाषकाककलापिनकुलानां शब्दैः निदर्शनाद् ह्रस्वदीर्घप्लुतानां व्यञ्जनस्य च कालविषये पूर्वोक्त एव निर्णयः शिक्षाकर्तुरभिमतः इति प्रतिभाति । अनुस्वारस्य मात्राद्विमात्रात्रिमात्रार्धमात्राकालः अत्रापि न विरुद्धः , यतो हि पाणिनीयशास्त्रे शिक्षान्तरेषु च अनुस्वारस्य स्वरत्वं व्यञ्जनत्वं च स्वीकृतम् । तथा च पाणिनिशिक्षा -

अनुस्वारो व्यञ्जनं वा स्वरो वेति परं मतम् ।[५]

प्रातिशाख्यमपि - अनुस्वारो व्यञ्जनं वा स्वरो वा । अनुस्वारस्य अनुस्वारात्परस्य च द्वित्वं स्वीकृतं वैयाकरणैः। एवञ्च क्वचिद् अनुस्वारस्य व्यञ्जनमात्रा क्वचिच्च स्वरमात्रा इति युक्तमेव । परन्तु भाषायाम् ऋक्शाखायाञ्च प्रायः अर्धमात्रिकस्यैव अनुस्वारस्य प्रयोगात् अत्र एक विध एव अनुस्वार

उक्तः । मात्राद्विमात्रादिकालानां प्रयोगस्तु शाखान्तरेषु दृश्यते । परं तत्र अनुस्वारस्य न भाषायामिव उच्चारणं किन्तु 'ठं , गुं 'इति विलक्षणमेवोच्चारणम्। स एव 'ठं, गुं ' कारः कुत्र द्विमात्रिकः इत्यादिव्यवस्था शिक्षान्तरेषु प्रदर्शिता।

ह्रस्वादग्रे भवेद्दीर्घो दीर्घादग्रे भवेल्लघुः ।
देवानां हृदयं त्यक्त्वा 'ठं 'स्यादेवद्विलके परे ॥

यद्यपि एवं रीत्या विसर्गादीनामपि स्वरव्यञ्जनोभयत्वेन मात्रादिकालिकता शक्या । तथापि विसर्गादेः अर्धमात्राकालिकस्यैव प्रयोगात् , आरोपे सति निमित्तानुसरणं न तु निमित्तमस्ति इत्यारोपः' इति न्यायेन अनुस्वारविषये एव इदं समाधानं लिखितम् । तस्य मात्रादिकालिकस्यापि दर्शनात् । रङ्गस्य च अत्र द्विमात्रता प्रतिपादिता ।

हृदये चैकमात्रस्त्वर्धमात्रस्तु मूर्धनि ।
नासिकायां तथार्धञ्च रङ्गस्यैव द्विमात्रता ॥[६]

यथा चास्य द्विमात्रता तथा अधोनिर्दिष्टोद्धरणैरेव स्पष्टम् । रङ्गमात्रादिविषये अन्यान्यपि मता'नि सन्ति तानि वक्ष्यमाणासु शिक्षासु आयास्यन्त्येव ।

याज्ञवल्कीये तु ह्रस्वदीर्घप्लुतव्यञ्जनानां मात्राद्विमात्रात्रिमात्रार्धमात्राकालाः उक्ताः ।

एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घमुच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम् ॥
वर्णे तु मात्रिके पूर्वे ह्यनुस्वारो द्विमात्रिकः ।
द्विमात्रिके मात्रिकः स्यात्संयोगाद्यश्च यो भवेत् ॥[७]

अनुस्वारस्य च मात्राविचारः इत्थं कृतः । यत्र अनुस्वारो ह्रस्वात्परः तत्र द्विमात्रिकः , यत्र च दीर्घात्परः संयोगपूर्वो वा तत्र मात्रिकः, यदि अनुस्वारात् परतः ऋवर्णपरकं व्यञ्जनं भवेत् तदा सः दीर्घात्परोऽपि द्विमात्रिक एव । एवं रीत्या कुत्रचिद् मात्रिकत्वं कुत्रचिद् द्विमात्रिकत्वम् । रङ्गस्यापि मात्रिकत्वं द्विमात्रिकत्वञ्च । पाणिनीयशिक्षायां तु द्विमात्रिकत्वमेवोक्तम्। अत्र मात्राकालस्य परिणामविषयेऽपि विचारः कृतः । स च पश्चाद् दर्शयिष्यते ।

वर्णरत्नप्रदीपिकायामपि ह्रस्वादीनां मात्रानिर्णयः उक्तरीत्यैव उक्तः। परन्तु संयोगपूर्वस्य ह्रस्वस्य द्विमात्रता तथापि न दीर्घत्वमित्युक्तम्। रङ्गमात्राविषये न किञ्चिद् विचारितम्।

एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घमुच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम्॥
स्वराः संयोगपूर्वा ये व्यञ्जनान्तास्तथान्तगाः।
तेषां कालो द्विमात्रः स्यात् न तु दीर्घा हि ते स्मृताः॥[८]

मल्लशर्मकृतशिक्षायां ह्रस्वादिव्यञ्जनान्तानां मात्राविषये उक्त एव निर्णयः प्रतिपादितः। परन्तु तत्र रङ्गमहारङ्गातिरङ्गभेदेन रङ्गवर्णं त्रिधा विभज्य रङ्गवर्णस्य चतुर्मात्रिकत्वं महारङ्गस्य पञ्चमात्रिकत्वम् अतिरङ्गस्य च षण्मात्रिकत्वमुक्तम्। उक्तञ्च -

ह्रस्वात्तु द्विगुणो दीर्घो दीर्घादेकगुणः प्लुतः।
प्लुतादेकगुणो रङ्गो रङ्गादेकगुणाधिकः॥
महाशब्देन संयुक्तो व्यञ्जनं चार्धमात्रिकम्।
अतिरङ्गो महारङ्गाद् वृद्धो ह्येकगुणाधिकः॥[९]

लोमशशिक्षायामपि उक्तरीत्यैव मात्राविचारः प्रदर्शितः। अत्रापि रङ्गस्य मात्रिकता द्विमात्रिकता च प्रतिपादिता।

अनुस्वारः द्विमात्रः स्याद् ऋवर्णव्यञ्जनादिगः।
ह्रस्वाद्वा यदि वा दीर्घाद् देवानां 'ठं' हृदये यथा॥
द्विमात्रो मात्रिको वापि नासामूलं समाश्रितः।
अन्ते प्रयुज्यते रङ्गः पञ्चमैः सर्वनासिकः॥[१०]

माण्डूक्यशिक्षायान्तु ह्रस्वदीर्घप्लुतानां मात्राद्विमात्रादिकालित्वमुक्तम्। किन्तु व्यञ्जनस्य मात्रा कियती न निर्दिष्टम्। रङ्गस्य द्विमात्रिकता एव उक्ता। अत्र अनुस्वारस्य प्लुतत्वं नाम त्रिमात्रिकत्वमप्युक्तम्। अन्यत्र तु प्रायः द्विमात्राकालपर्यन्तमेव अनुस्वारस्योच्चारणं विहितम्। एवं नारदीयशिक्षायामपि रङ्गस्य द्विमात्रिकता उक्ता परं ह्रस्वादीनां कालो न बोधितः।

एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घमुच्यते।

त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम् ॥
द्विमात्रिको वा नासामूलं समाश्रितः ।
अन्ते प्रयुज्यते रङ्गः पञ्चमैः सर्वनासिकः । प्रथमखण्डे

माण्डूक्यशिक्षायामपि उद्धरणानि यथा

अक्ष्णोनिमेषमात्रेण यो वर्णः समुदीर्यते ।
स एकमात्रो द्विस्तावान् दीर्घस्तत्रःप्लुत उच्यते ॥[११]
नासादुत्पद्यते रङ्गः कास्येन समनिस्वनः ।
मृदुश्चैव द्विमात्रं स्याद् वृष्टिमां इति दर्शनम् ॥१० अध्याये
अनुस्वाराश्च कर्तव्या ह्रस्वदीर्घप्लुतास्त्रयः ।११ अध्याये

शैशरीयशिक्षायाम् -

ह्रस्वो दीर्घः प्लुत इति स्वराः कालेन संज्ञिताः ।
सन्ध्यक्षराणां कालश्च दीर्घः प्लुतो न मात्रिकः ॥
व्यञ्जनं त्वर्धमात्रं स्यात् स्वरभक्तिस्तथैव च ।
संयोगे पादमात्रा स्यात् स्वरभक्तिः प्रकीर्त्यते ॥
ह्रस्वात्परस्त्वनुस्वारस्त्रिपादः परिकीर्तितः ।
स च ह्रस्वस्त्रिपाकः स्यात् वर्णकालो निगद्यते ॥[१२]

ह्रस्वादयो व्यवहाराः कालकृता एव इत्युक्तम् , न तु ह्रस्वादीनां कालपरिमाणं प्रदर्शितम् । व्यञ्जनस्य स्वरभक्तेश्च अर्धमात्राकालिकत्वं, संयुक्तव्यञ्जनस्य च पादमात्राकालिकत्व प्रतिपादितम् । पादमात्राशब्देन मात्रा चतुर्थांशो ग्राह्यः । तथा च व्यासशिक्षा पादो मात्रा चतुर्थकः, इति । अनुस्वार -मात्राविषये पूर्वोक्तयाज्ञवल्कीयनिर्णयमियं शिक्षा न संवदति । अत्र ह्रस्वात्परस्यानुस्वारस्य त्रिपादमात्रिकत्वं दीर्घात्परस्य च पादमात्रिकत्वमुक्तम्।

कौहलीयशिक्षायाम् -

वेदस्थप्रणवे तु स्यात् समकारो द्विमात्रकः ।
स्वरमात्रं द्विमात्रं वा व्यञ्जनं त्वणुमात्रकम् ॥
एकद्वित्रिक्रमेणैव मात्राकालं मनीषिणः ।
शब्दैर्निदर्शयन्त्यत्र चाष्काककलापिनाम् ॥[१३]

इति श्लोकेन मात्राकालिकः निर्दिष्टाः परन्तु ह्रस्वादीनां कालविचारो न कृतः। व्यञ्जनस्य च अत्र अणुमात्रिकत्वमर्थात् मात्राचतुर्थांशकालिकत्वम्। उक्तञ्च - यदि च अर्धमणु इति ऋक्तन्त्रानुसारं मात्रार्धस्यैव कृते एतच्छिक्षाकृता अणुव्यवहारः कृतो भवेत् तदा एतच्छिक्षामतेऽपि अर्धमात्रिकत्वं व्यञ्जनस्य। अन्यत्र तु मात्राचतुर्थांशस्यैव कृतेऽणुत्वव्यवहारो दृष्यते। एतच्च मात्रापरिमाणे द्रष्टव्यम्। प्रायः शिक्षाग्रन्थान्तरेषु व्यञ्जनस्य अर्धमात्राकालिकत्वं स्वीकृतम्।

पारिशिक्षायां चाषादिशब्दैः मात्रादिकालानां निदर्शनपुरस्सरं ह्रस्वादीनां कालः उक्तः। रङ्गवर्णस्य च द्विमात्रिकता स्वीकृता।

ह्रस्वश्च यावद्विपिने स्वभावात् किकीदिवी रौति स एकमात्रः।
काकोऽब्रवीत् तद्विगुणं तु कालः द्विमात्रिकः स्यात्तु स एव दीर्घः।
शिखी त्रिमात्रं वदति प्लुतः स्यात् ह्रस्वार्धकालं नकुलोऽर्धमात्रकम्।
रङ्गे मेखे व्याघ्ररूतोपमं स्यात् मात्राद्वयं हृज्जनितस्त्वनास्यम्॥[१४]

शम्भुशिक्षायां हि ह्रस्वदीर्घप्लुतानां मात्राद्विमात्रात्रिमात्राकालिकत्वं प्लुतरङ्गस्य च चतुर्मात्राकालिकत्वमुक्तम्।

रङ्गप्लुश्चतुर्मात्रः शुद्धः प्लुतस्त्रिमात्रिकः।
दीर्घ उच्चद्विमात्रः स्याद् ह्रस्वस्याप्येकमात्रिकः॥[१५]

एवमेव ऋक्तन्त्रे -- अकालो ह्रस्वः, अर्धमणुमात्रा, द्वेदीर्घम्। तिस्रो वृद्धम्। वैस्यैव स्वरस्त्रिमात्रः। अक्षराणाम्। ऋक्प्रातिशाख्ये चापि ह्रस्वदीर्घप्लुतानां मात्रा उक्ताः। यथा - मात्रा ह्रस्वस्तावदवग्रहान्तरं द्वे दीर्घं, तिस्रः प्लुत उच्यते स्वरः।

व्यासशिक्षायां ह्रस्वदीर्घप्लुतानां कालविषये पूर्वोक्त एव निर्णयः सिद्धान्तितः व्यञ्जनकालस्तु तत्र न निर्दिष्टः, रेफोष्मवर्णपरस्यानुस्वारस्य द्विमात्रिकता, संयोगपरस्य तु मात्रिकता उक्ता। यत्र च अनुस्वारात्परतः स्वरो भवेत् तत्र अनुस्वारस्य सपादमात्रिकता स्वीकृता। उक्तञ्च -

ह्रस्वः स्यादेकमात्रः स्याद् द्विमात्रस्य तु दीर्घता।
त्रिमात्रस्य प्लुतोऽचां हि पादो मात्रा चतुर्थकः।
स्वरोदये त्वनुस्वारो भवेदध्यणुमात्रकः।

अनुस्वारो द्विमात्रः स्याद्रेफोष्मसु परेषु च ।
संयोगे परभूते चेदेकमात्र इति स्मृतः ।।[१६]

ननु 'मोनुस्वारः' [१७] इति हल्येव अनुस्वारस्य विधानात् कथमनुस्वारात्परतः स्वरस्य सम्भवः इति चेत् मोनुस्वारः इत्यनुस्वारस्य अचि असम्भवेऽपि दीर्घादिटि समानपदे इति यत्र रुः भवति तत्र रूप्रकरणीयानुस्वारस्य अच्परत्वं सम्भवत्येव, तद्यथा महां इन्द्रः इति । अत्र यद्यपि आतोऽटि नित्यम् इति नित्यानुनासिकविधानम् तथापि तैत्तिरीयैः ईदृशस्थलेऽनुस्वारस्यैव पठनात् तैत्तिरीयशाखानुसारिण्याम् । अस्यामपि तथा प्रतिपादितं स्पष्टञ्च । आतोऽटि इत्यत्र सिद्धान्तकौमुद्यां तैजसाख्ये, व्यासशिक्षाभाष्ये च । अन्यायामपि शिक्षायां रङ्गवर्णस्य मात्राविचारः यथा कृतस्तथा अधोनिर्दिष्टे उद्धरणे स्पष्टम् ।

पञ्चरङ्गप्लुतादीर्घाश्चत्वारस्तैत्तिरीयके ।
तेषामन्ते च नासिक्यं रङ्गसंज्ञमित्यीर्यते ।।
रङ्गे स्वरे च मात्रैका प्रत्येकं रङ्गदीर्घयोः ।
रङ्गे स्वरे द्वेमात्रे तथावत्प्लुतरङ्गयोः ।।
रङ्गप्लुतश्चतुर्मात्र इत्युक्तो याजुषां मते ।।

एवं पाराशरी लब्धमोधानन्दिनीसर्वसम्मतप्रभृतिषु शिक्षासु केवलं अनुस्वारस्यैव मात्राविचारः कृतः । प्रायः सर्वासु शिक्षासु अस्वारमात्राविषये याज्ञवल्क्यशिक्षोक्तः निर्णयः एव आम्रेडितः । यत्र क्वचिद् विषये मतभेदः स तत्र लिखति एव उक्तञ्च -

मात्रानुस्वारेऽनुस्वारो द्विमात्रान्मात्र एव तु ।
मात्रिकादपि संयोगे मात्रिकस्तु द्विरूपवत् ।।[१८]

वर्णांशकालः -

इदानीं पूर्वोक्तक्रमप्राप्तः वर्णांशकालो विचार्यते । एतद् विचारात्पूर्वं च यानि एतानि एकारादीनि सन्ध्यक्षराणि तेषां केषु वर्णानां घटकता इति उच्यते ।

एकारैकारयोः अकारेकारौ घटकौ, ओकारौकारयोश्च अकारोकारो

एवम् ऋकारऌकारयोः रेफलकारौ अज्भागश्च घटकाः । यद्यपि ए ऐ वर्णौ उभावपि अकारेकारघटितौ एवम् ओकारौकारौ अकाराद्यंशानां विषमता एवमोकारौकारयोः । अर्थात् ए ओ वर्णयोर्यादृशो विभागः न तादृशः ऐ औ वर्णयोः एतच्च अनुपदमेव प्रकाशमायास्यति । समत्वेऽपि वा एकारौकारयोः प्रश्लिष्टा वर्णता, एकारौकारयोश्च विश्लिष्टा वर्णिता । अर्थात् पूर्वत्र वर्णद्वयस्य नीरक्षीरवत् सम्मिश्रणम् । उत्तरत्र च तिलतण्डुलवत् । प्रयत्नभेदेऽपि अनयोः श्रुतिभेदे कारणम् । एतच्च प्रयत्ननिरूपणे द्रष्टव्यम् । यथा - यदि प्रारम्भो यत्नः प्रयत्नः । एवमप्यवर्णस्य एओश्च सवर्णसंज्ञां प्राप्नोति । प्रश्लिष्टौ वर्णौ इति । अवर्णस्य तर्हि ऐचोश्च सवर्णसंज्ञा प्राप्नोति । विवृततरौ वर्णौ इति ।[१९] एतानि च सन्ध्यक्षराणि वर्णद्वयघटितान्यपि स्वतन्त्राण्येव स्वीकृतानि न तु क्ष, ज्ञ, त्रादिवत् वर्णसमूहरूपाणि । यत अत्र घटकाः इकारदयः न तु शुद्धेकारादिसदृशाः किन्तु तद् विलक्षणा एव । वैलक्षण्ये हेतुश्च प्रयत्नभेद एव । अत एव अ, इ इति स्वतन्त्रवर्णसमूहवत् ऐ इत्यस्य श्रुतिर्न भवति । अत एव इकारादीनाम् उच्यमानं कार्यमैकारादिघटकानां न स्पष्टमेतत् । ए ओङ् इति सूत्रे भाष्ये । अथ प्रकृतमनुसरामः - एकारैकारयोः मात्रार्धकालिकः अक्षरांशः शेषः । अर्थात् सार्धमात्राकालिकः इकारांशः ओकारौकारयोस्तु मात्राकालिकः अकारांशः । शेषः उकारांशः इति पाणिनिशिक्षायामभिहितम् । इदञ्च सकलवैदिकपरम्परायां प्रसिद्धं पाणिनीयशिक्षायाः पाठमनुसृत्योक्तम् । स च पाठ इत्थम् -

अर्धमात्रा तु कण्ठ्या स्यादेकारैकायोर्भवेत् ।

ओकारौकारयोर्मात्रा इति । प्रायः सर्वेष्वपि मूर्तितेषु पाणिनीयशिक्षायाः हस्तलेखेष्वपि अयमेव पाठोऽस्माभिः उपलब्धः । (हस्तलेखानां संख्या २०५१, २०४८,२०३४,२०२६,२०१७,२०१२, सूची वेदभाग सरस्वतीभवन पुस्तकालयः, सं.सं.वि.वि., वाराणसा ।) पाणिनीयशिक्षाप्रकाशे तु -

अर्धमात्रा तु कण्ठ्या स्यादेकारौकारयोर्भवेत् ।[२०]

ऐकारौकारयोमात्रा इति पाठः दृश्यते । एतत्पाठानुसारमेवञ्च

शिक्षाप्रकाशकृता इयं कारिका व्याख्याता । उब्बटेनापि प्रातिशाख्यभाष्ये अयमेव पाठः उद्धृतः [२१]। एतदनुसारञ्च एकारौकारयोः अर्धमात्रा कण्ठ्या अध्यर्धमात्रा च यथाक्रमं तालव्या ओष्ठ्या च । एकारौकारयोस्तु मात्रा कण्ठ्या मात्रातालव्या ओष्ठ्या च ।

एवञ्च एकारोकारयोः कण्ठ्यतालव्यांशस्य कण्ठ्योष्ठांशस्य च विषमत्वम्। एकारौकारयोस्तु समत्वम्। शिक्षापञ्जिकाख्यपाणिनीयशिक्षाव्याख्यायां तु-

अर्धमात्रा तु कण्ठ्या स्यात् एकारौकारयोर्भवेत् '

इति एकारौकारविषयक एव पाठ उपलभ्यते । एकारौकारविषयकः अस्याः कारिकाया उत्तरांशस्तु न दृश्यते । अत्र पञ्जिकाकृतसवर्णग्रहणात् एकारेण ऐकारस्य, ओकारेण च औकारस्य ग्रहणं स्वीकृत्य चतुर्ष्वपि वर्णेषु अर्धमात्राया एव कण्ठ्यत्वम्। अर्ध्यर्धमात्रायाश्च तालव्यत्वादिकमुक्तं परन्तु इदमत्र चिन्त्यम् यत् व्याकरणशास्त्रे एकारैकारयोः ओकारौकारोश्च परस्परं सावर्ण्यस्यैव अभावात् कथम् एकारेण ऐकारस्य, ओकारेण च औकरस्य ग्रहणं पञ्जिकाकृता उक्तमिति । यथा च अनयोः न परस्परं सावर्ण्यं तथा लघुशब्देन्दुशेखरे संज्ञाप्रकरणे स्पष्टम् । एवञ्च मूलपाठानुसारं प्रकाशपञ्जिकयोः अनुसारञ्च संध्याक्षराणां भागविषये एकस्यामेव पाणिनीयशिक्षायां त्रयः प्रकाराः पुरतः आयान्ति ।

अस्मिश्च प्रकारत्रये एकोऽपि प्रकारः ग्रन्थान्तरीयमेतद् विषयं विचारं सम्यक्तया न संवदति । तथाहि आद्यपाठानुसारम्। मूलपाठानुसारम्। एकारैकारयोः विषमभागवत्ता ओकारौकारयोश्च समभागवत्ता । शिक्षान्तरे तु एकारौकारयोः समभागवत्ता एकारौकारयोः भागेषु विषमता प्रतिपादिता महाभाष्येऽपि ऐचोश्चोत्तरभूयस्त्वात् इत्यनेन ऐकारौकारयोरेव समता बोधिता ।

यद्यपि 'एच इग्ह्रस्वादेशे'[२२] इति सूत्रस्थभाष्यानुसारेण ए, ओ वर्णयोः तालव्यत्वोष्ठ्यत्वे एव लभ्यते तथापि 'तुल्यास्य प्रयत्नं सवर्णम्' इति सूत्रस्थभाष्यानुसारमनयोः कण्ठ्यत्वमपि आयाति । प्रकाशकारानुमोदितद्वितीय पाठानुसारञ्च ए ओ वर्णयोः विषमभागवत्ता । ऐ, औ वर्णयोस्तु समभागवत्ता लभ्यते । एतदपि भाष्यादिकं न संवदति । महाभाष्यादिषु हि अतो विपरीतमेव

प्रतिपादितम् । एतच्च उपरि एव स्पष्टम्। शिक्षापञ्जिकाकारानुमोदित तृतीयपाठानुरोधेन चतुर्णामपि सन्ध्यक्षराणां विषमभागवत्ता लभ्यते । एतदपि उपर्युक्तं शिक्षान्तरोक्तं महाभाष्योक्तं च सन्ध्याक्षरविषयकं भागविचारं नानुवर्तते । एषु च त्रिष्वपि पाठेषु कः पाठः न्याय्यः इति तु दुर्निर्णेयमेव । यतः यदि एषु पाठेषु कश्चिदपि पाठः ग्रन्थान्तरीयमेतदविषयकं विचारं सम्वदेत् तदा ग्रन्थान्तरैक्यवाक्यतया तस्यैव पाठस्य औचित्यमिति वक्तुं शक्यते परन्तु न तथा ।

इदमत्र वक्तव्यम् - यद् प्रश्लिष्टवर्णत्वविषये प्रयत्नविषये च ए ओ वर्णयोः विशिष्टवर्णत्वविषये विवृततमत्वरूपप्रयत्नविषये च ऐ ,औ वर्णयोर्मिथः साम्यम् । एवं श्रुतिदृष्ट्याऽपि ए ओ वर्णयोः ऐ औ वर्णयोर्वा मिथः साम्यम्। अतः ए ओ वर्णयोः भागविषये साम्यबोधकः एवम् ऐ औ वर्णयोरपि भागविषये साम्यबोधकः प्रकाशकारपञ्जिकाकाराभ्यामुब्बटेन च अनुमोदितः ।

अर्धमात्रातु कण्ठ्या स्यादेकारौकारयोर्भवेत् ।

ऐकारौकारयोर्मात्रा इत्येवं रूपः शिक्षाप्रकाशीय एव पाठः उचितः । अत्र तत्त्वं विद्वान्सः एव आलोचयन्तु । ऋ ऌवर्णयोः रेफलकारांशस्य अज्भागस्य च इयत्ता पाणिनीयशिक्षायां न स्पष्टीकृता । आपिशलशिक्षायान्तु सन्ध्यक्षराणां वर्णद्वयघटितत्वम् (द्विवर्णानि सन्ध्यक्षराणि १.२०, सरेफः ऋवर्णः १.२१) ऋवर्णस्य च रेफघटितत्त्वम् । इत्येवोक्तं न तु तद्घटकानां वर्णांशानां काल परिमाणं निर्दिष्टम् ।

याज्ञवल्क्यशिक्षायान्तु एकारौकारविषये एवं वर्णांशानां परिमाणं , न तु ऐकारौकारविषये निर्दिष्टम् । तदपि च न पाणिनीयशिक्षोक्तं विचारं संवदति । यतोऽत्र एओवर्णयोः कठ्यांशस्य तालव्यांशस्य च मात्रकत्वं उक्तमर्थात् एतदनुसारमनयोर्वणयोः कण्ठ्यतालव्याद्यंशौ समानमेव पाणिनीय शिक्षायान्तु अर्धमात्राया एव कठ्यत्वमुक्तम् ।

आद्या मात्रा तु कठ्यस्य एकारौकारयोर्भवेत् ।

तालव्यस्य तथोष्ठ्यस्य द्वितीया च यथा क्रमात् ।[२३]

कालनिर्णयशिक्षायान्तु ऋकारऌकारयोः रेफलकारांशस्य अर्धमात्रिकता शेषः अर्थात् अर्धमात्रिकः अज्भागः । एकारौकारयोः मात्रिकोऽकारांशः, शेषौ इकारोकारांशौ । एकारौकारयोस्तु अर्धमात्रिक एव अकारांशः । अध्यर्धमात्रिकौ इकारोकारौ इत्युक्तम् । अयं संध्यक्षराणां भागविचारः पूर्णतया महाभाष्यानुरोधी।

ऐकारौकारयोरादावकारोप्यर्धमात्रकः ।
इवर्णोवर्णयोः शेषौ स्यातामध्यर्धमात्रिकौ ।
एकारौकारयोरादावकारोऽप्येक मात्रकः ।
इवर्णोवर्णयोः शेषौ भवेतामथ मात्रिकौ ।।[२४]

कौहलीयशिक्षायान्तु एकारादीनां विभागविषये यद्यपि न किञ्चिदुक्तं तथापि ऋकारेऽंशचतुष्टयं स्वीकृत्य तत्र आद्यांशस्य अणुमात्रिकत्वम् । ततोऽणुमात्रिकः रेफांशः, ततोऽणुमात्रिकोऽज्भागः, ततोऽणुमात्रिकोऽत्यांशः इति प्रतिपादितम्। अणुशब्देन च मात्राचतुर्थांश उच्यते ।

ऋकारे आदिरणु मात्रो मध्ये रेफोऽणुमात्रिकः ।
अणुमात्रस्तथान्त्यांशो मध्ये भक्तिर्विधीयते ।।[२५]

अन्यैरपि शिक्षाकारैः प्रातिशाख्यकारैश्च एकारादीनां कृते सन्ध्यक्षरमिति व्यवहारं कुर्वद्भिःएकारादीनां वर्णद्वयात्मकता बोधितैव । विशिष्य वर्णांशानां परिमाणं न तु निर्दिष्टमित्यन्यत् ।

इमे च सर्वेऽपि पक्षा शास्त्रकारानुमताः । अतो नैकोऽपि अशास्त्रीय इति वक्तुं शक्यते । यथा कण्ठतो हस्तेन च स्वराणां प्रदर्शने नाना प्रकाराः वैदिकपरम्परायामुपलभ्यन्ते ते सर्वेऽपि च शास्त्रीया एव मन्यन्ते । ईदृशमतभेद बीजन्तु उच्चारणपरिपाटी भेद एव ।

विरामकालः :-

पूर्वोक्तप्रकरणद्वयेन वर्णवर्णांशकालौ उक्तौ । अथ उच्चारणे कुत्र कियान् विरामः कर्तव्यः इति शिक्षाद्यनुरोधेन उच्यते । तत्र याज्ञवल्क्यशिक्षायां वेदाध्ययने विरामनियमः इत्थमुक्तः -अवग्रहेऽर्धमात्राकालिको विरामःकर्तव्यः।

पादयोरन्तरे कालः एकमात्रो विधीयते ।
ऋचोऽर्धे तु द्विमात्रः स्यात् विमात्रः स्याद् ऋगन्तरे ।।[२६]

एवं पदपाठे पदद्वयस्य मध्ये एकमात्रिको विरामः । ऋचोऽर्धभागस्य अन्ते द्विमात्रिको विरामः । सम्पूर्णाया ऋचोन्ते तु त्रिमात्रिको विरामः करणीय इति । अवग्रहो नाम पदपाठेऽसमस्तपदस्य प्रकृतिप्रत्ययभागप्रदर्शनार्थं समस्तपदस्य च पूर्वोत्तरपदविभागप्रदर्शनार्थं मध्ये क्रियमाणो विच्छेद एव । अयञ्च विच्छेदोऽर्धमात्रादिकालं विरम्य प्रदर्शनीयः । यथा अब्द्य: इति अब्द्यः । यथा वा सहस्रशीर्षेति सहस्रशीर्षा इति । अयं च विच्छेदो न सर्वत्रैव असमस्त पदे । समस्त पदे वा किन्तु प्रातिशाख्यैः यादृश यादृशस्थले अस्य विधानं कृतं तत्रैव ।

व्यासशिक्षायान्तु प्रणवस्य अर्थात् मन्त्रादौ प्रयुज्यमानस्य ओङ्कारस्य अन्ते वाक्यस्य अन्ते अवग्रहे च सार्धमात्रिको विरामः कार्य इति उक्तम् ।

प्रणवोर्ध्वेऽपवर्गोर्ध्वेऽवग्रहान्तर एव च ।
वाक्यान्ते तु विरामश्च सार्धमात्रः प्रकीर्तितः ॥
पदप्रणवयोर्नित्यं विरामः स्याद् द्विमात्रिकः ॥[२७]

याज्ञवल्कीये तु अवग्रहे अर्धमात्रिक एव विराम उक्तः । मन्त्रान्ते प्रयुज्यमानस्य ओङ्कारस्य । मन्त्रान्त्यस्य च मध्ये द्विमात्रिको विरामः कार्यमिति प्रतिपादितम् । अयमाशयो यत् मन्त्रादौ मन्त्रान्ते वेति उभयत्र ओं प्रयुज्यते । एतच्च इहैव शिक्षायामुक्तम् ।

अध्यायस्य मुखे चान्ते भूत्वा विद्वानतिन्द्रितः ।
संरक्षणाय वेदानां सोङ्कारन्तूच्यते तदा ॥[२८]

अनुमोदितश्चैतन्मनुनापि तत्र च -

ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा ।
क्षरत्यनोङ् कृतं पूर्वं परत्र च विशीर्यते ॥[२९]

मन्त्रादौ प्रयुज्यमानस्य प्रणवस्यान्ते सार्धमात्रिकः । मन्त्रान्ते प्रयुज्यमानस्य च प्रणवस्यादौ द्विमात्रिको विरामः इति । ऋक्तन्त्रे च विरामनियम एवमुक्तः । वर्णान्तरं परमाणुः, स्वरयोर्मात्रा, विरामे मात्रा, नित्यविरामे द्विमात्रम् । गाथासु त्रिमात्रं सामसु (चतुर्थदशकः)

एवं शिक्षान्तरेऽपि विरामनियम उक्तः । स च अत्र विस्तरभिया न

प्रदर्श्यते । उक्ते च विरामनियमे यत्र कुत्रापि विरोधः प्रसज्येत स सर्वोऽपि शाखाभेदपरतया निरसनीयः । इदम् अवधेयं यत् शिक्षाणाम् वेदाङ्गतया अत्र प्रतिपादिताः विरामनियमाः अपि विशेषतः वेदाध्ययने एव प्रसज्यन्ते । अतः न तान् यत्र कुत्रापि भाषायां प्रसज्य विरोधः उद्भावनीयः । वेदेऽपि बहव्यः शाखाः सन्ति इति तत्रापि विरोधोद्भावनं नोचितम् । शाखाभेदपरत्वेन परस्परविरुद्धविरामादिनियमप्रतिपादकशिक्षादीनां सङ्गते सुवचत्वात् । एवं रीत्या यथा प्रतिज्ञातं वर्णवर्णांशविरामकालाः संक्षिप्य बोधिताः ।

मात्रापरिमाणम् :-

एतावत्पर्यन्तं यो ह्रस्वादीनां मात्रादिकालः उक्तः तत्र कियान् कालो मात्राकालः इति विचारणायामुक्तं याज्ञवल्क्यशिक्षायाम् -

निमेषो मात्राकालः स्याद् विद्युत्कालस्तथा परे ।
अक्षरात्तुल्ययोगाच्च मतिः स्यात्सोमशर्मणः ।।[३०]

एतेनेदमायातं यन्निमेषपतनोपलक्षितः विद्युत्स्फुरणोपलक्षितो वा यावान् कालः तावान्मात्राकालः एतावति काले उच्चार्यमाणो वर्णः मात्रिकः । ततो द्विगुणः विमात्राकालः । तत एकगुणस्त्रिमात्राकालः । अस्या एव मात्रायाः चतुर्थांशः अणुमात्राशब्देनोच्यते । अणोरपि परिमाणं तत्रैव उक्तम् ।

सूर्यरश्मिप्रतीकाशात्कणिका यत्र दृश्यते ।
अणुत्वस्य च सा मात्रा मात्रा च चतुराणवा ।।

मात्रिकाक्षरस्य मूलाधारात् उद्गमनतः मुखबहिनिर्गमनपर्यन्तं मात्राकालोपेक्षितः वर्णाश्च मूलाधारात् हृदयदेशं, ततः कण्ठं ततो जिह्वाग्रमागत्य मुखाद्बहिर्निर्गच्छति । एषु च स्थानेषु मात्रिकवर्णस्य आगमने मात्रायाः कियानंशो व्याप्रियते इत्यत्र स्फुटीकृतम् ।

मानसे चाणवः विद्यात्कण्ठे विद्यात् द्विराणवम् ।
त्रिराणवं तु जिह्वाग्रे निःसृतं मात्रिकं विदुः ।।

अस्यायमाशयो उपर्युक्तेषु चतुर्षु व्यापारेषु प्रतिव्यापारमणुकालो भवति। एवं रीत्या अणुचतुष्टयेन मुखान्निर्गतो वर्णो मात्रिक उच्यते ।

वर्णरत्नप्रदीपिकायां तु मात्राया: चतुर्थांशस्य अणुमात्रत्वम् । (अस्या: कारिकाया: शिक्षावल्लीव्याख्यायाम् अमरनाथशास्त्रिभि: इत्थं व्याख्या कृता यत्र सूर्यरश्मे: प्रतीकाश: प्रकाश:, तम्प्राप्येति ल्यब्लोपे पञ्चमी । कणिका सूक्ष्मरजो: दृश्यते सा अणुत्वस्य मात्रापरिमाणम् । अयमाशय: यथा निमेषो मात्राकाल: इत्यत्र निमेषशब्देन अक्षिस्पन्दनकालो लक्ष्यते तथा अत्रापि कणिका पदेन गवाक्षप्रविष्ट- सूर्यरश्मिकणिकसम्पर्कात् परिदृश्यमानसूक्ष्मरज: कणिका स्पन्दनकालो बोध्य:। यथा बालुकाघटिकायां परिमित तावद् बालुकापोतेन कालविशेषो बोध्यते । तथा च अत्र निरूक्तकणिकापातेन अणुकालो बोधव्य:। तेन अत्र अणुशब्देन वैशेषिकं पौराणिकाद् तस्य षष्ठतमो भाग: तस्य त्रिंशतमो भाग इत्यादि: रूपो ग्राह्य: । व्यञ्जनं चार्धमात्रकम् । तदर्धमणु तस्यार्धं परमाण्वभिधीयते। अर्थात् मात्राया: योऽष्टमांश: स परमाणुमात्रा इत्युच्यते । एतद् याज्ञवल्क्येन दर्शितम् । नारदीयशिक्षायां मात्राकालस्य परिमाणमित्थं निर्दिष्टम् ।

निमेषकालो मात्रा स्याद् विद्युत्कालेति चापरे ।
ऋक्स्वरा तुल्ययोगा वा मतिस्स्यात्सोमशर्मण: ।।[३१]

शम्भुशिक्षायामपि मात्राचतुर्थांशस्य अणुमात्रत्वमुक्तम् ।

चतुर्भिरणुर्मात्रा परिमाणमिति स्मृतम् ।

माण्डूक्यशिक्षायामपि इत्थमेव मात्राया: परिमाणमुक्तम् ।

अक्ष्णोर्निमेषमात्रेण यो वर्ण: समुदीर्यते ।
स एकमात्रो द्विस्तावान् दीर्घस्त्रि: प्लुत उच्यते ।।

व्यासशिक्षायामपि यावति काले अङ्गुलिस्फोटनं भवति ,

कालोऽतिसूक्ष्मकोऽणु: स्यान्मात्रार्धव्यक्तिमात्रिकम् ।
अङ्गुलिस्फोटने यावान् तावान्कालस्तु मात्रिक: ।।

अर्थात् अङ्गुलिस्फोटनजन्यध्वने: यावान् काल: तावान् मात्राकाल:। तच्चतुर्थांशभूता अणुमात्रा एव अतिसूक्ष्मकाल: । अर्धमात्राकालतश्च व्यक्तकालेति व्यवहार इत्यभिहितम् । अत्र मात्राचतुर्थांश एव कालविभागस्य चरमसीमा स्वीकृता । वर्णरत्नप्रदीपिकायान्तु मात्राष्टमांशपर्यन्तं मात्राविभाग: प्रदर्शित: ।

ऋक्तन्त्रे तु मात्रार्धस्यैव अणुत्वमुक्तम् । यद्यपि पाणिनीयशिक्षायां मात्रापरिणाम विषये न किमपि उट्टङ्कितम् । तथापि याज्ञवल्क्यशिक्षोक्ताः मात्राकालिकशब्दानां निदर्शनभूताः चाषादिशब्दाः इहापि मात्राकालिकादिशब्दनिदर्शनत्वेनोक्ताः । अतो मात्रापरिमाणविषये पूर्वोक्त एव विचारः पाणिनीयानां सम्मत इति मन्ये । मात्राद्विमात्रात्रिमात्राकालिकशब्दानां यथाक्रमं चाषकाककलापिनकुलानां स्वाभाविकाः शब्दाः निदर्शनानि । एते प्राणिविशेषा यावति काले शब्दं कुर्वते तावान्काले मात्रादिः , तावति काले उच्चार्यमाणो वर्णः मात्रिकादिः । एतच्च बहुषु शिक्षासु प्रदर्शितम् ।

वर्णकालविचारस्य मध्यमवृत्यनुरोधिता :-

अयञ्च सर्वोऽपि कालविचारः मध्यमां वृत्तिमाश्रित्य शिक्षाकारैः कृतो विद्यते । एतच्च व्यासशिक्षा कालनिर्णयशिक्षयोः स्पष्टमेवोक्तम् । उक्तञ्च - प्रातिशाख्यादिषु ह्यत्र वृत्तिस्साप्यवलम्बिता ।। व्यासशिक्षायां कालनिर्णयः -

मध्यमां वृत्तिमाश्रित्य मया चेयं कृतिः कृता ।
प्रातिशाख्ये निषिद्धान्ये यस्मात्शैवेव बोध्यते ।।

अयं भावः यद् शब्दानां तिस्रः वृत्तयः, उच्चारणगतयः सन्ति । द्रुता, मध्या, विलम्विता चेति । आसु च उत्तरोत्तरं कालाधिक्यम् । तथाहि द्रुतापेक्षया मध्यमायां द्रुतवृत्तिकालस्य यः तृतीयांशः तदधिककालो भवति। एवं मध्यमवृत्यपेक्षया विलम्बितायां तत्कालस्य तृतीयांशेन अधिकः कालो भवति । अर्थात् यः श्लोकः द्रुतवृत्तौ वक्त्रा नवसु पलेषु उच्यते । तस्यैव श्लोकस्य मध्यमवृत्तौ उच्चारणे द्वादशपलानि, विलम्बितवृत्तौ उच्चारणे तु षोडशपलानि भवन्ति । स्पष्टञ्चेदं तपरस्तत्कालस्य[३२] इति सूत्रे भाष्ये ।

एवं स्थितौ द्रुतादिवृत्तिभेदे सति वर्णानां कालभेदात् सामान्यतो वर्णकालः वक्तुं न शक्यते । अतः यां काञ्चित् वृत्तिमादाय वर्णकालो निर्णेयः। तदनुरोधेन च वृत्यन्तरे कालस्य न्यूनाधिकता योजनीया इति मत्वा मध्यमवृत्तिमादाय वर्णकालो निर्दिष्टः शिक्षाग्रन्थेषु । यतः सा वृत्तिः शास्त्रेषु प्रशस्तत्वेन स्वीकृता पूर्वोक्तमात्राकालादिपरिमाणं चाषादिशब्दैःमात्रादिकालानां निदर्शनं चेति द्वयमपि मध्यमवृत्यनुरोधेन स्वीकार्यम् । एतत्परिमाणानुसारमेव

द्रुतविलम्बितयोरपि मात्रादीनां परिमाणमुक्तरीत्या ऊह्यम् । वस्तुत: शाब्दिकमते द्रुतादिवृत्तिभेदेऽपि न वर्णानां कालो भिद्यते । वृत्तिभेदस्तु वर्णाभिव्यक्त्युत्तरं जायमानेन वैकृतध्वनिना भवति वर्णस्तु यावान् द्रुतवृत्तौ तावानेव वृत्यन्तरेऽपि, ह्रस्वादिषु तु वर्णकाल: भिद्यते एव । यत: एतत् सिद्धान्तेन वर्णा: नित्या: कालपरिच्छेदसहिता एव । ह्रस्वादिव्यवहारश्च व्यञ्जकध्वनिकालारोपेणैव स्वीक्रियते । शब्दव्यक्तौ उपयोगिभूतञ्च ध्वनिद्वयं प्राकृतौ वैकृतश्च । तत्र प्राकृत: शब्दस्य व्यञ्जक: वैकृतस्तु प्राकृतेन व्यक्तस्य शब्दस्य चिराचिरमुपलब्धौ द्रुतादिवृत्तिभेदे कारणभूत: शब्दाभिक्युक्त्तरं जायमानश्च । यदुक्तं वाक्यपदीये-

स्फोटस्य ग्रहणे हेतु: प्राकृतो ध्वनिरिष्यते ।
वृत्तिभेदे निमित्तत्वं वैकृत: प्रतिपद्यते ।।[३३]

इत्थं च प्राकृतध्वनेरेव वर्णाभिव्यक्तिपूर्वकालिकतया अन्तरङ्गत्वेन तस्यैव काल: वर्णेषु आरोप्यते । ह्रस्वदीर्घादिषु हि प्राकृतध्वनावेव कालभेदेन वर्णेष्वपि कालभेद: स्वीक्रियते । वृत्तिभेदेऽपि प्राकृतध्वनौ कालभेदाभावात् न वर्णकाल: भिद्यते । किन्तु उपलब्धेरेव चिराचिरत्वं भवति । स्पष्टमेतत् हरिग्रन्थे -

स्वभावभेदान्नित्यत्वे ह्रस्वदीर्घप्लुतादिषु ।
प्राकृतस्य ध्वने: काल: शब्दस्येत्युपचर्यते ।।
शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृता: ।।
ध्वनय: समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ।।[३४]

यथा घण्टादिषु शब्देषु अल्पप्रयत्नेन ताडने अल्पकालमेव अनुरणनात्मको नाद: तिष्ठति । बलात्ताडने चिरकालपर्यन्तं इति अनुरणनात्मकस्यैव नादस्य चिराचिरकालिकता रणनात्मकस्य अर्थात् प्राथमिकस्य "टन्"इति शब्दस्य तु एक एव काल: । एवं स्थितौ नित्येषु वर्णेषु कालपरिच्छेदासम्भवेन तद् व्यञ्जकस्य प्राकृतध्वनेरेव मात्रादिकालिकत्वे स्वीक्रियमाणे तस्य च ध्वने: वृत्तिभेदेऽपि कालभेदाभावात् वृत्तित्रयसाधारण्येन अयं कालविचार: युक्त एव। अधिकं शब्दोत्पत्तिप्रकरणे विवेचयिष्यते । स्पष्टं चैतत्सर्वं तपरस्तत्कालस्य इति महाभाष्यप्रदीपोद्योतेषु । यथा - द्रुतायां

तपरकरणे मध्यमविलम्बितयोरुप संख्यानं कालभेदात् । सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनात् वृत्तयो विशिष्यन्ते इत्यादि [३५]।

आधुनिकभाषाविन्मतम् -

अत्र पाश्चात्यभाषाविज्ञानवासनावासितचेतसः शिक्षाप्रातिशाख्याद्युक्तः वर्णकालविचारः । अयथार्थयन्तः केचन आधुनिकाः भाषादिवस्तु ध्वनेः त्रयः गुणाः, मात्रा, स्वरः , आघात इति । तत्र वर्णस्योच्चारणे यः कालः व्याप्रियते स एव मात्रा । तस्य च यद्यपि यन्त्रेषु परीक्षणे अनन्ताः विभागाः कर्तुं शक्यन्ते तथापि वर्णकालः सामान्यतः पञ्चधा विभज्यते । ह्रस्वार्धम् , ह्रस्वः, दीर्घः, ईषद्दीर्घः, प्लुतश्चेति शिक्षाशास्त्रादिषु तु अर्धमात्रा, ह्रस्वः, दीर्घः, प्लुश्चैव चतुर्धैव विभागः कृतः इति न्यूनता। व्यञ्जनेषु च सर्वेषां व्यञ्जनानां न समाना मात्राः किन्तु अनुनासिकव्यञ्जनेषु व्यञ्जनान्तरापेक्षया अधिकः कालः, ततः अल्पः लुण्ठितेषु पार्श्विकेषु च व्यञ्जनेषु, ततः उष्मासु, ततः संघर्षिषु , ततः घोषस्पर्शेषु । सामान्यतस्तु ह्रस्वार्धमात्रिकं व्यंञ्जनं स्वीकृतम् भारतीयभाषाशास्त्रेषु । ह्रस्वदीर्घप्लुतानां तु मात्रा निर्णयः कर्तुं न शक्यते । यतः निकटध्वनेः, बलाघातस्य वा प्रभावेण न सर्वत्र ह्रस्वः दीर्घो वा एकरूपः, क्वचिद् दीर्घएव वर्णः द्विमात्रिकः क्वचिन्न ततो न्यूनकाले , अधिककाले उच्चार्यते ।

एवं ह्रस्वोऽपि न सर्वत्र मात्रिको भवति किन्तु उपर्युक्तकारणेन ह्रस्वस्यापि क्वचिन्नन्यूनता ,आधिक्यञ्च । भारतीयशिक्षाशास्त्रेषु एकदा अङ्गुलिकस्फोटने यावान् समयः तावान् ह्रस्वस्य उच्चारणे लगति, ततो द्विगुणः दीर्घे । तत एकगुणः प्लुते इत्यादिरीत्या निश्चितः कालः उक्तः । परन्तु एतन्निर्णयस्य अप्रामाणिकता उपर्युक्तविवेचितेन स्पष्टता । यतः ह्रस्वे यावान् समयः न ततो द्विगुणः सर्वत्र दीर्घोच्चारणे किन्तु कुत्रचिद् अधिकः कुत्रचिन्न्यूनश्च । अत एव उपर्युक्तवर्णकालविभागे इषद्दीर्घ इति उक्तम् । एवं न सम्यक्तया दीर्घादिकगुणः प्लुते समयः । यतः प्लुतस्य प्रयोगः सम्बोधने भवति । यदि कश्चिद् अतिदूरतः सम्बोधयति तदा अन्तिमस्वरस्य प्लुतस्यापि त्रिमात्रा कालादधिक एव समयः । श्रुतौ अनुमीयते इति यद् वदन्ति ।

लिखितञ्च भाषाविन्मन्यैः रामलालसिंहः देवेन्द्रनाथशर्माप्रभृतिभिः स्व स्वग्रन्थेषु । तदेतत्सर्वं सत्यपि शिक्षाशास्त्ररहस्यानवबोधमूलकमेवेति पश्यामः । यतः यतः शिक्षाशास्त्रेषु नेदं प्रतिपादितं यत् कस्यां परिस्थितौ कस्य वर्णस्य कियान् कालः भवति इति किन्तु शास्त्रेषु शास्त्रीयत्वेन स्वीक्रियमाणानां वर्णानां कियान् काल इत्येव निर्णीतम् । यदपि पञ्चधा कालविभागेन शिक्षाद्युक्तकालविभागस्य न्यूनत्वप्रदर्शनं तदपि अयुक्तमेव । यतः नहि अस्माकं शिक्षा ग्रन्थे त्रयः चत्वारः एव वा वर्णकालाः स्वीकृताः, किन्तु परमाणुः, अणुः, अर्धमात्रा, पादोनमात्रा, मात्रा, सपादमात्रा, द्विमात्रा, त्रिमात्रा, इत्येवं रीत्या बहुविधाः वर्णकालाः स्वीकृताः । एतच्च प्रागुक्तवर्णकालनिर्णयावलोकनेन स्पष्टमेव, अपि च परिस्थित्यादिविशेषवशेन वर्णकालस्य न्यूनाधिकत्वम् । अनवस्थितत्वम् । इच्छतामेतेषां भाषाविदां पञ्चधा कालविभाजमपि कथं समीचीनमिति तैरेव विभावनीयम् ।

यदपि व्यञ्जनानाम् असमानकालिकत्वात् अङ्गीकृत्य शिक्षाद्युक्तस्य समान्यतो व्यञ्जनानाम् अर्धमात्राकालिकत्वस्य ह्रस्वदीर्घादीनां कालपरिमाणस्य च भ्रमविषयत्वकथनं तदपि तुच्छमेव यतः कस्यापि स्वरस्य कियत्यपि काले उच्चारणं भवेन्नाम । न हि अस्य स्वरस्य इयत्येव काले उच्चारणं भवति इति शिक्षाकारैः नियम्यते किन्तु यस्य स्वरस्य इयत्काले उच्चारणं तस्यैव तत्तच्छब्द वाच्यव्यपदेश्यत्वमित्येव बोध्यते यथा यः स्वरः एक मात्रिकः स एव ह्रस्वः, यश्च ततो न्यूनाधिकमात्राः ततोऽपि स्वरः भवेन्नाम परन्तु स नास्माकं शास्त्रे ह्रस्वशब्देनोच्यते । एवं यस्य ह्रस्वकालाद् द्विगुणकालः द्विगुण एव उच्चारणं स एव दीर्घः , एवं दीर्घकालात् एकगुणकाले यस्य स्वरस्य उच्चारणं स एव प्लुतः अतो न्यूनाधिककाले उच्चारणसम्भवेऽपि न तस्य अस्माकं निकाये दीर्घत्वं प्लुतत्वं वा । कुतो दीर्घस्य प्लुतस्य वा द्विमात्राकालात् न्यूनाधिककाले उच्चारणम् । न्यूनाधिककाले उच्चार्यमाणेषु तेषु दीर्घादिशब्दव्यपदेशस्यैव अनङ्गीकारात् । एवं व्यञ्जनविषयोऽपि व्यञ्जनानामर्धमात्राकालतो न्यूनाधिककाले उच्चारणस्य सम्भवेऽपि अर्धमात्राकालतो न्यूनाधिककाले उच्चारणस्य सम्भवेऽपि अर्धमात्राकाले उच्चारितानामेव तेषामिह शास्त्रीयता स्वीक्रियते । इत्थञ्च यथा

व्याकरणं सत्स्वेव साध्वसाधुशब्देषु के शास्त्रीया इत्येवं निर्णयं करोति । न तु ये शास्त्रीया: त एव शब्दा: सन्ति इति । तथैव शिक्षाशास्त्रमपि परमाणुमात्राकालत: अधिकाधिककालपर्यन्तं वर्णेषु सम्भवेष्वपि तत्र कियति कियति काले उच्चार्यमाणानां वर्णानां शास्त्रीयता इत्येव निर्णयति न तु तावत्कालिका एव वर्णा: सन्ति तदभिप्राय: इति कृतं भारतीयशिक्षाशास्त्रोक्त कालविचारे कटाक्षनिक्षेपै: । इति शम् ।

पादटिप्पणी

१- पाणिनीयशिक्षा २५

२-शैशरीयशिक्षा

३-पा०शि० ११

४-पाणिनीयशिक्षा

५-पाणिनीयशिक्षा

६- पा०शि०२८

७- पाणिनीयशिक्षा

८- वर्णरत्नप्रदीपिका

९- मल्लशिक्षा

१०- लोमशशिक्षा

११-माण्डूक्यशिक्षा १/१३ अध्याये ।

१२- शैशरीयशिक्षा

१३-कौहलीयशिक्षा

१४-पारिशिक्षा

१५- शम्भुशिक्षा

१६- व्यासशिक्षा

१७-पा.सू.८/३/२३

१८-सं.सं.शि.

१९- महाभाष्यम् १.१.१
२०- पाणिनीयशिक्षाप्रकाशः
२१-प्रा०पा०उब्बट भाष्यम् १/७३)
२२- पा०सू०१.१.४८
२३-याज्ञवल्क्यशिक्षा
२४-कालनिर्णयशिक्षा
२५-कौहलीयशिक्षा
२६- याज्ञवल्क्यशिक्षा
२७-व्यासशिक्षा
२८-याज्ञवल्क्यशिक्षा
२९- मनुस्मृतिः
३०-याज्ञवल्क्यशिक्षा
३१- नारदीयशिक्षा
३२- पाणिनिसूत्रम् १.१.७०
३३- वाक्यपदीयम् १ब्रह्मकाण्डम्
३४- वाक्यपदीयम् १ब्रह्मकाण्डम्
३५- म.भा.१.१.७०.पा.सू.

चतुर्थोऽध्यायः

वर्णानां स्थानविवेचनम्

चतुर्थोऽध्याय:

वर्णानां स्थानविवेचनम्

वाग्यन्त्रम् -:

स्थानादीनां समूहभूत: वर्णनिष्पत्तौ उपयुज्यमान: य: शरीरस्य भागविशेष: स एव वाग्यन्त्रं भाषायन्त्रमिति वा वक्तुं शक्यते। अथ सामान्यत: वाग्यन्त्रस्य परिचय: आधुनिकभाषाविन्मतमनुरुध्यदीयते। पश्चात् कस्य वर्णस्य किं स्थानमित्यादिविशेषतो विवेचयिष्यते। ध्वन्युत्पादने उपयोगिभूता: हृदयत: ओष्ठपर्यन्ता: केचन वाग्यन्त्रावयवा: यथा -

१.हृदयम्	२. श्वासनलिका
३. कण्ठपिटक:	४. स्वरतन्त्री
५. काकल:	६. अभिकाकल:
७. गलबिलम्	८.नासिकाविवरम्
९.मुखविवरम्	१०.कण्ठ:
११. तालु	१२. मूर्धा
१३. वर्त्सम्	१४. दन्ता:
१५. ओष्ठौ	इति।

ध्वनीनां आधारभूत: प्राणवायुरेवास्ति। अयञ्च हृदयस्थानात् उद्गत्य श्वासनलिकायां प्रविश्य श्वासनलिकाया:पश्चात् स्थितेन स्वरयन्त्रेण प्रथमं रुध्यते। इदञ्च स्थलदृशा वस्तुतोऽस्मत्सिद्धान्तेन शब्दनिष्पादकस्य वायो: नाभेरप्यध: स्थानात् मूलाधारादेव उद्गम:।

मूलाधारात्प्रथमुदितो यस्तु भाव: पराख्य:।
पश्चात्पश्यन्त्यथ हृदयगो बुद्धियुङ्मध्यमाख्य:।
वक्त्रे वैखर्यथ रुरुदिषोरस्य सुषुम्ना।
वद्धस्तस्मात् भवति पवनप्रेरितो वर्णसङ्घ:॥[१]

एतच्च शब्दोत्पत्तिप्रकरणे विशदयिष्यते। श्वासनलिका हृदयत:(फेफड़ा इति भाषायाम्) कण्ठपर्यन्तं प्रस्तुता एका नलिका वर्तते। हृदयत: उद्गत: प्राणश्च अस्यामेव प्रविश्य स्वरयन्त्रे कण्ठपिटके चायाति , तत्रैव अवरुध्यते।

ततो गलविलप्रदेशात् मुखविवरतः नासाविवरतः उभयतो वा बहिर्निर्गच्छति । मुखरन्ध्रे प्रवेशानन्तरञ्च नानास्थानैः तस्य संघर्षः भवति । अनेनैव संघर्षेण नानाविधीनां ध्वनीनां उत्पत्तिः । श्वासनलिकायाः पृष्ठतः एका भोजननलिका वर्तते या आमाशयपर्यन्तं विस्तीर्णा । इयमेव नलिका अन्नपानीयादिकमामाशयं प्रापयति । श्वासनलिकाभोजननलिकयोःमध्ये जवनिका कल्पमेकं वस्तु विवर्तते । भोजननलिकाविवरतः श्वासनलिकां प्रतिलम्बिता एका जिह्विका अर्थात् लघुजिह्वा या अभिकाकल इति उच्यते । अभिकाकलमनु चत्वारो मार्गाः वर्तन्ते । भोजननलिका, श्वासनलिका, मुखविवरं नासाविवरञ्च ।

अत्रैव मुखविवरनासाविवरयोर्मध्ये लम्बमाना मांसस्य घण्टिका कल्पा एका अलिजिह्वा वर्तते । सा च भोजनसमये मुखविवरेण श्वासनलिकायाः सम्बन्धं विच्छिनत्ति । अत एव भोजनसमये भाषणहसनादिकृते श्वासनलिकायाः मुखविवरेण सम्बन्धात् कदाचित् अन्नपानीयादिकं तत्र प्रविश्य प्राणान्तिकमवस्थां करोति । अस्याः अलिजिह्वायाः उच्चारणसमये प्रयत्नानुसारं तिस्रः अवस्थाः भवन्ति । यदा इयं पूर्णतया उत्थिता भवति तदा नासिकाविवरस्य मुखं मुद्रयते । तस्यामवस्थायां सर्वोऽपि वायुः मुखविवरादेव निर्गच्छति । तदा निरनुनासिका ध्वनयः उत्पद्यन्ते । यदा च इयं शिथिलीभूय अधो लम्बिता सतीमुखविवारं पिदधाति तदा अशेषोऽपि श्वासः नासाविवरादेव निर्गमनमाप्नोति । अस्यामवस्थायां नासिक्यध्वनीनामुच्चारणम् ।

यदा च अस्याः मध्यावस्था भवति तदा श्वासवायोः कश्चिदंशः मुखतः कश्चिश्च नासातः निर्गच्छति इति मुखनासिकावचनानां ध्वनीनामुत्पत्तिः । श्वासनलिकायाः उपरिष्टात् ध्वन्युत्पादकेषु प्रधानः शरीरावयवः अस्ति । यच्च स्वरयन्त्रमुच्यते । अस्य आकृतिः अत्यल्पपिटवत् । इदमेव ध्वन्युत्पादनस्य केन्द्रम् । अत्र द्वे स्वतन्त्री वर्तेते । इदं तन्त्रीद्वयमग्रे संयुतं पृष्ठतश्च विभक्तं वर्तते । चतस्रः अवस्थाः भवन्ति । आद्यावस्थायां तन्त्रीद्वयस्य मध्ये त्रिभुजाकारः अवकाशः अस्यां अवस्थायामघोषवर्णानां उच्चारणं क्रियते । यदा तन्त्रीद्वयं परस्परसमीपस्थं भवति तदा प्राणः संघर्षपूर्वकं निर्गच्छति । अस्यामवस्थायां घोषध्वनीनामुच्चारणं भवति । यदा उभेऽपि तन्त्र्यौ परस्परं संलग्ने भवतः

तदा प्राणस्य निर्गमः अवरुध्यते । अस्यामवस्थायां यो ध्वनिविशेष उत्पद्यते सः (क्लिक्) ध्वनिरित्युच्यते । यदा संलग्नयोरपि तन्त्रयोः अधस्तनः चतुर्थांशः विभक्तः तस्यामवस्थायामस्पष्टध्वनीनामुच्चारणम् ।

एवञ्च दूरस्थता, समीपस्थता, पूर्णसंलग्नता, ईषत्संलग्नता चेति अवस्थाचतुष्टयं तन्त्रयोः । स्वतन्त्रयोः मध्यस्थः अवकाशः स्वरयन्त्रस्य मुखप्रदेशो वा काकल इति उच्यते । अस्यैव संकोचविकासौ संवारविवारौ इच्युच्यते । जिह्वामूलस्याधस्तात् उत्थितः एकः मांसलभागो वर्तते यः अभिकाकल इति । स्वरयन्त्रावरण इति वा कथ्यते । अस्य यत्कार्यं तद् उपरिष्टादुक्तमेव । नाशारन्ध्रस्य अभिकाकलस्य च मध्ये जिह्वामूलमनु योऽवकाशः स गलबिलम् । अस्माद् गलविलादारभ्य कण्ठपिटकपर्यन्तं श्वासमार्गः शब्दोत्पत्तिसमये अनवरुद्धो भवति, परन्तु भोजनसमये अयं मार्गः उपर्युक्तेन अभिकाकलेन पिधीयते । इदं गलबिलम् एकतः मुखविवरेण अपरतश्च नासाविवरेण सम्बद्धम् । श्वासवायुश्च इदमेव उल्लंघ्य अलिजिह्वास्थित्यनुसारेण कदाचिद् मुखविवरतः कदाचिच्च नासाविवरतः निर्गममाप्नोति । मुखविवरस्य मुखे एव योऽतिकोमलः मांसलभागः स एव । कोमलंतालु । पूर्वोक्ता अलिजिह्वा च अस्यैव अग्रभागः । इदमेव कोमलतालु कण्ठस्थानमुच्यते । अत ऊर्ध्वं यथाक्रमं मुखविवरे मूर्धतालुवर्त्सदन्तोष्ठप्रभृतीनां तत्तत्स्थानानां स्पर्शो भवति । एवं रीत्या संक्षिप्य वाग्यन्त्रस्य स्थितिरुक्ता ।

स्थानशब्दार्थः —:

अथ वर्णस्थानविचारः शिक्षाद्यनुसारमुपस्थाप्यते । तिष्ठति यत्र वर्णोत्पादको वायुः तद् इति व्युत्पत्त्या 'ष्ठा'[२] गतिनिवृत्तौ इति गत्यवरोधार्थात् स्थाधातोः" करणाधिकरणयोश्च [३]' इति करणल्युटा स्थानशब्दो निष्पद्यते अर्थात् शब्दोच्चारणसमये तत्र ताल्वादिषु अभिघातेन वायोः गतिः अवरुध्यते । तत्स्थानमुच्यते । वाय्वभिघाते कारणञ्च जिह्वादिभिः वायुर्निर्गमनमार्गे व्यवधायकतैव । एवञ्च ताल्वादीनि वर्णोत्पादकवायोरेव स्थानानि न तु वर्णानाम् । वर्णस्थानत्वव्यवहारस्तु औपचारिकः । यदा अवस्थाविशेषविशिष्टस्य वायोरेव वर्णरूपतया युज्यते एव स व्यवहारः । उक्तं च वाक्यपदीये -

लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना ।
स्थानेष्वभिहितो वायुः शब्दत्वं प्रतिपद्यते ।।[४]

अन्यदपि प्रमाणं यथा उक्तं तैत्तिरीयप्रातिशाख्ये "स्वाराणां यत्रोपसंहारः तत्स्थानम् " अन्येषां तु यत्र स्पर्शनमिति । अयमर्थः यत् स्वराणामुच्चारणे जिह्वादीनां यत्र उपसंहारः (सन्निकृष्टता) भवति स्वराणां तत्स्थानम् । स्वेऽन्योऽन्येषां व्यञ्जनानामुच्चारणे जिह्वादिभिर्यत्र स्पर्शो भवति तद् व्यञ्जनानां स्थानम् । इदमत्र बोध्यं यत् स्वराणामस्पृष्टता, व्यञ्जनानां तु स्पृष्टता । अतः स्वरोच्चारणे जिह्वायाः ताल्वादीनां च सन्निकृष्टतामात्रं भवति न तु स्पर्शः व्यञ्जनोच्चारणे तु स्पर्शः इति विशेषः । अत एव स्वरव्यञ्जनयोः स्थानमुपर्युक्तप्रातिशाख्ये पृथक् पृथक् परिभाषितम् । एतदेव पारिशिक्षायामपि प्रोक्तम् -

अचां यत्रोपसंहारस्तत्स्थानं क्रियतेऽत्र तु ।
व्यञ्जनान्तु तत्स्थानं स्पर्शनं क्रियते तदा ।।[५]

सूत्रात्मकपाणिनिशिक्षायामापिशलशिक्षायाञ्चापि इह यत्र स्थाने वर्णा उपलभ्यन्ते तत्स्थानमित्युक्तम् । पाणिनिशिक्षायां तु स्थानं न परिभाषितम् ।

वर्णस्थानानि —ः

अथ पाणिनीयशिक्षाकर्तुः सिद्धान्तेन वर्णानां स्थानानि विविच्यन्ते। एतन्मते -

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ।।
कण्ठ्यावहाविचुयशास्तालब्या ओष्ठजावुपू ।
स्युमूर्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः ।।
जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठयोः वः स्मृतो बुधे ।
ए ऐ तु कण्ठतालब्या ओ औ कण्ठोष्ठजो स्मृतौ ।।[६]

उरः, कण्ठः, शिरः, मूर्धा, दन्ताः, ओष्ठौ, तालु, नासिक चेति अष्टौ वर्णस्थानानि । एषु च स्थानेषु आद्यन्तस्थाने आस्यात् बहिर्भूते । अस्याञ्च ओष्ठादारभ्य काकलपर्यन्तमुरसः ईदृशास्यबर्हिभूतत्वं तु निर्विवादमेव ।

नासिका आस्यबर्हिभूतत्वं तु विवादग्रस्तम्। तथाहि 'तुल्यास्य प्रयत्नं सर्वणम्'[7] इति सूत्र महाभाष्यप्रदीपे वर्णोत्पादकस्य नासिकास्थानस्य आस्यान्तर्गततत्वमेव प्रतिपादितं कैयटेन। इदञ्च कैयटस्य स्वमतं मतान्तरोल्लेखो वा इति चिन्त्यम्। वस्तुतस्तु मुखनासिकावचनोऽनुनासिकः इति सूत्रे मुखनासिकाशब्दे मुखञ्च नासिका च इति विग्रहप्रदर्शनपरस्य, तत्रैव सूत्रे अनुनासिकवर्णविषये प्रासादवासिन्यायप्रदर्शनपरस्य च भाष्यस्य, एवं तुल्यास्यप्रयत्नमित्यत्र आस्यस्य स्थानविशेषणार्थकत्वप्रतिपादनपरस्य भाष्यस्य च स्वारस्येन नासिकायाः आस्यबाह्यत्वमेव स्वीकर्तुमुचितम्। विशदीकृतञ्च एतत्सर्वं तुल्यास्य प्रयत्नं सर्वणम् इत्यत्र बृहच्छब्देन्दुशेखरे।

नासिकायाः उरसश्च अवशिष्टानि षट्स्थानानि आस्यान्तर्गतानि। यद्यपि पाणिनिशिक्षायां किं स्थानमास्यान्तर्गतं किञ्च आस्यानन्तर्गतम् इति लिखितम्। तथापि नासिकादेः आस्यान्तर्गततत्वेन सवर्णसंज्ञानुपयोगिता, आस्यान्तर्गतानामेव च स्थानानां सावर्ण्योपयोगिता इति वर्णानां परस्परसावर्ण्य उपयोगितया अयं स्थानानामास्यान्तर्गतत्वान्तर्गत्वविचारो लिखितः।

पाणिनीयशिक्षायामपि आनुनासिकस्य अनुप्रदानेषु गणनया ध्वनितमेव नासिकायाः आस्यबाह्यत्वम्। एषु अष्टसु स्थानेषु पाणिनीयशिक्षानुसारं पञ्चमान्तस्थसंयुक्तस्य हकारस्य उरः, असंयुक्तस्य तु कण्ठः एवम् अकारस्य कण्ठः, इचुयशानां तालु, ऋटुरषाणां शिरः (मूर्धा) लृतुलसानां दन्ताः, उकारपवर्गाणामोष्ठौ, कवर्गस्य जिह्वामूलम्, वकारस्य दन्तोष्ठम्, एदैतोः कण्ठतालु, ओदौतोः कण्ठोष्ठम् स्थानम्। अनुस्वारविसर्ग जिह्वामूलीयो पध्मानीयानामयोगवाहानाम् आश्रयस्थानमेव स्थानम् अर्थात् एतेषां यः आश्रयः तस्य यत्स्थानं तदेव एतेषामपि।

इत्थञ्च जिह्वामूलीयोपध्मानीययोः यथाक्रमं कवर्णपवर्गाश्रितत्वेन जिह्वामूलीयस्य जिह्वामूलीयम्, उपध्मानीयस्य च ओष्ठः स्थानम्। विसर्गस्य तु यः अकाराश्रितो विसर्गः तस्य कण्ठ्यता एवमिकाराद्याश्रितत्वे तालब्यत्वादिकम्। अनुस्वारयमानां नासिकास्थानम्। एवं पवर्गपञ्चमानामपि स्व स्व वर्गीयस्थानेन सह नासिकाऽपि स्थानम्। इदमत्र बोध्यं यत्

अनुस्वारयमपञ्चमानां नासिका स्थानमेव यतः निरनुनासिकानां एषामसम्भवेन विनिगमनाविरहेण मुखनासिकोभयावच्छिन्नस्य वायुसंयोगस्य एतदुत्पादकत्वं व्यक्तम् एवञ्च यथा मुखं स्थानं तथैव नासिका अपि परन्तु पूर्वोक्तरीत्या नासिकायाः आस्यबाह्यत्वेन सवर्णसंज्ञानुपयुक्ततया ककारङकारादीनां तुल्यस्थानित्वमाश्रित्य सवर्णसंज्ञां निर्वहति । प्रोक्तञ्च -

हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम् ।
आस्यं तं विजानीयात् कठ्यमाहुरसंयुतम् ।।
अनुस्वारयमानाञ्च नासिकास्थानमुच्यते ।
अयोगवाहाः विज्ञेयाः आश्रयस्थानभागिनः ।।

अकारादयः स्वराः यवलाश्च यद्यपि सानुनासिकाः तथापि तेषां नासिकास्थानं, निरनुनासिकानामपि तेषां सत्वेन मुखावच्छिन्नवायुसंयोगस्यैव तदुत्पत्तौ कारणत्वं स्वीक्रियते । इति कण्ठादीन्येन स्थानानि अकारादीनां स्वरूपाधायकानि नासिका तु अनुनासिकेषु तेषु नासिक्यरूपं गुणमेव आधत्ते । अर्थात् कण्ठाद्यवच्छिन्नवायुसंयोगेन उत्पन्नेषु अकारादिषु नासिकावच्छिन्नेन वायुसंयोगेन गुणमात्रमाधीयते । यमपञ्चमादिषु न नैव वक्तुं शक्यम् । तेषां निरनुनासिकानां सर्वथा असत्वेन मुखमेव तेषां स्वस्वरूपाधायकं न नासिका इति वैषम्यस्य दुरुपपादत्वात् ।

अत एव पाणिनिशिक्षायाम् 'अनुस्वारयमानां च नासिकास्थानमुच्यते । इति कारिकांशेन अनुस्वरादीनामेव नासिकास्थानिकता प्रतिपादिता । उर्युक्तशिक्षाकारिकायां चकारेण वर्गपञ्चमानां ग्रहणं बोध्यम् । तुल्यास्य.. इति सूत्रे भाष्ये । यथा तृतीयास्तथा पञ्चमाः, आनुनासिक्यमेषां अधिको गुणः' इत्यनेन ग्रन्थेन आनुनासिक्यस्य गुणत्वकथनं तु गुणसादृश्यात् । सादृश्यं च यथा गुणरूपा बाह्यप्रयत्नाः आस्यबाह्याः । सवर्णसंज्ञानुपयुक्ताः आन्तरतम्य परीक्षोपयुक्ताश्च एवं नासिका अपि इति । स्पष्टञ्चैतत् तुल्यास्यप्रयत्नमिति सूत्रे महाभाष्यप्रदीपोद्यते बृहच्छब्देन्दुशेखरे च ।

आपिशलशिक्षायामपि उपर्युक्तान्येव अष्टौ स्थानानि उक्तानि । परन्तु तत्र कवर्गस्य कण्ठस्थानजन्यत्वं प्रतिपादितम् । अन्येषां वर्णानां स्थानविचारः

पाणिनीयशिक्षावदेव एतत्सिद्धान्ते । यच्च पाणिनीयशिक्षायां कवर्गस्य जिह्वामूलीयता दृश्यते न तत् आपिशलशिक्षातो विरुद्धम् । यतः जिह्वामूलात् उपरिस्थि एव देशः कण्ठशब्देन उच्यते । कण्ठ्यानाञ्च वर्णानां कण्ठः स्थानं जिह्वामूलं करणमिति स्थानकरणयोः पार्थक्येन उल्लेखः । आपिशल इत्यादौ कृतः पाणिनीयशिक्षायान्तु स्थानकरणयोः पृथक् पृथक् अनुल्लेखात् करणस्यापि स्थानशब्देनैव उपादानमिति जिह्वामूलस्य स्थानत्वप्रतिपादनम् ।

आपिशलशिक्षायां मतान्तरीयोऽपि वर्णस्थानविचारः उक्तः । स च इत्थम् - हविसर्जनीयावुरस्येकेषाम् । कवर्गवर्णानुस्वारजिह्वामूलीया जिह्वया एकेषाम् । सर्वमुखस्थानमवर्णमेके । रोदन्तमूलस्थानमेकेषाम् । सृक्वस्थानमेके । कण्ठ्यनासिक्यमनुस्वारमेके । यमाश्च नासिक्यजिह्वामूलीया एकेषाम् । एषु च सूत्रेषु एके इत्यादिशब्दोपादानेन एतेषां पक्षाणां स्वाभिमतत्त्वं ग्रन्थकृता बोधितम् । सृक्वस्थानमेकेषामिति सूत्रेण उक्तेभ्योष्टस्थानेभ्यो अतिरिक्तत्वं सृवस्थानमपि स्थानवर्गे समावेशितम् । सृक्वशब्देन ओष्ठयोः प्रान्तभागः उच्यते । इदमेव स्थानं सूत्रात्मकपाणिनीयशिक्षायां सृक्किविणी शब्देन उक्तम् । प्रान्तावोष्ठस्य सृविकणी इति अमरः । इमे च वर्णस्थानविषयकाः पक्षभेदा किं मूलका इति एतत्प्रकरणोपसंहारे विचारयिष्यामः । पाणिनीयशिक्षायान्तु अपसिद्धान्ततया सर्वथैव एते पक्षाः उपेक्षिताः ।

सूत्रात्मकपाणिनीयशिक्षायामपि प्रायः आपिशलशिक्षावदेव स्वमतेन मतान्तरेण च वर्णस्थानानि उक्तानि । सूत्राण्यपि अर्थतः सामान्यानि एव । केवलमिदमेव वैषम्यं यद् आपिशलशिक्षायां तवर्गस्य दन्तमूलीयत्वं नोक्तम् । अत्र तु तवर्गस्य दन्तमूलं स्थानमुक्तम् । वस्तुतः पूर्वोक्तपाणिनीयापिशलशिक्षयोः दन्तशब्देन दन्ताग्रत; दन्तमूलपर्यन्तं सर्वस्यापि भागस्य ग्रहणेन तवर्गस्य दन्तमूलीयत्वमपि नासंगृहीतम् ।

चान्द्रवर्णसूत्रेष्वपि आपिशलशिक्षावदेव स्थानविचारः कृतः । यथा- कण्ठोऽकुहविसर्जनीयानाम् । कण्ठतालुकम् इदेदैताम्, । कण्ठोष्ठम् उदोदौताम् । मूर्धा ऋटुरषाणाम् । दन्ताः लृतुलसानाम् । नासिकानुस्वारस्य । स्वस्थाननासिका ङञणनमाः। ताल्विचुयशानाम् । ओष्ठावुपूपध्मानीयानाम् । दन्तोष्ठं वकारस्य ।

जिह्वामूलं जिह्वामूलीयस्य । परन्तु स्वमतेनैव । मतान्तराणां नोल्लेखः । इदमेव वैषम्यं यद् चान्द्रवर्णसूत्रेष्वपि अपि च एकत्र सूत्रे हकारस्य कण्ठ्यतालब्यत्वमपरत्र च सूत्रे तालब्यत्वमेवमुकारस्यापि कण्ठ्यौष्ठ्यत्वं केवलौत्कण्ठ्यत्वं च प्रतिपादितम् । अन्यासु तु शिक्षासु प्रायः इकारोकारयोः यथाक्रमं तालब्यत्वमोष्ठ्यत्वं च विहितम् ।

याज्ञवल्कीयशिक्षास्थानविचारे पाणिनीयशिक्षातो बहुत्र वैषम्यं दृश्यते । तत्र हि वकारस्य केवलौष्ठ्यत्वम् , रेफस्य दन्तमूलीयत्वम् , ऋकारस्य च जिह्वामूलीयत्वमुक्तम् । पाणिनीयशिक्षायान्तु अनयोः मूर्धन्यत्वं प्रतिपादितम्। अन्येषां वर्णानां विषये सामान्यमेव ।

यद्यपि याज्ञवल्कीये एकारौकारयोः यथाक्रमं तालव्यत्वम्, ओष्ठत्वञ्च उक्तम् । तथापि तयोर्मात्राविभागविचारावसरे आद्यमात्रायाः कण्ठ्यत्वप्रतिपादनात् पाणिनीयोक्तं तयोः कण्ठ्यतालब्यत्वादिकमपि नैतद् विरुद्धम् , उक्तञ्चैतत् वर्णांशमात्राविचारावसरे । तत्र द्वावौरसौ ह्व इति म्ह इति, त्रयः कण्ठ्याः अ आ आ३ इत्यवर्णाः हकारविसर्जनीया इति । षण्मूर्ध्न्याः टठडढणा इति । नव तालव्याः इ ई ई३ इति वर्णाः, च छ ज झ ञ य श एकाराश्चेति । अष्टौ दन्त्याः, ऌ, ॡ, ॡ३ इति ऌवर्णाः, त थ द ध न लकार सकारा इति । नव ओष्ठ्याः ए उ ऊ ऊ३ इत्युवर्णाः प फ ब भ म वकरोपध्मानीया ओकारश्चेति । एको दन्तमूलीयो रेफः । सप्तजिह्वामूलीयाः ऋ ॠ ऋ३ इत्युवर्णाः क ख ग घ ङ इति उत्तरार्धे ।

वर्णरत्नप्रदीपिकायामपि याज्ञवल्कीयशिक्षायां पाणिनीयतः यद् वैशिष्ट्यं प्रदर्शितं तदेव दृश्यते । अर्थात् ऋकारवकाररेफाणां जिह्वामूलोष्ठदन्तमूलम् यथाक्रमं स्थानमुक्तम् । परमयं विशेषः यद् यद्यपि वकारस्य दन्तस्थानिकता एतच्छिक्षायां नोक्ता तथापि दन्तानां वकारकरणत्वं प्रतिपादितम् । पाणिनीये तु करणानां पृथगनिर्देशात् ओष्ठदन्तद्वयस्यापि वकारस्थानता स्वीकृता इति नैतदंशे वस्तुतो वैषम्यम् ।

लघुमाध्यन्दिनीयशिक्षायां केवलं विसर्गस्यैव स्थानविचारः नान्येषां वर्णानाम् । स च इत्थम् अवर्णऋकाराभ्यां परो विसर्गः कण्ठ्यः । इ उ ऐ

औ एतेभ्यः वर्णेभ्यः परः तालब्यः । एदोद्भ्यां परन्तु क्रमशः कण्ठ्यतालब्यः, कण्योष्ठ्यश्च, पाणिनीये च विसर्गादीनामाश्रयस्थानिकता एव इति प्रागेव प्रतिपादितम् । एवञ्च पाणिनीयानुसारम् ऋकाराद्युत्तरविसर्गस्य मूर्धन्यत्वं प्रतिपादितम् ।

अवर्णाच्च ऋकाराच्च विसर्गः कण्ठ्य एव सः ।
इवर्णा च तथोवर्णा तथा चैकारपूर्वकः ।
औकारपूर्वकश्चैव तालब्यो भवति ध्रुवम् ।
एकाराच्च कण्ठतालु विसर्गो भवति ध्रुवम् ॥
कण्ठ्यौष्ठ्यस्तु तथौकाराद्विसर्गो भवति ध्रुवम् ।
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥[८]

माण्डूक्यशिक्षायां केवलं पाणिनीयोक्तान्येव अष्टौ वर्णस्थानानि परिगणितानि । स्थानविवेकस्तु न कृतः ।

ऋवर्णोऽथ कवर्गश्च जिह्वामूलीय एव च ।
जिह्वामूले भवन्त्येषां जिह्वामूलं च कारणम् ॥
रेफश्च दन्त्योष्ठौ जिह्वाग्रेण विधीयते ।
वकार ओष्ठासम्भूतो दन्ताग्रकरणः स्मृतः ॥[९]

तैत्तिरीयशिक्षायामपि पाणिनोयोक्तान्येव अष्टौ स्थानानि संख्यातानि, परन्तु सर्वेषां वर्णानां स्थानविचारो न कृतः । केवलम् अकारवर्गहकाराणां कण्ठ्यता, उकारपवर्गोपध्मानीयानामोष्ठस्थानिकता, वकारस्य दन्त्योष्ठता, एकारैकारयोः कण्ठ्यतालव्यता, ओकारौकारयोश्च कण्ठ्योष्ठ्यता उक्ता । अत्र यत्कवर्गस्य कण्ठ्यत्वं प्रतिपादितं तदेव कवर्गस्य जिह्वामूलीयत्वप्रतिपादिकया पाणिनीयशिक्षया आपाततः विरूद्धम् । वस्तुतस्तु अविरुद्धमेवेति आपिशल शिक्षीयस्थानविचारावसरे लिखितमेव ।

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥
अकुहाः कण्ठजाःप्रोक्ता उपध्मानीया ओष्ठजः ।

उपू ओष्ठ्या विजानीयाद् वो दन्त्योष्ठ्यस्तथैव च ।
ए ऐ तु कण्ठतालव्यौ ओ औ कण्ठोष्ठजौ स्मृतौ ।।[१०]

षोडशश्लोकीयशिक्षायामपि कवर्गस्य कण्ठस्थानजन्यत्वम् । जिह्वामूलीयत्वं तु जिह्वामूलीयस्यैव इति पाणिनीयतः विषममभिहितम् । वर्णान्तराणां स्थानानां तु न पाणिनीयशिक्षावदेव अत्राप्युक्तानि ।

अकुहविसर्जनीयानां स्यात् कण्ठ्यं यिश्चु तालुकम् ।
ऋटुकं स्लृतुला दन्तप्यूपध्मानीयमोष्ठजम् ।
वोदन्तोष्ठं ञमस्यापि नासिकायामयुग्धरः ।
ओदौतोरपि कण्ठोष्ठं त्वेदैतोः कण्ठतालुकम् ।
जिह्वामूलीयमात्रस्य जिह्वामूलं हि चाष्टमम् ।।[११]

लोमशशिक्षायां हि केवलं हकारस्यैव स्थानव्यवस्था उक्ता नान्येषां वर्णानाम् । यथा -

हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम् ।
औरसं तं विजानीयात् कण्ठ्यमाहुरसंयुतम् ।।
हकारं रेफसंयुक्तं कदाचित् बलसंयुतम् ।
उच्चारणीयं कण्ठस्थमेवमीप्सन्ति पण्डिताः ।।[१२]

सा च इत्थं यद् सामान्यतः पञ्चमान्तस्थवर्णसंयुक्तो हकारः औरस्तु शुद्धस्तु कण्ठ्यः । इदन्तु पाणिनीयशिक्षावदेव । परञ्च क्वचित् र ल व संयुक्तस्य हकारस्य कण्ठ्यतापि भवति इति उपर्युक्त हकारस्थानियमस्य अपवादोऽपि निर्दिष्टः । र ल व संयुक्तस्य क्व कण्ठ्यता क्व च औरस्यता इति विषयविभागस्तु न कृतः । पारिशिक्षायां वक्ष्यमाणस्य तैत्तिरीयप्रातिशाखीय वर्णस्थानविचारस्येव भावानुवादः । ‘ कार्यं ओष्ठोपसंहार उवर्णोऽत्र विशेषकः’

अतः तैत्तिरीयप्रातिशाख्यस्थानीयविचारेणैव अत्रत्यो विचारः गतार्थे ति मत्वा नात्र विशदीक्रियते । एवं व्यासशिक्षायामपि

उवर्णप्रकृतेराष्टौ दीर्घोस्तु ओत्परस्य च ।

उक्त प्रातिशाखीयविचार एव संक्षिप्य अभिहित इति सोऽपि ते नैव गतार्थः । ऋक्प्रातिशाख्ये तवर्गरेफलकारसकाराणां दन्तमूलीयता उक्ता ।

जिह्वामूलीयः प्रथमश्च वर्गः ।

तालव्यावेकारचकारवर्णौ
विकारैकारौ यकारः शकारः ।
मूर्धन्यो षकारटवर्गौ ।
दन्तमूयस्तु तकारवर्गः ॥

एवं रेफस्य मतान्तरेण वर्त्स्यर्स्थानिकताऽपि उक्तम् । वर्णान्तराणां स्थानानि पाणिनीयशिक्षावदेव प्रतिपादितानि ।

ऋक्तन्त्रीयस्थानविचारे पाणिनीयशिक्षातोऽयं विशेषः यदत्र ऋकारस्य जिह्वामूलीयत्वं विसर्गस्य औरस्यत्वं रेफस्य दन्तमूलीयत्वमुक्तम् । सकाररेफलकार एवमोष्ठ एव वकारस्य स्थानतया उक्तः, न तु दन्ताऽपि । अन्येषां कवर्गादीनां स्थानविमर्शस्तु सदृश एव पाणिनीयया शिक्षया ।

वाजसनेय प्रातिशाख्येऽपि ऋक्तन्त्रवदेव वर्णानां स्थानानि प्रतिपादितानि । परन्तु ऋक्तन्त्रे रेफस्यैव दन्तमूलतया उक्ता । (ऋकौ जिह्वामूले । इचुशेयास्तलौ । षष्टौ मूर्धनि । रोदन्तमूले । ऌलसिता दन्ते । उवोपोध्माः ओष्ठे । अहविसर्जनीयाः कण्ठे । एकारौकारयोः कठ्या पूर्वा मात्रा ताल्वोष्ठयोरूक्षरा । यमानुस्वारनासिक्यानां नासिके । अत्र एकारौकारयोः कण्ठ्यतालब्यत्वं कण्ठ्योष्ठ्यत्वं च पाणिनीयवदेव उक्तम् । परन्तु एकारौकारयोः कण्ठ्यता न निदर्शिता १३) । वाजसनेय तु तवर्गलकारसकाराणामपि दन्तमूलस्थानिकतैव उक्ता । एवञ्च ऋक्तन्त्रीय स्थानविचारे पाणिनीयशिक्षातः यो विशेषः यच्च साम्यमुक्तम् । तदेव वाजसनेयेऽपि बोध्यम् ।

शौनकचतुरध्याय्यां हि किं स्थानजानां वर्णानां किं कारणमित्येवोक्तं न तु कस्य वर्णस्य किं स्थानमिति प्रतिपादितम् । यथा तालव्यानां वर्णानां जिह्वामध्यं कारणमित्युक्तम् । परन्तु तालव्याः वर्णाः के इति न विशदीकृतम् । अत्रत्यः करणविचारश्च करणप्रकरणे द्रष्टव्यः ।

तैत्तिरीयप्रातिशाख्ये कस्य किं स्थानमिति स्पष्टतया नाभिहितम् । (अयं विचारः तैत्तिरीयप्रातिशाख्ये प्रथमप्रश्ने द्वितीयाध्याये १२तः ४२सूत्रं यावत् कृतो वर्तते) । परन्तु कस्य वर्णस्य उच्चारणे आस्यावयवेषु कीदृशी

प्रक्रिया भवति इति सुस्पष्टं यथा अत्र अभिहितम् तथा नान्यत्र कुत्रापि प्रातिशाख्ये शिक्षा ग्रन्थे नापि आधुनिकैः भाषावैज्ञानिकैः तादृक् सूक्ष्मविचारः कृतः ।

पारिशिक्षायां प्रायः अत्रत्य एव विषयः कुत्र कुत्रचिद् स्पष्टीकरणपूर्वकं कारिकाबद्धः कृतः । इदानीं स एव तैत्तिरीयप्रातिशाख्योक्तो वर्णोच्चारणसमये स्थानस्थितिविचारो लिख्यते ।

ह्रस्वस्य अवर्णस्य उच्चारणे हनुः ओष्ठस्य आत्युपसर्गह्रतौ अतिसन्निकृष्टौ अर्थात् ईषत्सन्निकृष्टौ भवतः । 'हनु नाम यत्र जम्भाख्या दन्ताः जायन्ते ' इति सुभूतिः । दीर्घप्लुताकारोच्चारणे तु अकारोच्चारणापेक्षया हन्वोष्ठस्य ओष्ठहनुः नातिसन्निकृष्टता हनोश्च उपसंहृतरता जिह्वामाध्येन जम्भदेशस्य हनुमूलप्रान्तदेशस्य तालुनश्च स्पर्शश्च भवति । 'जम्भ्यान् हनुमूलप्रदेशान् इति एतत् प्रातिशाख्यीयमाहिषेय भाष्यस्य टिप्पण्यां '।

एवं ऋकारऌकारयोः उच्चारणावसरे हनोः उपसंहारः जिह्वाग्रेण वर्त्स्यस्थाने स्पर्शश्च भवति । अनुस्वारोच्चारणे हनूपसंहारः स्वरभक्त्युच्चारणे च जिह्वाग्रस्य बर्स्वस्थाने स्पर्शः । इकारोच्चारणे जिह्वामाध्यस्य तालुस्थाने उपसंहारः अर्थात् सन्निकृष्टता । ' वर्त्स्यस्थानं दन्तमूलात् उपरितनः तालुनश्च अधस्तनः भागः अयमेव वर्त्स्यशब्देनाप्युच्यते । उकारोच्चारणे ओष्ठयोः सन्निकृष्टता दीर्घता च । यत्र एकमोष्ठ्यवर्णमुच्चार्य मात्राकालव्यवधानेन द्वितीयः ओष्ठ्यवर्णः उच्चार्य ते तत्र प्रथमोष्ठ्यवर्णस्य उच्चारणे कृतात् ओष्ठोपसंहारात् अन्य एव पुनः ओष्ठोपसंहारः भवति यथा दुन्दुभिः यत्र तु ओष्ठ्यवर्णस्य मध्ये न एकमात्राव्यवधानं तत्र प्रकृत एव ओष्ठ्योपसंहारः अनुवर्तते यथा मयोभूः ।

एवं स्वराणामुच्चारणे स्थानस्थितिनिर्दिष्टा । व्यञ्जनेषु च कवर्गोच्चारणे हनुमूले जिह्वामूलेन, चवर्गोच्चारणे जिह्वा माध्यमेन तालूनि, टवर्गोच्चारणे मूर्धास्थाने, प्रतिवेष्ट्य अर्थात् वक्रीभूय जिह्वाग्रस्य, तवर्गोच्चारणे दन्तमूले जिह्वाग्रेण, पवर्गे ओष्ठ्योः परस्परमेव, यकारोच्चारणे तालुनः जिह्वामाध्यमस्य, रेफोच्चारणे जिह्वाग्रस्य माध्यमेन दन्तमूलेषु, लकारोच्चारणे जिह्वाग्रेण दन्तमूलेषु

वकारोच्चारणे ओष्ठप्रान्तदेशयोः अर्थात् सृक्किकणीस्थानयोः दन्तैः स्पर्शः भवति । भरतनाट्यशास्त्रे च वर्णस्थानविचारः एवम् उक्तः -

कण्ठतालु स्थाना मतास्तु चछजझञाः ।
टठडढणाः मूर्धन्यास्तथदधनाश्चैव दन्तस्थाः ।
पफबभमास्त्वोष्ठ्याः स्युः दन्त्या लृलसा अहौ च कण्ठस्थौ ।
तालव्या इयशा स्युर्ऋटुरषा मूर्धस्थिता ज्ञेयाः ।
ओऔ तु कण्ठोष्ठस्थानो एऐकारौ च कण्ठतालव्यौ ।
कण्ठ्यो विसर्जनीयो जिह्वामूलोद्भवः कखयोः ।
पफयोरोष्ठं स्थानम् ------------------- इति ।

अत्र च पाणिनीयशिक्षातो यत्साम्यं यद् वा वैषम्यं तदेतवलोकनेन स्पष्टमेव ।

एवमेतावत् आलोचितेषु शिक्षाप्रातिशाख्यादिषु निम्नलिखितानि स्थानानि उपलब्धानि । तानि च उरः, कण्ठः, तालु, मूर्धा, जिह्वामूलम्, नासिका , दन्ताः, ओष्ठौ, हनुः, जृम्भप्रान्तः सृक्किणी, दन्तमूलम् , वर्त्स्यं इति । एषु च आदितः अष्टावेव स्थानानि पाणिनीयशिक्षायामुक्तानि शेषाश्च अष्टाष्वेव अन्तर्भावं पाणिनीयशिक्षाकारो मन्यते ।

करणशब्दार्थः -:

उच्चारणकाले मुखे सम्यक्तया प्रसरतः वायोः यदीयव्यापारेण ताल्वादिस्थानेषु अभिघातः तदेव इह करणमुच्यते । क्रियते ताल्वादिषु स्पर्शनमनेन तदिति व्युत्पत्तेः । करोतेः करणे ल्युटि करणशब्दः निष्पद्यते येन जिह्वाग्रादिना ताल्वादिस्थानेषु स्पर्शः भवति तत्करणमित्यर्थः । स्थानन्तु यत्र स्पर्शः तदिति उक्तमेव । एवञ्च संयोगादिरूपस्पर्शस्य यदनुयोगितत्स्थानम् । यच्च प्रतियोगि तत्करणम् इति स्थानकरणयोः भेदः । अयमाशयः यत् संयोगः क्वचित् अन्यतरकर्मजः, क्वचिच्च उभयकर्मजः, भवति । जिह्वाग्रादिना ताल्वादिषु कर्म किन्तु जिह्वाग्रादिष्वेव । यत्र च कर्म तस्यैव करणत्वम् । करणस्य सव्यापारत्त्वात् निर्व्यापाराणां ताल्वादीनां तु स्थानता । तथा चोक्तं तैत्तिरीयप्रातिशाख्ये यदुपसंहरति तत्करणम् येन स्पर्शयति तत्करणम् इति

च । अत्र आद्यं सूत्रं स्वकरणविषयकम् । अत्र पूर्वसूत्रात् स्वराणामित्यनुवृत्तेः । अन्त्यं सूत्रं च व्यञ्जनकरणविषयकम् । तत्र व्यंजनपरस्य अन्येषामित्यस्यानुवृत्तेः । अत्र प्रातिशाख्ये स्वरकरणस्य व्यञ्जनकरणस्य च पृथक् पृथक् परिभाषणे हेतुः स्थानपरिभाषावसरे उक्तः । एतदेव पारिशिक्षायामपि उक्तम् -

स्वराणां करणं विद्यादुपसंहरतीति यत् ।
करणं तद्हलां ज्ञेयं स्पर्शयत्यत्र येन तु ॥

तानि च करणानि जिह्वामूलमध्योपाग्राग्रप्रभृतीनि ।

वर्णानां करणानि –ः

पाणिनीयशिक्षायां यथा वर्णानां स्थानानि उक्तानि न तथा करणानि । अत्रेदमेव कारणं पश्यामः यद् पाणिनीयशिक्षायां -

वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ।
स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः ॥[१४]

इत्यनेन स्वरकालस्थानप्रयत्नानुप्रदानाः पञ्च वर्णविभाजकाः । वर्णानां परस्परं भेदका उक्ताः । एते एव च उदात्तानुदात्तादिना विवेचिताः । अतोऽन्यदपि किञ्चिद् वर्णोच्चारणे भवेन्नाम सहायकम् । परन्तु तस्य वर्णभेदत्वाभावात् नात्र कथनम् ।

स्वरादीनां वर्णभेदकता यथा उदात्तोकारानुदात्तोकारयोः यो भेदः स स्वरप्रयुक्त एव इति स्वरस्य भेदकता । ह्रस्वदीर्घोकारयोः भेदकः कालः । ककारचकारयोः भेदकं स्थानम् । सकारथकारयोः भेदकः प्रयत्नः । प्रयत्यनशब्देन च आभ्यान्तरप्रयत्नः ग्राह्यः । ककारखकारयोः भेदकः वाह्यप्रयत्नः । उपर्युक्तशिक्षाकारिकायाम् अनुप्रदानशब्देन बाह्यप्रयत्नः ग्राह्याः । करणं तु वर्णानां भेदकम् । तद्धि तदा भेदकं भवेत् यदा एकस्थानप्रयत्नवतोः वर्णयोः भेदः करणमात्रप्रयुक्तः स्यात् न च तथा । नहि एकस्थानवत्ता वर्णानामस्ति करणभेदः, किन्तु यत्र करणभेदः तत्र स्थानभेदोऽपि नियतः । एककरणकानां च वर्णानामस्ति स्थानभेदः । यथा टवर्गतवर्गयोः जिह्वाग्रकरणतयापि एकस्य मूर्धन्यमपरस्य दन्त्यत्वमेवञ्च टवर्गतवर्गयोः स्थानभेदकता अवश्यक्लृप्ता तथैव च करणभेदस्थलेऽपि उपपत्तौ करणानां अन्यथासिद्धभूतानां वर्णभेदकत्वं

नाङ्गीकार्यम् इति नात्र तेषां विवेचनम् इति शिक्षाकर्तुः हृदयम् ।

अथ शिक्षान्तरेषु प्रतिपादितः करणविचारः लिख्यते -

आपिशलशिक्षायां कवर्गादीनां जिह्वामूलं करणम् एवं तालब्यवर्णानां जिह्वामध्यं करणं मूर्धन्यवर्णानां जिह्वोपाग्रं, दन्त्यवर्णानां जिह्वाग्रं करणम् अन्येषां तु वर्णानां करणं स्थानमेव इति अभिहितम् । तत्तस्थानजानां वर्णानामुच्चारणे तत्तत् जिह्वावयवानां तत्स्थानेषु स्पर्श इति भावः । एवमेव अक्षरशः सूत्रात्मकपाणिनीयशिक्षायामपि उट्टङ्कितम् ।

चान्द्रवर्णसूत्रेषु दन्त्यानां वर्णानां जिह्वाग्रं करणम् । मूर्धन्यानां जिह्वोपाग्रं तालव्यानाञ्च जिह्वामध्यं करणम् । अन्येषां तु वर्णानां यत्स्थानं तदेव करणम् इति प्रतिपादितम् । एतदपि प्रायः आपिशलशिक्षावदेव । आपिशलशिक्षातः इयमेव न्यूनता यदत्र कवर्गादीनां जिह्वामूलं करणं इति नोक्तम् ।

वर्णरत्नप्रदीपिकायाम्

ऋवर्णोऽथ कवर्गश्च जिह्वामूलीय एव च ।
जिह्वामूले भवन्त्येषां जिह्वामूलं तु कारणम् ॥
इवर्णोऽथ चवर्गश्च ए ओकारौ यशैः सहः ।
तालुस्थाना भवन्त्येषां जिह्वामध्यन्तु कारणम् ॥
षकारोऽथ टवर्गश्च मूर्धन्याःपरिकीर्तिताः ।
जिह्वायाः प्रतिवेष्ट्याग्रमेतेषां कारणं स्मृतम् ॥
ऌलसिता स्मृता दन्त्याः जिह्वाग्रकरणा हि ते ।
रेफश्च दन्तमूलोत्थो जिह्वाग्रेण विधीयते ॥
उवर्णोऽथ पवर्गश्च ओ औकारौ तथा च वः ।
ओष्ठ्या एते स्मृता वर्णा उपध्मानीय एव च ।
समानस्थकरणा नासिक्यौष्ठ्याः प्रकीर्तिताः ।
वकार ओष्ठ्यरम्भूतो दन्ताग्रकरणः स्मृतः ।
अवर्णश्च विसर्गश्च हकारश्चापि केवलः ॥
कण्ठ्या वर्णाः स्मृताः ह्येषां हनुमध्यं तु कारणम् ।
यमानुस्वारनासिक्या नासामूलाभवा दश ।

मुखनासिकाकारणोऽनुनासिक इति स्मृतिः ।।

ऋवर्णकवर्गजिह्वामूलीयानां जिह्वामूलम् । इकारचवर्गयकार शकाराणामेकारैकाराणाञ्च जिह्वामध्यं करणम् । षकारटवर्गाणां ऌकारलकारसकारतवर्गाणाञ्च जिह्वाग्रं करणम् । अत्र च पूर्वेषां जिह्वाग्रं प्रतिवेष्ट्य करणम् । वकारस्य दन्ताग्रं करणम् । स्थानन्तु ओष्ठः अर्थात् एतदुच्चारणे ओष्ठे दन्ताग्रस्पर्शः भवति । हकारविसर्गयोः असंयुक्तहकारस्य च हनुमध्यं करणम् । उकारोपध्मानीयपवर्गाणामोकारौकारयोश्च ओष्ठ एव स्थानं करणं च । तत्र उत्तरोष्ठः स्थानम् अधरोष्ठः करणमिति विवेकः । एतेषामुच्चारणसमये अधरोष्ठस्यैव सव्यापारतया अधरोष्ठेनैव उत्तरोष्ठे स्पर्शनात् । यमानुस्वारप्रभृतीनां नासिक्यवर्णानां नासिकैव करणमिति प्रतिपादितम् ।

शौनकचतुरध्याय्यां वर्णानां करणानि एवमुक्तानि । तथा हि कण्ठ्यानां वर्णानां अधरकण्ठः करणम् जिह्वामूलीयानां वर्णानां हनुमूलं तालुस्थानजन्यानां वर्णानां जिह्वामध्यम् । मूर्धन्यानां प्रतिवेष्ट्य जिह्वाग्रम् । षकारस्य द्रोणिकाख्यः प्रदेशविशेषः दन्त्यानां च जिह्वाग्रम् । ओष्ठजानानां वर्णानामधरोष्ठः करणम् । स्थानं तु उत्तरोष्ठः इति प्रागुक्तमेव । नासिक्यानां वर्णानां नासिकैव करणम् । अनुनासिकानां वर्णानां मुखं नासिका च करणम् । अत्र ये नासिकामात्रजाः ते नासिक्याः ये च मुखनासिकोद्भवाः अनुनासिकास्ते इति नासिक्यानुना - सिक्ययोर्भेदः । तथा च पाणिनेः सूत्रम् मुखनासिका वचनोऽनुनासिकः ।

तैत्तिरीयप्रातिशाखीयकरणविचारः स्थानविचार एवं लिखितः । यथा मुखे विशेषाः करणस्य । कण्ठ्यानाम् अधरकण्ठ्यः । जिह्वामूलीयानां हनुमूलम् । तालव्यानां जिह्वामध्यम् । मूर्धन्यानां जिह्वाग्रं प्रतिवेष्टितम् । षकारस्य द्रोणिका, दन्त्यानां जिह्वाग्रं प्रस्तीर्णम् । ओष्ठ्यानाम् अधरोष्ठम् । नासिक्यानां नासिका । अनुनासिकानां मुखनासिका , रेफस्य च दन्तमूलम् । तत्रैव येन यस्य वा स्पर्शः उक्तः तत्करणं यत्र स्पर्शः तत्स्थानं वर्णानां बोध्यम् । अतोऽन्यासु शिक्षासु करणविचारः पृथग् न कृतः । पाणिनीयप्रभृतिशिक्षासु तु आभ्यन्तरप्रयत्नस्यैव करणशब्देन व्यवहारः कृतः । उक्तं च -

स्वराणामुष्मणां चैव विवृतं करणं स्मृतम् ।[१५]

परन्तु अत्र ग्रन्थे मया करणशब्देन आभ्यन्तरप्रयत्नाः न गृहीताः । एवमस्मिन् करणप्रकरणे उल्लिखितेषु ग्रन्थेषु इमानि करणानि उपलब्धानि । तानि च जिह्वामूलं, जिह्वामध्यं , जिह्वोपाग्रं, जिह्वाग्रं , हनुमूलं, हनुमध्यं , दन्ताग्रम् , अधरोष्ठः, द्रोणिका, नासिका, जिह्वाग्राधः एषु च केषाञ्चित् स्थानतत्त्वमपि । पूर्वोक्तेषु स्थानेष्वपि केषाञ्चित्करणत्वम् । एवं रीत्या संक्षिप्य प्रचीनग्रन्थानुरोधेन वर्णानां स्थानकरणानि प्रदर्शितानि । इति शम् ।

पादटिप्पणी

१.प्रपंचसारद्वितीयपटल, कारिका संख्या ४४

२.वैयाकरणसिद्धान्तकौमुदी, धातुसंख्या ९२८

३.पा.सू.३.३.११७

४.ब्रह्मकाण्डम्

५.पारिशिक्षा

६.पाणिनिशिक्षा

७.पा.सू.१.१.९

८.पाणिनीयशिक्षा

९.माण्डूक्यशिक्षा

१०.आपिशलशिक्षा

११.षोडशश्लोकीशिक्षा

१२.लोमशशिक्षा

१३.वाजसनेयिप्रातिशाख्यम्

१४.पाणिनीयशिक्षा

१५.पा.शि.

पञ्चमोऽध्यायः
वर्णानां प्रयत्नविवेकः

पञ्चमोऽध्यायः

वर्णानां प्रयत्नविवेकः

प्रयत्नशब्दार्थः प्रयत्नविभागश्च -:

अत्र प्रयत्नशब्देन वर्णोच्चारणसमये उच्चारणावयवेषु जिह्वादिषु जायमानाः वर्णव्यक्तौ उत्पत्तौ वा उपयोगिभूताः व्यापाराः गृह्यन्ते न तु आत्मवृत्ति कृतिरूपः गुणविशेषः । उक्तव्यापाराणां प्रयत्नत्वं कृतिरूपमुख्यप्रयत्न जन्यत्वेन औपचारिकम् । अत एव कश्चित्प्रयत्नः आस्याभ्यन्तरः कश्चिच्च आस्याद्बाह्य इति उत्पद्यते । न हि कृतेः आस्याभ्यन्तरत्वम् आस्याद्बाह्यत्वं वा अस्ति । वस्तुतस्तु प्रयत्नशब्देन कृतेरभिधानेऽपि न काचितदनुपपत्तिः तथा हि यथा आयुर्घृतम् इत्यादौ आयुष्करणी भूते घृते आयुष्ट्वारोप एवमास्याभ्यन्तर व्यापारजनकत्वात् आभ्यन्तरत्वम् । आस्याद्बाह्यव्यापारजनकत्वाच्च बाह्यत्वं कृतौ उपचर्यते ।

एवञ्च आभ्यन्तरप्रयत्न इत्यस्य आभ्यन्तरव्यापारजनकः प्रयत्नः इति । बाह्यप्रयत्न इत्यस्य च बाह्यव्यापाराजनकः प्रयत्न इत्यर्थः । एवमेव स्पृष्टप्रयत्नः इत्यादिव्यवहारा अपि स्पर्शरूपव्यापारादिजनकः प्रयत्नः इत्यादिरीत्या सङ्गमनीयाः ।

अयं च प्रयत्नो द्विविधः । आभ्यन्तरो बाह्यश्च । तत्र वर्णव्यक्तेः पूर्वमास्याभ्यन्तरं ये व्यापाराः जायन्ते, जायमानान् तान् व्यापारान् ये जनयन्ति ते आभ्यन्तराः प्रयत्नाः । ये च वर्णव्यक्तानन्तरमास्याद् बहिः अर्थात् आस्याद्बाह्येषु उच्चारणावयवेषु व्यापाराः जायन्ते, जायमानान् तान् जनयन्ति वा ते बाह्याः प्रयत्नाः । आस्यं च ओष्ठात् प्रभृतिकाकलपर्यन्तमिति आकरे ।

आभ्यन्तरप्रयत्नस्य स्वरूपं भेदाश्च

उपरि आभ्यन्तरप्रयत्नस्य यत्स्वरूपमुक्तं तदेव विव्रियते आस्यान्तः स्थितेषु जिह्वादिषु वर्णोच्चारणसमये स्पर्शेषत्स्पर्शादयः ये ये व्यापारविशेषाः भवन्ति ते आभ्यन्तरप्रयत्नाः इत्युच्यन्ते । इमे च प्रयत्नाः वर्णव्यक्तेः पूर्वमेव जायन्ते । शाब्दिकनये वर्णानां नित्यतया नैते प्रयत्नाः वर्णान् उत्पादयन्ति

किन्तु वर्णव्यञ्जकं प्राकृतध्वनिमेव । बाह्यप्रयत्ना: वर्णोत्पत्तेः पश्चादेव जायन्ते इति बाह्यप्रयत्ननिरूपणावसरे उपपादयिष्यते । तथा च 'तुल्यास्यप्रयत्नं सवर्णम्'[१] इति सूत्रे लघुशब्देन्दुशेखरे स्पष्टम् । तत्र हि प्रयत्नशब्देन आभ्यन्तरप्रयत्नस्यैव उक्तसूत्रे ग्रहणार्थप्रकृष्टो यत्नः प्रयत्नः । प्रकर्षश्च वर्णोत्पत्त्यव्यहितप्राक्कालिकत्वरूप इत्युक्तम् । इत्थं च आभ्यन्तरप्रयत्नानां वर्णप्राक्कालिकत्वं बाह्यानाञ्च उत्तरकालिकत्वं बोधितं नागेशभट्टैः । अत्रैव सूत्रे महाभाष्येऽपि प्रयत्नशब्देन आभ्यन्तरप्रयत्नानां ग्रहणार्थमारम्भो यत्नस्य प्रयत्नः इति प्रयत्नशब्दस्य अर्थः कृतः । एतेनापि स्पष्टमेव यत् आभ्यन्तरप्रयत्नस्य पूर्वकालिकत्वं बाह्यस्य तु उत्तरकालिकत्वम् । स्पष्टञ्चैतत् सर्वमत्रत्ये महाभाष्यप्रदीपोद्योते ।

एते च आभ्यन्तरप्रयत्ना: सामान्यतः स्पृष्टता, ईषत्स्पृष्टता, विवृतत, संवृतता इति चतुर्विधः । तथाहि केषाञ्चिद्वर्णानामुच्चारणे ताल्वादिषु स्थानेषु जिह्वादीनां करणानां पूर्णतया स्पर्शः, ईषत्स्पर्शः, केषाञ्चिद् वर्णानामुच्चारणे दूरस्थता, केषाञ्चित् समीपस्थता भवति । स्पर्शेषत्स्पर्शो दूरस्थता समीपस्थता रूपान् जिह्वादेः चतुरो व्यापारान् आश्रित्य सामान्यतया चतुर्धा आभ्यन्तरप्रयत्ना: विभज्यन्ते । एष्वेव व्यापारेषु तारतम्येन अन्येऽपि प्रयत्नभेदा: वक्तुं शक्यन्ते ।

अत एव कुत्रचिच्चत्वारः, कुत्रचित्पञ्च, कुत्रचिद् ग्रन्थे षट्, सप्त वा प्रयत्ना: उपलभ्यन्ते । तथा च स्पृष्टता, ईषत्स्पृष्टता, ईषद्विवृतता, विवृतता, विवृततरता, विवृततमता, संवृतता च इति सप्त भवन्ति । अत्र च तृतीयचतुर्थपञ्चमषष्ठानां प्रयत्नानां सामान्यतो विवृतत्वेन एकत्वमाश्रित्य चतुर्ष्वेव अन्तर्भावः । भगवतः पाणिनेरपि विवृतत्वसामान्येन ईषद्विवृतादीनां चतुर्णामपि ग्रहणमभिलषितमिति नाज्झला[२]विति सूत्रस्वारस्येन प्रतीयते । तथा नाज्झलाविति सूत्रं तुल्यस्थानप्रयत्नवत्तया अकारहकारयोः प्राप्तां सवर्णसंज्ञां वारयितुं कृतम् । तच्च ईषद्विवृतादीनां चतुर्णामपि विवृतत्वसामान्यरूपेण सवर्णसंज्ञायां ग्रहणे एव संगच्छते । अन्यथा विशेषरूपेण ग्रहणे तु हकारस्य ईषद्विवृतत्वात् अकारस्य च विवृतत्वात् तयोः सवर्णसंज्ञायाः अप्राप्त्या तन्निषेधार्थम् , नाज्झलाविति न सूत्रयेत् आचार्यः । नैतावता पाणिनेः ईषद्

विवृततादयः प्रयत्नाः अनभिमताः इति भ्रमितव्यम् । किन्तु विवृतभेदानाम् ईषद्विवृतविवृतरत्वादीनां सवर्णसंज्ञानुपयुक्तता । तस्यां हि ईषद्विवृतादीनां चतुर्णामपि विवृतत्त्वसामान्येन एव उपयोगिता इत्येव नाज्झलाविति वदतः सूत्रकारस्याशयः स्वीक्रियते । (आपिशलिशिक्षा तत्र ध्वनावुत्पद्यमाने यदा स्थानकरणप्रयत्नाः परस्परं स्पृशन्ति सा स्पृष्टता । ८/२, यदीषत्स्पृशन्ति तदीषत्स्पृष्टता ८/३, दूरेण स्पृशन्ति सा विवृतता ८/४, सामीप्येन यदा स्पृशन्ति सा संवृतता इत्येषोऽन्तः प्रयत्नः । आस्यान्तर्गतेषु जिह्वाग्रादीनां वर्णाभिव्यक्तिजनकस्पर्शेषत्स्पर्शदूरावस्थानसमीपावस्थानापाभ्यन्तरकार्यकारिप्रयत्न विशेषाः एतैः पदैः उच्यन्ते । तेषां चास्यवृत्तित्वमास्यान्तर्गततत्त्स्थानेषु वायुसंयोग जनकत्वेन इति बोध्यम् [३]।

भाष्यकृता तु ईषद्विवृतत्वादीनामपि पार्थक्येन सवर्णसंज्ञोपयोगि तामाश्रित्य सूत्रस्य निष्प्रयोजकत्वं साधितम् । इत्थञ्च प्रयत्नविभागविषये सूत्रकारभाष्यकारयोः वैमत्यस्वीकारापेक्षया केन रूपेण प्रयत्नानां सवर्णसंज्ञायां प्रवेशः इत्येतद्विषये एव तद् बोध्यम् ।

पाणिनीयशिक्षायामाभ्यन्तरप्रयत्नाः

पाणिनीयशिक्षायां स्पृष्टत्वम्, अस्पृष्टत्वम्, ईषत्स्पृष्टत्वम्, अर्धस्पृष्टत्वम्, विवृतत्त्वम्, संवृतत्त्वञ्चेति षण्णामाभ्यन्तरप्रयत्नानामुल्लेखः दृश्यते । इदमत्र बोध्यं यत् यद्यपि एते षट्प्रयत्नाः तथापि एषु अर्धस्पृष्ट स्पृष्टाभ्यामतिरिक्तो न विवृतः प्रयत्नः किन्तु विवृतत्वम् अर्धस्पृष्टास्पृष्टत्व व्यापकमर्थात् विवृतस्यैव इमौ द्वौ भेदौ । इत्थञ्च अनयोः द्वयोरपि विवृतत्वेनैव ग्रहणे चत्वार एव प्रयत्नाः विशेषरूपेण ग्रहणे तु पञ्च षण्णामुक्तिस्तु एतदेव ध्वनयितुम् ।

अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः ।
शेषाः स्पृष्टा हलः प्रोक्ताः निबोधानुप्रदानतः ॥
स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम् ।
तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥[४]

एतेषु च प्रयत्नेषु कादिमान्तानां व्यञ्जनानां स्पृष्टता, अन्तः

स्थानानामीषत्स्पृष्टता। शषसहानां अर्धस्पृष्टता, स्वराणाम् अस्पृष्टता, ईषद् विवृताविवृतरूपयोः अर्धस्पृष्टास्पृष्टयोः सामान्यतो विवृतत्वमादाय स्वाराणामूष्मणाञ्च विवृतप्रयत्नः। ह्रस्वाकारस्य संवृत, एवं रीत्या उक्तानां षण्णां प्रयत्नानां विवेकः कृतः पाणिनीयशिक्षायाम्। एतेन प्रकृतशिक्षायां स्वरोष्माणोरूभयोरपि विवृतप्रयत्नकथनात् उभयोरपि एक एव प्रयत्न इति न मन्तव्यम् किन्तु भिन्न प्रयत्नकता एव। उभयोः विवृतप्रयत्नकथनन्तु सवर्णसंज्ञायां स्वरोष्माणां प्रयत्नयोः विवृतत्वरूपेण प्रवेश इत्येव बोधयितुम्, कथमन्यथा एक एव शिक्षाकारः एकत्र स्वरोष्माणां विवृतत्त्वम् अपरत्र स्वराणाम्। अस्पृष्टत्वम् ऊष्मणां च अर्धस्पृष्टत्वम् इति परस्परं विप्रतिषिद्धं प्रतिपादयेत्। स्वरेष्वपि च सर्वेषां समानः विवृतप्रयत्नः, किन्तु अन्यस्वरापेक्षया एकारौकारयोः विवृततरः, ऐकारौकारयोस्तु विवृततमः। यद्यपि शिक्षान्तरेषु आकारस्य विवृततमादपि अधिकः अर्थात् अतिविवृततमः प्रयत्नः उक्तः, तथापि पाणिनीयशिक्षायामेतन्न लभ्यते। नापि पाणिनीयानामाकारस्य अतिविवृततमता प्रक्रियोपयोगित्वेन सम्मता।

अत एव पाणिनीयमते अकारस्य आकारस्य च एकप्रयत्नतया सवर्णसंज्ञा सिद्ध्यति। यद्यपि ह्रस्वाकारस्य संवृतत्वात् अनयोः प्रयत्नभेदः भवति तथापि प्रक्रियायां ह्रस्वाकारोऽपि विवृत एव स्वीक्रियते। अत्र प्रमाणं अ अ इति पाणिनेः सूत्रम्।

अन्यथा आकारस्य अतिविवृततमत्वाङ्गीकारे यथा एकारैकारयोः ओकारौकारयोर्वा प्रयत्नभेदात् सावर्ण्यं न भवति तथैव अकाराकारयोरपि सवर्णता न स्यात् ततश्च सवर्णाकारः इत्यादौ "अकः सवर्णे दीर्घः५" इति दीर्घो न स्यात्, स्थितं च एतत् तुल्यास्यप्रयत्नं सवर्णं इति सूत्रे बृहच्छब्देन्दुशेखरे। परमतेन नैतन्मन्तव्यं यत् आकारोच्चारणे जायमानं शिक्षाकारोक्तं विवृताधिक्यं पाणिनीया न मन्यन्ते, किन्तु आकारस्य विवृततमत्वं पाणिनीयैः स्वप्रक्रियोपयोगित्वेनैव नाश्रीयते इत्येव उपयुर्क्तविवेचनस्याभिप्रायः।

अत्र विषये शिक्षान्तराणि

आपिशलशिक्षायां स्पृष्टः, ईषत्स्पृष्टः, ईषद्विवृतः, विवृतः, विवृततरः,

विवृततमः, अतिविवृततमः संवृत इति प्रयत्नानां भेदप्रभेददृष्ट्या अष्टौ आभ्यन्तरप्रयत्नाः निर्दिष्टाः । एषु च स्पर्शानां स्पृष्टः अन्तःस्थानां ईषत्स्पृष्टः, उष्मणाम् ईषद्विवृतः स्वराणां विवृतः स्वरेषु एकारौकाराणां विवृततरः ऐकारौकाराणां विवृततमः आकारस्य अतिविवृततमः अकारस्य संवृतप्रयत्नः । पाणिनीयशिक्षातः इदमत्र वैशिष्ट्यम् यदत्र आकारस्य अतिविवृततमः प्रयत्नः कृतः । अर्थात् अकारस्योच्चारणे ऐकारौकारयोः यावती विवृतता ततोऽप्यधिका विवृता भवति । (आभ्यन्तरस्तावत् स्पृष्टकरणाः स्पर्शाः ३/४, ईषत्स्पृष्टकरणाः, अन्तस्थाः ३/५ , ईषद्विवृतकरणाः ऊष्माणः ३/६, विवृतकरणाः स्वराः ३/७, तेभ्यो ए,ओ विवृततरौ ३/८, ताभ्यामै औ ३/९, ताभ्यामप्याकारः ३/११, संवृतो अकारः ३/१२ ।[६]

सूत्रात्मकपाणिनीयशिक्षायामपि आपिशलिशिक्षावदेव वर्णानां प्रयत्नाः उक्ताः । परन्तु आपिशलिशिक्षायाम् ऊष्मणामीषद्विवृतत्वम् इत्येव प्रतिपादितम् इह तु ईषद् विवृततत्वम् विवृतत्वम् वा इति पदद्वयमपि उपस्थापितम् । अत्रापि पाणिनीयशिक्षोक्तरीत्यैव विशेषरूपेण ग्रहणं स्वरोष्मणः प्रयत्नभेदः विवृतत्वरूपोभयसाधारणधर्मेण ग्रहणे उभयोरपि प्रयत्नैक्यमिति बोध्यम् । (अत्रत्यानि एतद्विषयकाणि सूत्राणि आपिशलिशिक्षावदेव सन्ति । केवमत्र ईषद्विवृतकरणा ऊष्माणः इत्यतः परं विवृतकरणा वा इति सूत्रमधिकम् ।)

चान्द्रवर्णसूत्रेष्वपि आपिशलिशिक्षावदेव प्रयत्नानां कथनम् । (तत्र आभ्यन्तरः २१, संवृतत्वम् , स्पृष्टत्वम् , ईषत्स्पृष्टत्वञ्च २२, संवृतत्वम् अकारस्य २३, विवृतत्वम् स्वराणामूष्मणां च २४, तेभ्यो विवृततत्वमेदोतोः २५, ताभ्यामैतौतोः २६, ताभ्यामप्याकारस्य २७, स्पृष्टत्वं स्पर्शानाम् २८, ईषत्स्पृष्टत्वमन्तस्थानाम् २९,)[७]

वर्णरत्नप्रदीपिकायामपि षोढा प्रयत्नान् विभज्य पाणिनीयशिक्षावदेव वर्णानां प्रयत्नाः उक्ताः । परमत्रेदं वैशिष्ट्यं यत् पाणिनीयशिक्षादिषु ऋऌकारयोः प्रयत्नविषये कश्चिद् विशेषो नाभिहितः । इह तु ऋऌकारयोः ईषद्स्पृष्टरेफ लकारघटिततत्वेन स्वरत्वेऽपि न अस्पृष्टत्वं किन्तु ईषत्स्पृष्टत्वमिति सूक्ष्मपरीक्षा कृता ।

संवृतं विवृतं तद्वदस्पृष्टं स्पृष्टमेव च ।
ईषत्स्पृष्टं चार्धस्पृष्टमास्ययत्नस्तु षडविधः ।
अकारः संवृतो ज्ञेयो विवृताश्चेतरे स्वराः ।
अस्पृष्टास्यप्रयत्नाश्च स्वराः सर्वे भवन्ति हि ॥
स्पृष्टाः स्पर्शास्तु विज्ञेया अन्तस्थाः ईषदुत्स्पृशः ।
अर्धस्पृष्टाश्च विज्ञेया ऊष्माणो वर्णवेदिभिः ॥
ऋलोर्मध्ये भवत्यर्धमात्रा रेफलकारयोः ।
तस्मादस्पृष्टता न स्यात् सम्भवे ऋऌकारयोः ॥[८]

माण्डूकशिक्षायां स्पर्शानां स्पृष्टता, अन्तः स्थानानाम् अस्पृष्टता, यमानां संवृतता स्वराणामूष्मणाञ्च विवृतता इत्येवं रीत्या प्रयत्नाः विवेचिताः । यद्यपि अत्र अन्तःस्थानानामस्पृष्टप्रयत्नकत्वम् उक्तं तथापि नहि एतत् पाणिनीयशिक्षातो विरूद्धमिति मन्तव्यम् । शिक्षान्तरैक्यविषयतानुरोधेन माण्डूकशिक्षोक्ते अस्पृष्टपदे नञः ईषदर्थकत्वम् । अङ्गीकृत्य विरोधस्य परिहारस्सम्भवात् । अत्र यमानां संवृतः प्रयत्न उक्तः इति पाणिनीयतो विशेषः ।

वर्णानां तु प्रयोगेषु करणं स्याच्चतुर्विधम् ।
संवृतं विवृतञ्चैव स्पृष्टमस्पृष्टमेव च ॥
स्पर्शानां करणं स्पृष्टमन्तस्थानामतोऽन्यथा ।
यमानां संवृतं प्राहुर्विवृतञ्च स्वरोष्मणाम् ॥[९]

शैशरीयशिक्षायां स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदेन चतुर्धा प्रयत्नं विभज्य स्पर्शानां स्पृष्टता, अन्तस्थानाम् ईषत्स्पृष्टता, स्वरोष्मणां विवृतता, ह्रस्वाकारस्य संवृतता इति रीत्या प्रयत्नानां विवेकः कृतः ।

स्पर्शानां करणं स्पृष्टमन्तस्यास्त्वीषदुच्यते ।
स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम् ॥
संवृतञ्चेत्यकारस्य सर्ववर्णो निगद्यते ॥[१०]

याज्ञवल्क्यशिक्षायां स्पृष्टम् , अस्पृष्टम् , संवृतं , विवृतञ्चेति चतुर्विधः प्रयत्नः उक्तः । (चतुर्विधं करणं स्पृष्टमस्पृष्टं, संवृतम्, विवृतञ्चेति । स्पृष्टाः

स्पर्शाः । अस्पृष्टाः अन्ये । संवृताः घोषाः, विवृता अघोषाः ।[११] इदमत्रमन्तव्यं यद् संवृतविवृतौ आभ्यन्तरप्रयत्नौ,बाह्यप्रयत्नौ च स्तः । बाह्यस्वरूपाविमौ प्रायःसंवारविवारशब्दाभ्यां व्यवह्रियेते । आभ्यन्तरप्रयत्नरूपौ तु संवृतविवृत शब्दाभ्याम्। तत्र जिह्वाग्रेः ताल्वादिस्थानतः समीपस्थतादूरस्थे आभ्यन्तर प्रयत्नात्मके संवृतविवृते कण्ठबिलस्य आस्य बहिर्भूतस्य सङ्कोचविकासौ बाह्यप्रयत्नात्मके संवृतविवृते ।

अत्र च अकाररीत्या संवृतता, स्वरीत्या च विवृतता, आभ्यन्तरप्रयत्नौ, घोषवर्णानां संवृतता, अघोषवर्णानाञ्च विवृतता, आभ्यन्तरप्रयत्नौ घोषवर्णानां संवृतता अघोषवर्णानाञ्च विवृतता बाह्यप्रयत्नौ । अत्र शिक्षायां प्रयत्नविभागे संवृतत्वविवृतत्वयोः कथनं बाह्यप्रयत्नतात्पर्येणैव, यतः प्रयत्नान् विभज्य घोषाणां संवृतता, अघोषाणां विवृतता इति अत्रोक्तम् । आभ्यन्तरप्रयत्नतात्पर्ये तु शिक्षान्तरवत् ह्रस्वाकारस्य संवृतत्त्वम् इतरेषाञ्च स्वराणां विवृतत्वम् इति वदेत् शिक्षाकारः एवं चात्र शिक्षायामाभ्यन्तरप्रयत्नः स्पृष्टास्पृष्टभेदेन द्विधैव विभाजितः ।

तत्र स्पर्शानां स्पृष्टप्रयत्नः, इतरेषां स्वरोष्मान्तस्थानाम् अस्पृष्टः प्रयत्नः । यद्यपि अन्तस्थानां ईषत्स्पृष्टता, ऊष्मणामर्धस्पृष्टता, स्वराणाञ्च अस्पृष्टता इति न त्रयाणां प्रयत्नसाम्यं तथापि अत्र शिक्षायां स्पृष्टपदेन पूर्णस्पर्शस्यैव ग्रहणमर्थात् येषामुच्चारणे जिह्वाग्रादिभिः ताल्वादिषु पूर्णः स्पर्शो भवति त एव वर्णाः स्पृष्टाः, तदितरे सर्वेऽपि पूर्णस्पर्शाभावरूपसाम्यात् अस्पृष्टा एव इति पाणिनीयशिक्षातो विरोधो नोद्भावनीयः । इत्थञ्च शिक्षायां पूर्णस्पर्शवतां पूर्णस्पर्शाभाववतां च आदाय स्पृष्टत्वम् । अस्पृष्टत्वमिति द्विधैव प्रयत्नो विभाजितः । पाणिनीयशिक्षायां तु स्पर्शस्य तारतम्यं स्पर्शाभावदशायां जिह्वादेः दूरस्थत्वं समीपस्थत्वं चादाय ईषत्स्पृष्टार्धस्पृष्टादयः प्रयत्नभेदाः प्रोक्ताः इत्येव विशेषः ।

ऋक्तन्त्रे स्पृष्टं, दुःस्पृष्टं विवृतञ्चेति आभ्यन्तरप्रयत्नः त्रिधाप्रदर्शितः । (स्पृष्टं करणं स्पर्शानाम् । दुःस्पृष्टमन्तस्थानाम् । विवृतं स्वरोष्मणाम् । विवृततरमाकारैकारोकाराणाम्) अत्र दुःस्पृष्टपदेन ईषत्स्पृष्टः ग्राह्यः । स्पर्शवर्णानां

स्पृष्टता अन्तस्थानां च दुःस्पृष्टता, स्वराणामूष्मणां च विवृतता स्वरेष्वपि अन्यस्वरेभ्यः आकारैकारौकाराणां विवृततरः प्रयत्नः इति विवेकः । यद्यपि अत्र प्रयत्नकरणे संवृतस्यापि संवृतो घोषवान् इत्यादिना उल्लेखः कृतः तथापि नैषा संवृतोक्तिः आभ्यन्तरप्रयत्नतात्पर्येण किन्तु याज्ञवल्क्यशिक्षोक्तरीत्या बाह्यप्रयत्नतात्पर्येणैव ।

ऋक्प्रातिशाख्येऽपि स्पृष्टं , दुःस्पृष्टम् , अस्पृष्टम् इति त्रिविधः प्रयत्नो दर्शितः । अत्र च दुःस्पृष्टशब्देन ईषत्स्पृष्टप्रयत्नो ग्राह्यः । एतेषां च प्रयत्नानां व्यवस्था इत्थमत्रोक्ता तथाहि स्पर्शवर्णानां स्पृष्टप्रयत्नः , अनुस्वारस्य स्वरोष्माणां च अस्पृष्टप्रयत्नः , इमावेव स्पृष्टास्पृष्टप्रयत्नौ यथाक्रमम् अस्थित स्थितशब्दाभ्यां संज्ञितौ । उक्तं च (तद्विशेषः करणमस्थितम्) दुःस्पृष्टः प्रयत्नः इति । एवं रीत्या हकारविसर्गयोः ऊष्मतया अस्पृष्टत्वम् एव भवति सिद्धान्ते , परन्तु केचन आचार्याः अनयोः अस्पृष्टतां न मन्यन्ते, किन्तु दुःस्पृष्टताम् एव इति मतान्तरस्यापि उल्लेखः कृतः अत्र प्रातिशाख्ये । अत्रत्यस्य अस्पृष्टशब्दस्य विवृतार्थकत्वाङ्गीकारेण स्वराणामस्पृष्टत्वं प्रतिपादितम्, ऊष्मणां च अर्धस्पृष्टत्वप्रतिपादिकया पाणिनीयशिक्षया अस्य प्रातिशाख्यस्य समन्वयः कर्तुं शक्यते । पाणिनीयशिक्षायामपि सामान्यतः स्वरोष्मणां विवृतत्वप्रतिपादनात् ।

शौनकचतुरध्याय्यां स्पर्शानां स्पृष्टता अन्तः स्थानाम् ईषत्स्पृष्टता, स्वरोष्मणां विवृतता, स्वरेषु अकारस्य संवृतता एकारौकारयोः विवृततमता, आकारस्य च विवृततमता उक्ता । इत्थञ्च स्पृष्टम्, ईषत्स्पृष्टम् , विवृतं , संवृतञ्चेति चत्वारः आभ्यन्तरप्रयत्नभेदाः निर्दिष्टाः ।

अग्निपुराणे पाणिनीयशिक्षावदेव स्वराणाम् अस्पृष्टता, अन्तःस्थानाम् ईषत्स्पृष्टता, शलानाम् अर्धस्पृष्टता, स्पर्शानाञ्च स्पृष्टता उक्ता । पाणिनीयशिक्षायां स्वरोष्मणां विवृतत्त्वमपि उक्तम् । तदिह न दर्शितम् ।

दुःस्पृष्टं तु प्रागर्धकाराच्चतुर्णाम् ।
स्वरानुस्वारोष्माणामस्पृष्टं स्थितम् ।
नैके कण्ठ्यस्य स्थितमाहुरूष्मणः ॥[१२]

भरतनाट्यशास्त्रे इत्थं वर्णानां प्रयत्नः उक्तः --

स्पृष्टाः काद्या मान्ताः शषसहकारास्तथा विवृताः ।

अन्तस्थाः संवृताःङञणनमा नासिकोद्भवा ज्ञेया ॥[१३]

यत्र वर्णस्थानमाश्रित्य मध्ये जिह्वा न सन्तिष्ठते तदस्थितमुच्यते । यत्र वर्णस्थामाश्रित्य मध्ये जिह्वावतिष्ठते तत्स्थिमुच्यते उब्बटः[१४] एवं रीत्यावर्णानां आभ्यन्तरप्रयत्नाः शिक्षादिषु विवेचिताः । यद्यपि कुत्रचित् द्वौ , कुत्रचित् त्रयः, कुत्रचिच्चत्वारः, पञ्च, षड्वा आभ्यन्तरप्रयत्नाः उक्ताः , इति आभ्यन्तरप्रयत्नसंख्याविषये शिक्षादिषु परस्परं वैषम्यं दृश्यते। तद्यथा याज्ञवल्क्यशिक्षायां स्पृष्टम्, अस्पृष्टम् इति द्वौ । ऋक्प्रातिशाख्ये स्पृष्टम् ,दुःस्पृष्टम् ,अस्पृष्टम् इति त्रयः । माण्डूक्यशिक्षायाम् , शैशरीयशिक्षायाञ्च स्पृष्टम्, ईषत्स्पृष्टम्, ईषद् विवृतम्, विवृतम् संवृतमिति पञ्चेति । पाणिनीयशिक्षायां वर्णरत्नप्रदीपिकायाञ्च स्पृष्टम् , ईषत्स्पृष्टम्, अर्धस्पृष्टम् अस्पृष्टम्, विवृतं, संवृतम् इति षट्प्रयत्नाः प्रतिपादिताः । अतोऽन्ये विवृततरः, विवृततमत्वादयः विवृतप्रभेदा अपि पाणिनीयप्रभृतिषु शिक्षासु उक्ताः। कुत्रचित् नोक्ताः तथापि केवलं प्रयत्नसंख्याविषये न्यूनाधिकतां वीक्ष्य शिक्षादीनां परस्परं मतभेदो नोद्भावनीयः । यतः अस्माभिः वारं वारं तत्र तत्र आम्रेडितं यत् वर्णानामुच्चारणे जिह्वादीनां कीदृशः व्यापारः भवति इत्येतद् विषये न मतभेदः शिक्षाकाराणामर्थात् यस्य वर्णस्य उच्चारणे ईदृशः व्यापारः एकस्य शिक्षाकारस्य मते , अपरस्य ततोऽन्यादृशः व्यापारः इत्यादि न स्वीकार्यं किन्तु तेषामेव व्यापाराणां प्रयत्नानां नाना विधानामपि कस्मिश्चिद् शिक्षाग्रन्थे त्रिधैववर्गीकरणं, कंस्मिश्चिद् चतुर्धा, पञ्चधा, षोढा वा इति प्रयत्नानां अन्यथा अन्यथा वर्गीकरणमेव शिक्षाकारैः कृतम् । यथा आभ्यन्तरप्रयत्नस्य द्वैविध्यं प्रतिपादयन्त्यां शिक्षायां सर्वेषां एव आभ्यान्तरव्यापाराणां पूर्णस्पर्शरूपत्वपूर्णं स्पर्शाभावरूपत्वरूपधर्ममादाय द्विधैव विभाजनं कृतम् । एवमन्यत्रापि ऊह्यम्।

अतः वर्गीकरणप्रकार एव तत्तच्छिक्षाकाराणां भिन्नः , न तु वस्तुतः प्रयत्नस्थितिविषये मतभेदः । इत्थं च न्यूनाधिकप्रयत्नवादिनां शिक्षाग्रन्थानां परस्परं समन्वयः ।

बाह्यप्रयत्नस्य स्वरूपं भेदाश्च -:

यथा वर्णोत्पत्तेः पूर्वं स्पृष्टतादयः आभ्यन्तरव्यापाराः भवन्ति तथैव वर्णोत्पत्तेः पश्चादपि श्वासपरिवृत्तिसमये केचन व्यापाराः भवन्ति । त एव बाह्यप्रयत्नशब्देन उच्यन्ते । इत्थं च उच्छ्‌वासस्य व्यापाराः आभ्यतरप्रयत्नाः भवन्ति । बाह्यप्रयत्नास्तु निश्वास्य व्यापाराः । ते च संवारः, विवारः, नादः, श्वासः,घोषः,अघोषः, अल्पप्राणः , महाप्राणः, उदात्तः, अनुदात्तः, स्वरितश्चेत्येकादश । अतोऽन्ये मात्राकालिकत्वादयोऽपि बाह्यप्रयत्नाः एव । एते च प्रयत्नाः गलबिलस्य सङ्कोचविकासौ, श्वासस्य प्रवेगम् , अनुरणनात्मकं नादम् , ध्वनेः गाम्भीर्यम् , मान्द्यम् , प्राणप्रदानस्य तारतम्यं ताल्वादिस्थानानाम् अधो भागे ऊर्ध्वभागे च स्पर्शादिरूपव्यापारं , मूलाधारे प्रयत्नेन न्यूनाधिकवायोः प्रेरणारूपं व्यापारं च आश्रित्य भवन्ति । एषां बाह्यता च वर्णोत्पत्तेः पश्चात् जायमानतया , आस्यबाह्येषु उच्चारणावयवेषु कार्यकारितया सवर्णसंज्ञानुपयोगि तया वा । तत्र विवारसंवारश्वासनादघोषाघोषाल्पप्राणमहाप्राण आस्यबाह्येषु उच्चारणावयवेषु वर्णोत्पत्तेः पश्चात् भवन्ति । ह्रस्वत्वदीर्घत्वादिकाराणां व्यापाराणां वर्णोत्पत्तिपूर्वकालिकत्वेऽपि आस्याद् बहिः कार्यकारितया बाह्यप्रयत्नरूपता। तथाहि वर्णविवक्षया उत्पन्नेन वक्तृप्रयत्नेन प्रेरितो वायुः यदा मूलाधारात् उद्गच्छति तदानीमेव विलक्षणः कश्चितप्रयत्नः अल्पं वायुः, कश्चिदधिकं कश्चित् ततोऽधिकता इति मूलाधारे वायुप्रेरणारूपाः ह्रस्वादिकाराः व्यापाराः वर्णोत्पत्तिप्राक्कालिकाः अपि आस्य बाह्ये मूलाधारे कार्यकारितया बाह्याः । एषां च मात्राकालित्वादीनां बाह्यप्रयत्नता , अ इ उ ण् इति सूत्रे महाभाष्ये बोधिता । (वक्ष्यति तुल्यास्यप्रयत्नं सवर्णम् इत्यत्र आस्य ग्रहणस्य प्रयोजनम् आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसंज्ञाः भवन्तीति । बाह्यश्च पुनरास्यात्कालः ।[१५]

उदातत्वादिकाराः व्यापाराः आस्याभ्यन्तरमेव वर्णोत्पत्तेः प्राक्भवन्ति । तथापि उदात्तादीनां सवर्णसंज्ञानुपयोगितया बाह्यता । अत एव एषां कृते गुणशब्देन व्यवहारः कृतः वृद्धिसंज्ञासूत्रे महाभाष्ये । यथा च उदात्तत्वादिकाराः व्यापाराः आस्यान्तः एव भवन्ति तथा च स्वरप्रकरणे द्रष्टव्यम् । एतेषां च

बह्यप्रयत्नानामापिशलशिक्षायां निष्पत्तिरित्थमुक्तम् । ' स इदानीं प्राणो नाम वायुरूर्ध्वमाक्रामन् मूर्ध्नि प्रतिहतो निवृत्तो यदा कोष्ठमभिहन्ति तदा कोष्ठेऽभिहन्यमाने गलबिलस्य विवृतत्वात् विवार: । संवृतत्त्वात् संवारो जायते । तौ संवारविवारौ ८/८, तत्र यदा कण्ठबिलं संवृतं भवति तदा नादो जायते ८/९, विवृते कण्ठबिले श्वासो जायते ८/१०, तौ श्वासनादावनुप्रदानमित्याचक्षते । ८/११, अन्ये च ब्रुवते अनुप्रदानमनुस्वानो घण्टानिर्ह्लादिवत् ८/१२, तत्र यदा स्थानाभिघातजे ध्वनौ नादोऽनुप्रदीयते तदा नादध्वनिसंसर्गाद् घोषो जायते८/१३, यदा श्वासोऽप्रदीयते तदा श्वासध्वनिसंसर्गादघोष:८/१४, सा घोषवदघोषता ८/१५, महति वायौ महाप्राण:८/१६, अल्पे वायावल्पप्राण:/१७, सा अल्पप्राणमहाप्राणता८/१८, महाप्राणत्वादूष्मत्वम् ८/१९ , सूत्रात्मकपाणिनीयशिक्षायामपि आपिशलिशिक्षावदेव बाह्यप्रयत्नानां निष्पत्ति: प्रदर्शिता । ऋक्प्रातिशाख्येऽपि बाह्यप्रयत्नानां कार्यकारिता अभिहिता ।

इदमत्रध्येयं यद् वर्णविवक्षया उत्पन्नेन वक्तृप्रयत्नेन नाभिदेशप्रेरित:वायु: वेगादूर्ध्वं गच्छन् शिरसि प्रतिहत:सन् निवृत्त: जिह्वादीनां स्पर्शपूर्वकं तत्तत्स्थानेषु आहत्य वर्णान् निष्पादयति । ततश्च वर्णनिष्पत्यनन्तरं प्रतिनिवृत्त: श्वासवायु: वक्तृप्रयत्नेनैव आस्याद् बहि: स्थितानां गलविलादीनां विकाससंकोचादिकं करोति । अत्र च वर्णनिष्पत्ते: पूर्वं जायमान: तत्तत्स्थानेषु वाय्वाभिघातरूपा: व्यापारा: वर्णनिष्पत्त्युत्तरमास्याद् बहि: कार्यकारितया बाह्या: । गलविलादीनां विकासादय: प्रतिनिर्वर्तमानस्य श्वासस्य वेग:, शैथिल्यम् , अल्पत्वम् , मध्यत्वम्, ध्वने: गाम्भीर्यम् , मान्द्यम् , इत्यादिकं सर्वं बाह्यप्रयत्नस्य विषय: । तत्र यदा श्वासनिवृत्तिसमये वक्तृप्रयत्नेन गलबिलं विकसितं भवति तदा विवारो नाम बाह्यप्रयत्न: । यदा च गलिबिलं संवृतं संकुचितं भवति तदा संवारो नाम बाह्यप्रयत्न: । गलबिलस्य विकासदशायां च श्वासमार्गस्य प्रशस्ततया अनिरोधपूर्वकं श्वास: वेगेन प्रतिनिवर्तते अयमेव श्वासाख्य: बाह्यप्रयत्न:, गलबिलस्य संकोचश्चदशायाञ्च श्वासप्रतिनिवृत्तिमार्गस्य सङ्कीर्णतया इतस्तत: आहतिपूर्वकं श्वास: प्रतिनिवर्तते , येन वर्णनिष्पत्त्युत्तरमनुरणनात्मक: नाद: भवति ।

अयमेव नादाख्यः बाह्यप्रयत्नः । एवं गलबिले विवृते प्रतिनिवर्तमानस्य श्वासस्य इतस्ततोऽनाहतेः अनुरणनात्मकनादानुत्पत्या नादसम्मिश्रणाभावात् पूर्वोत्पन्नवर्णात्मकध्वनेः अगाम्भीर्यं भवति । अयमेव ओघोषो बाह्यप्रयत्नः, गलबिले संवृतेः च पूर्वोक्तरीत्या उत्पन्नस्य अनुरणनात्मकनादस्य प्राङ्निष्पन्न वर्णात्मकध्वनौ सम्बन्धात् ध्वनिः गम्भीरो भवति , अयमेव ध्वनिगाम्भीर्यरूपो घोषो बाह्यप्रयत्नः भवति ।

यथा च ध्वन्यन्तरस्य सम्मिश्रणे सम्बन्धे ध्वनेः गाम्भीर्यं भवति , तथा तबला इति भाषायां प्रसिद्धे आनाहवाद्यविशेषे सुस्पष्टम् अवलोक्यते अस्माभिः । तत्र हि वाद्ये केवलं दक्षिणतः एव अङ्गुलिविशेषताडने 'ता' इति 'तिन् ' इति वा ध्वनिर्भवति । तत्रैव ध्वनौ वामतोऽपि अङ्गुलिताडनजन्यध्वनेः सम्मिश्रणेन 'धा' इति 'धिन' इति वा गम्भीरो ध्वनिर्भवति ।

इत्थञ्च येषां वर्णानामुच्चारणे कण्ठबिलस्य विवारः तेषामेव विकारफलस्वरूपो श्वासाघोषौ, येषां च उच्चारणे गलबिलसंवारः तेषां संवारफलरूपौ नादघोषौ । तत्र ये वर्णाः विवारश्वासाघोषवन्तः ते अगम्भीराः। यथा क, त, इत्यादयः , ये च वर्णाः संवारनादघोषिणः अनुभूयन्ते तेषु गाम्भीर्यः यथा घ, ध, इत्यादयः । अस्ति हि तकारादिवर्गप्रथमद्वितीयापेक्षया धकारादिवर्गचतुर्थादीनां गाम्भीर्यम् । एवं विवारादयः षड् भेदाः विवेचिताः । अथ यदा स एव श्वासः अल्पमात्रः प्रतिनिवर्तते तदा अल्पप्राणता यदा च प्रचुरमात्रः प्रतिनिवर्तते तदा महाप्राणता, श्वासप्राचुर्याच्च ध्वनौ ऊष्मता भवति इति महाप्राणवतां वर्गद्वितीयचतुर्थशषसहादीनामूष्मता । उदात्तानुदात्तस्वरितरूपाणां बाह्यप्रयत्नानां स्वरूपमुक्तम् । एतेषां बाह्यप्रयत्नानां कृते पाणिनीयशिक्षायामनुप्रदान शब्देन व्यवहारः कृतश्च, अनुप्रदानशब्दस्य च अनुवर्णोत्पत्तेः आस्यतो वा पश्चात् प्रदीयन्ते व्यवस्थाप्यन्ते इत्यर्थः । एवं बाह्यप्रयत्नानां कृते अनुप्रदानशब्दस्य व्यवहारं कुर्वता पाणिनीयशिक्षाकृता बाह्यप्रयत्नानां वर्णनिष्पत्तेः पश्चाद् भाविता सूचितैव । नासिकायाः अपि आस्यबाहिष्ठतया आनुनासिक्यं पाणिनीयशिक्षा-यामनुप्रदानेष्वेव परिगणितम् । परन्तु स्थानप्रकरणोक्तरीत्या वर्गपञ्चमादीनां विषये नासिकायाः स्वरूपाधायकता । इह बाह्यप्रयत्नप्रकरणे गुणरूपा एव

बाह्यप्रयत्नाः विवेचनीयाः ।

अतः एकादशसु आनुनासिक्यं न परिगणितमस्माभिः । अत एव मात्राकालिकत्वादीनामपि एकादशसु बाह्यप्रयत्नेषु गणना न कृता शिक्षाकरैः । (अत्रेदं बोध्यं यत्कालस्य केवलमापिशलिशिक्षायां स्पष्टतया बाह्यप्रयत्नत्वमुक्तम् ।) एतेऽपि हि सन्ति प्रागुक्तरीत्या बाह्यप्रयत्नेषु स्वरूपाः । परन्त्वेषां स्वरूपाधायकता न गुणत्वम् । अस्माभिस्तु वस्तुस्थितिप्रदर्शनार्थ मतिरिच्य बाह्यप्रयत्नत्वेन मात्राकालिकत्वादयः उक्ताः । परन्तु न तेषु अत्र विवेचनीयं गुणरूपं बाह्यप्रयत्नत्वम् । इत्थञ्च विवारादयः एकादश बाह्यप्रयत्नाः इति स्थितम् ।

एषु च बाह्यप्रयत्नेषु केषां वर्णानां के प्रयत्नाः इति एतद् विषये निष्कर्षरूपेण लघुसिद्धान्तकौमुद्यामुक्ताः बाह्यप्रयत्नाः लिख्यन्ते । पश्चात् शिक्षाद्यनुसारं विचारो भविष्यत्येव । (अत्र खरहशादयः पाणिनीयवर्णसमाम्नायाः प्रत्याहाराः) खरो, विवाराः, श्वासाः , अघोषाश्च , हशः, संवाराः नादा घोषाश्च, वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः, वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः [१६]। अत्रेदं बोध्यम् यद् उदात्तादयो यद्यपि बाह्यप्रयत्नाः तथापि तेषां स्वरप्रकरणे विवेचनीयतया तान् अगणयित्वा एव वर्णानां बाह्यप्रयत्नाः लिख्यन्ते ।

पाणिनीयशिक्षायां बाह्यप्रयत्नाः -:

पाणिनीयशिक्षायां विवारसंवारो, श्वासनादौ, अघोषघोषौ इति षण्णां बाह्यप्रयत्नानां उल्लेखः कृतः । परं विवारसंवारयोः अत्र विवृतसंवृतशब्दाभ्यां व्यवहारः उपलभ्यते । महाप्राणाऽल्पप्राणो अत्र न प्रदर्शितौ । श्वासस्य नादस्य च तारतम्येन प्रत्येकं श्वासः ईषच्छ्वासः, नादः, ईषन्नादः इति द्वौ द्वौ प्रभेदौ उक्तौ ।

घोषा वा संवृता सर्वे अघोषा विवृता स्मृताः ।
अमोऽनुनासिका न ह्रौ नादिनो ह झषः स्मृताः ।।
ईषन्नादा यणो जश्च श्वासिनस्तु खफादयः ।
ईशच्छ्वासांश्चरो विद्यात् गोर्धामैतत्प्रचक्षते ।।

दाक्षीपुत्रपाणिनिना येनेदं व्यापितं भुवि ॥[१७]

अनयोः श्वासनादयोः प्रभेदो प्रायः शिक्षान्तरेषु न दृश्येते । इत्येतद्विषये पाणिनीयशिक्षायाः सूक्ष्मदर्शिता स्पष्टा । एषु च बाह्यप्रयत्नेषु वर्गचतुर्थानां हकारस्य च नादः, वर्गतृतीयानां यरलवानाञ्च ईषन्नादः, वर्गचतुर्थापेक्षया वर्गतृतीयादिषु नादः सन्नपि अल्पमात्रम् । अत एव वर्गचतुर्थेषु घकारादिषु यावद् गाम्भीर्यं न तावद् वर्गतृतीयेषु गकारादिषु श्रूयते इति भावः । वर्गद्वितीयानां श्वासः , वर्गप्रथमानां शषसनाञ्च ईषच्छ्वास अर्थात् वर्गतृतीयापेक्षया वर्गप्रथमेषु श्वासस्य अल्पता । एवं रीत्या नादेषन्नादश्वासेषच्छ्वासानां विवेकः , सुस्पष्टतया अत्र कृतः । विवारादीनां विषये घोषवर्णानां विवृतता, अघोषाणां च संवृतता इत्येवात्र उक्तम् । न तु केषां वर्णानां घोषता, अघोषता वा इति स्पष्टी कृतम्। अत्र आनुनासिक्यमपि अनुप्रदानप्रस्तावे एव गणितम् । तच्च आनुनासिक्यम् (पा.शि. ३९) अमोऽनुनासिका न ह्रौ, इति पाठानुसारं स्वराणां यवलानां वर्गपञ्चमानां च । तत्र वर्गपञ्चमानां नित्यानुनासिकता, इतरेषां तु वैकल्पिकी इति स्थानप्रकरणे प्रतिपादितम् अस्माभिः । उक्तपाठाद् अन्यौ अपि यमोऽनुनासिका अमोऽनुनासिका इति द्वौ पाठौ शिक्षापञ्चिकायां प्रदर्शितौ । एतत्पाठद्वयानुसारी अर्थस्तु शिक्षापञ्चिकायामेव द्रष्टव्यः ।

अत्र विषये शिक्षान्तराणि -:

आपिशलिशिक्षायां विवारादयोऽष्टावपि बाह्यप्रयत्नाः उक्ताः । (वर्गाणां प्रथमद्वितीयाः शषसविसर्जनीयजिह्वामूलीया यमौ प्रथमद्वितीयौ विवृतकण्ठाः, श्वासानुप्रादानाः , अघोषाः । वर्गयमानां प्रथमेऽल्प प्राणाः. इतरे सर्वे महाप्राणाः । वर्गाणां तृतीयचतुर्थाः अन्तस्थाः हकारानुस्वारौ यमौ च तृतीयचतुर्थौ संवृतकण्ठाः नादानुप्रदानाः घोषवन्तः । वर्गयमानां तृतीय अन्तस्थाश्चाल्पप्राणाः इतरे सर्वे महाप्राणाः । यथा तृतीयास्था पञ्चमाः आनुनासिक्यमेषामधिको गुणः ।) परन्तु पाणिनीयशिक्षावत् श्वासनादयोः प्रभेदौ नात्र प्रदर्शितौ इति न्यूनता । आधिक्यं च एतद् यदत्र पाणिनीयशिक्षायामनुक्तौ अल्पप्राणमहाप्राणौ अपि निर्दिष्टौ । एषां विवेकश्च अत्र यथा कृतः तथा स्पष्टमेव अधोनिर्दिष्टैः एतदीयसूत्रैः । आपिशलशिक्षावदेव सूत्रात्मकपाणिनीयशिक्षायामपि बाह्यप्रयत्नविमर्शः वर्तते ।

चान्द्रवर्णसूत्रेष्वपि अष्टौ बाह्यप्रयत्नाः उक्ताः । तेषां व्यवस्था च इत्थम् , बाह्यः३०। वर्गाणां प्रथमद्वितीयाः शषसविसर्जनीयजिह्वामूलीयोपध्मानी याश्च विवृतकण्ठाः, श्वासानुप्रदाना, अघोषाः ३१। प्रथमतृतीपञ्चमा अन्तस्थाश्चाल्पप्राणाः ३२। इतरे महाप्राणाः ३३ । तृतीयचतुर्थपञ्चमाः सानुस्वारान्तस्थहकाराः संवृतकण्ठा नादानुप्रदाना घोषवन्तः ३४ ।

याज्ञवल्क्यशिक्षायां संवारविवारघोषाघोषाणां चतुर्णाम् एव उल्लेखः । संवारविवारयोश्च संवृतविवृतशब्दाभ्यामत्र व्यवहारः । तत्र घोषवर्णानां संवृतता, अघोषाणां च विवृतता इति विवेकः । के घोषाः अघोषाश्च इति एतच्छिक्षीयोद्धरणे एव विशदम् । एवञ्च अत्रत्ये बाह्यप्रयत्नविचारे किं तारतम्यमिति स्पष्टमेवेति । न पृथग् लेखनस्यावश्यकता । (संवृताघोषाः । विवृता अघोषा । विंशति घोषास्ते । गजडदबाः घझढधमाः ङञणनमाः यरलवाः, हकारश्चेति । त्रयोदशाऽघोषास्ते कचटतपाः, खछठथफाः, शषसाश्चेति ।[१८]

पराशरशिक्षायां घोषाघोषयोः द्वयोरपि बाह्यप्रयत्नयोः उल्लेखः दृश्यते । अत्र केषाम् अघोषता केषां घोषता इति याज्ञवल्क्यशिक्षावदेव विवेचितम् ।

वर्गाणां प्रथमा वर्णाः द्वितीया ऊष्मसंज्ञिताः ।
हकारवर्ज्याश्चाघोषाः शिष्टं घोषवदुच्यते ॥[१९]

शैशरीयशिक्षायामपि घोषाघोषयोरेव प्रतिपादितम् । तत्र च वर्गप्रथमद्वितीयानां शषसानां अघोषता, इतरेषां घोषता इति पूर्ववदेव व्यवस्था अत्राप्युक्ता । विशेषतः इदमत्र अवधेयं यद् याज्ञबल्क्यशिक्षादौ अघोषवर्णवद् घोषवर्णा अपि परिगणिताः । तत्र परिगणने व्यञ्जनामेव समावेशः । परन्तु अस्यां शिक्षायाम् अघोषान् परिगणय्य अतोऽन्ये घोषाः इत्युक्तम् । तेन स्वराणामपि घोषता ध्वनिता ।

नादश्च संवृते कण्ठे श्वासस्तु विवृते सति ।
हकार क्रियते मध्ये वर्णप्रकृतयश्च ताः ॥
हकारो ह्यचतुर्थेषु श्वासो घोषेषु चैव हि ।
स भूयाम्प्रथमान्येषु ह्येतानेव विदुर्ध्वनीन् ॥
प्रथमान्येष्वघोषेषु महाप्राण उदाहृतः ।

अल्पप्राणस्तु प्रथमवर्णेष्वेव प्रकीर्तितः ॥

कण्ठबिलस्य अवस्था त्रयं भवति । कदाचित् कण्ठबिलं विवृतं , कदाचित् संवृतं कदाचिच्च नातिविवृतम् , न वा अतिसंवृतम् , अर्थात् मध्यमावस्थां भवति । तत्र पूर्वोक्तरीत्या कण्ठबिलस्य पूर्णविवारदशायां श्वासः, पूर्णसंवारदशायां च नादः, मध्यमदशायां तु श्वासनादद्वयम् । इदमेव श्वासनाद्वयं हकारपदेन उच्यते ।

एतच्च श्वासः, नादः , श्वासनादोभयं चेति तिस्रः बाह्यप्रयत्नस्य अवस्थाः भवन्ति । एतदेव अवस्थात्रयं वर्णानां प्रकृतित्रयमित्युच्यते । तत्र च हकारे वर्णचतुर्थेषु च हकारः अर्थात् एषां श्वासनादोभयम् । एतदभिव्यक्त्युत्तरं कण्ठबिलस्य मध्यमावस्था भवति येन श्वासनादोभयं जायते इति भावः । अत एव वर्गचतुर्थेषु हकारांशः श्रूयते । अघोषवर्णानां महाप्राणः , वर्गप्रथमवर्णानां तु अल्पप्राणः । इत्येवं रीत्या बाह्यप्रयत्नविचारः कृतः । अत्र यत् बाह्यप्रयत्नस्य श्वासनादोभयात्मिका तृतीया अवस्था उक्ता । तदेतत् पाणिनीयप्रभृतिशिक्षासु न तु विचारितमिति एतद्विषये इयं शिक्षा शिक्षान्तरतो विशिष्यते ।

अत्र यद्यपि प्रथमवर्णातिरिक्तानामघोषवर्णानां श्वासः इत्येवोक्तम् । के ते अघोषाः इति न प्रतिपादितम् । तथापि याज्ञवल्क्यशिक्षाद्युक्तरीत्या अघोषाः ग्राह्याः । वर्गप्रथमद्वितीयानामेव च अल्पप्राणता महाप्राणते अत्रोक्ते । वर्गतृतीयादीनां प्राणविचारः न दर्शितः । एवं श्वासनादोभयवन्तः श्वासवन्तश्च वर्णाः अत्रोक्ताः केवलनादवन्तस्तु नोक्ताः । अतः पारिशेष्यात् अवशिष्टानां नादवत्ता बोध्या । एतदाशयेनैव अस्माभिः इतरेषां नाद इति लिखितमुपरि । एतेन विवेचितेन पाणिनीयशिक्षातः एतच्छिक्षायाः साम्यवैषम्यादिकं स्पष्टमिति मन्यामहे ।

तैत्तिरीयप्रातिशाख्ये पारिशिक्षावदेव श्वासः नादः हकारः श्वासनादोभयम् । इति तिस्रः अवस्थाः उक्ताः । तासां व्यवस्थापनमपि पारिशिक्षावदेवात्र । परमयं विशेषो यत् पारिशिक्षायां श्वासस्य श्वासनादोभ्यस्य च व्यवस्था दर्शिता । किन्तु केषां वर्णानां घोषवताञ्च नाद इति स्पष्टं लिखितम् । एवं घोषाघोषयोरपि विवेकः पारिशिक्षायां न कृतः । (संवृते कण्ठे नादः क्रियते । विवृते श्वासः,

मध्ये हकारः ता वर्णप्रकृतयः नादोऽनुप्रदानं स्वरघोषवत्सु हकारो हचतुर्थेषु अघोषेषु श्वासः , भूयान्प्रथमेभ्योऽन्येषु ऊष्मविसर्जनीयप्रथमाद्वितीया अघोषाः न हकारः व्यञ्जनेषो घोषवान् । प्रथमप्रश्ने प्रथमोऽध्यायः । तैत्तिरीयप्रातिशाख्य) अत्र तु इमे घोषाः इमे अघोषाः इति प्रतिपादितम् । महाप्राणाल्पप्राणयोश्च नात्र निर्देशः । पाणिनीयशिक्षायां यथा श्वासनादयोः प्रभेदौ उक्तौ तथा अत्रापि श्वासस्य अल्पीयस्त्वं भूयस्त्वं चेति द्वैविध्यम् उक्तम् । परन्तु न नादस्य । तत्र प्रथमवर्णानामल्पश्वासः प्रथमान्येषामघोषाणामर्थात् द्वितीयानां शषसनाञ्च भूयान् श्वासः । पाणिनीयशिक्षायां प्रथमद्वितीययोः श्वासकथनमित्येव । परन्तु श्वासानां पाणिनीयशिक्षायाम् , ईषच्छ्वासतैव उक्ता इति विशेषः । इदञ्च श्वासस्य द्वैविध्यं प्राङ्निर्दिष्टायां पारिशिक्षायामपि एतत्प्रातिशाख्यवदेव दृश्यते ।

ऋक्तन्त्रेऽपि तैत्तिरीयप्रातिशाख्यवदेव बाह्यप्रयत्नविचारः , अर्थात् अत्रापि श्वासः , नादः, श्वासनादोऽभयम् , इति अवस्थात्रयं बाह्यप्रयत्नस्य उक्तम् । एषाञ्च वर्णविषये व्यवस्थापनमपि अर्थतः तैत्तिरीयप्रातिशाख्यवदेव । परमयं विशेषो यदत्र घोषाघोषाणां वर्णानां स्पष्टीकरणं न कृतम् । तैत्तिरीये तु इमे घोषाः इमेऽघोषाः इति स्पष्टम् अभिहितम् । (संवृतो घोषवान् । विवृतोऽघोषेषु नादानुप्रदानाः स्वरघोषवन्तः , श्वासोऽघोषाणाम् । तनीयान् प्रथमावुभौ हचतुर्थानां सन्निवेशोऽन्यः ।

ऋक्प्रातिशाख्येऽपि तैत्तिरीयवदेव श्वासः । नादः । श्वासनादोभयमिति तिस्रः प्रकृतयः उक्ताः तस्यां गलबिलस्य कस्यां दशायां श्वासादिकम् । इत्यादिकमपि अत्र स्पष्टीकृतम् । (वायुः प्राणः ओष्ठ्यमनुप्रदानं कण्ठ्यस्य खे विवृते संवृते वा । आपद्यते श्वासतां नादतां वा वक्त्रीहायाम् । उभयं वान्तरोभौ, ता वर्णानां प्रवृत्तयो वदन्ति श्वासोऽघोषाणामितरेषां तु नादः । सोष्मोष्माणां घोषिणां श्वासनादौ । तेषां स्थानं प्रति नादात्तदुक्तम् । प्रयोक्तुरीहागुणसन्निपाते वर्णीभवन् गुणविशेषयोगात् । एकश्रुतीः कर्मणाऽप्नोति बहिरेको वर्णाच्छाश्वतिकान् न कार्यान् आहुर्घोषं घोषवतामकारम् । एकेऽनुस्वारमनुनासिकानां । सोष्मतां च सोष्मणामूष्मणामाहुः स स्थानेन घोषिणां घोषिणैव । अत्रोत्पन्नावपर उष्मघोषौ शीघ्रतरं सोष्मसु प्राणमेके ।)

एषां व्यवस्थापि तैत्तिरीयप्रातिशाख्यवदेव, परमत्र प्रथमतृतीययोः श्वासस्य तारतम्यं नोक्तम् । अन्यच्च तृतीयादिवर्णानां या घोषता चतुर्थद्वितीयानां च या सोष्मता सा न स्वाभाविकी किन्तु वर्णान्तरसम्मिश्रणप्रयुक्ता ।

तथाहि एके आचार्याः घोषवत्सु गकारादिषु घोषः अकारसम्मिश्रणप्रयुक्तः; अनुनासिकानां घोषता अनुस्वारसम्मिश्रणप्रयुक्ता । एवं सोष्माणः प्रतिवर्गं द्वितीयचतुर्थः वर्णाः तेषु सोष्मताऽपि वर्णान्तरसम्मिश्रणप्रयुक्तैव । तद्यथा खछठथफवर्णेषु यथासंख्यं कशषसपवर्णसम्मिश्रणप्रयुक्तैव सोष्मता । चतुर्थवर्णानाञ्च हकारसम्मिश्रणप्रयुक्तासोष्मता । वर्णनित्यतावादिनः अखण्डस्फोटवादिनः अन्ये चाचार्यास्तु वर्णानां घोषत्वसोष्मत्वादिकं न अन्यवर्णसम्मिश्रणप्रयुक्तं, तथा सति वर्णानां वर्णद्वयसंयोगनिष्पन्नत्वे अनित्यत्वं प्रसज्येत । तस्मात् वर्णाः न वर्णद्वयसम्मिश्रिताः किन्तु अखण्डा एव इति घोषत्वादिकं स्वाभाविकमेव इत्यादिकमत्र मतमतान्तरेण प्रतिपादितम् । एतत् सर्वं एतत्प्रातिशाखीयोब्बटभाष्यानुरोधेन लिखितम् । अत्रोक्तः द्वितीयः एव पक्षः अखण्डस्फोटवादिनां वैयाकरणानां सम्मतः यदाह हरिः -

पदे न वर्णाः विद्यन्ते वर्णेष्ववयवा न च ।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ।।[२०]

एवं सति वर्णानामखण्डत्वे । वर्णादिषु तत्तत्वर्णांशश्रुतिः किं मूलिका इत्यपि हरिणैव समाहितम् । प्रोक्तञ्च -

प्रत्येकं व्यञ्जकाः भिन्नाः वर्णवाक्यपदेषु ये ।
तेषामत्यन्तभेदेऽपि सङ्कीर्णा इव शक्तयः ।।[२१]

इत्थञ्च सन्ध्यक्षरेष्वपि न वर्णानां सम्मिश्रणं किन्तु स्वतन्त्राण्येव सन्ध्यक्षराणि । पूर्वोक्तवर्णांशमात्राविचारावसरे सन्ध्यक्षराणाम् अकारादिघटितत्व कथनं तु तद्व्यंजकध्वनीनां स्वतन्त्राकारादिव्यञ्जकध्वनिसादृश्यात् । पाणिनीयशिक्षाकर्तुरपि अयमेव अखण्डवर्णवादः सम्मतः, अत एव पाणिनीयशिक्षायां घकारादीनां हकारादिघटितता हकारादिप्रयुक्तमेव च सोष्मत्वघोषत्वादिकं न विचारितम् । सन्ध्यक्षराणां विषयेऽपि अर्धमात्रा तु कण्ठ्या स्यात् इत्याद्येव उक्तं न तु सन्ध्यक्षरेषु ऋकारादिशब्देन विभागः

प्रदर्शितः ।

शौनकचतुरध्याय्यां अघोषवर्णानां श्वासानुप्रदानता , घोषवर्णानां च नादानुप्रदानता इत्येव बाह्यप्रयत्नविषये सङ्केत उपलभ्यते । (श्वासोऽघोषेष्वनुप्रदानः चादौ घोषवत्स्वरेषु ।) भरतनाट्यशास्त्रेऽपि केवलं घोषाघोषाणं विवेकः कृतः । (गघङ, जझञ, डढण, दधन, बभम, तथैव यरलवहाः घोषाः । कख, चछ, टठ, तथ, पफ, इति वर्गेश्वघोषाः १४/११) नान्येषां बाह्यप्रयत्नानां प्रदर्शनम् । अग्निपुराणे श्वासनादानुप्रदानयोः विचारः अक्षरसः पाणिनीयशिक्षावदेव दृश्यते। परन्तु अन्येषां बाह्यप्रयत्नानां नात्र प्रतिपादनम् ।

एतावता उद्धृतेषु शिक्षादिषु विवारसंवारश्वासनादघोषाघोषाल्पप्राण महाप्राणानामष्टानां बाह्यप्रयत्नानां विचारः उपलब्धः । तत्र च कुत्रचित् घोषाघोषयोः द्वयोरपि यथा शैशरीयशिक्षायाम् कुत्रचित् विवारसंवारघोषाघोषाणां चतुर्णां यथा याज्ञवल्क्यशिक्षायाम् , कुत्रचित् अष्टानामपि यथा आपिशलशिक्षायां विचारः कृतः । इदमत्र तत्त्वम् यद् प्रागुक्तरीत्या श्वासाघोषयोः विवारप्रयुक्तत्वेन, नादघोषयोश्च संवारप्रयुक्तत्वत्वेन विवारश्वासाघोषत्रये संवारनादघोषत्रये च एकोऽपि प्रयत्नो यदि उक्तः तदा अवशिष्टप्रयत्नद्वयविषये सम्मतिरेव मन्तव्याः ।

इत्थं च यत्र शिक्षायां घोषाघोषयोरेव प्रतिपादनं तद्रीत्या विवारादयो नैव सन्तीति न भ्रमितव्यमिति । किन्तु संक्षेपार्थान् सर्वान् अनुत्त्वा द्वौ एव चत्वारः एव वा बाह्यप्रयत्नाः प्रदर्शिताः । इत्येवं रीत्या तत्तद् ग्रन्थानां समन्वयः कार्यः । तैत्तिरीयप्रातिशाख्यादौ कण्ठबिलस्य अवस्थानुसारं बाह्यप्रयत्नस्य अवस्थात्रयं वर्णितम् । एतच्च पाणिनीयशिक्षायां नोक्तम् । तृतीयावस्थायाः श्वासनादोभयरूपतया श्वासनादाभ्यामेव गतार्थत्वात् । एषां च बाह्यप्रयत्नानां वर्णविशेषव्यवस्था यथा सुबोध सुस्पष्टा च आपिशलिशिक्षायामुक्ता न तथा प्रायः अन्यत्र ।

एषु च शिक्षाग्रन्थेषु व्यञ्जनानां विषये विचारः कृतः तथा न सुस्पष्ट स्वराणाम् । शैशरीयशिक्षायामघोषान् परिगणय्य शिष्टं घोषवदुच्यते इति उक्तम् । तत्र च शिष्टशब्देन स्वरानपि संगृह्य स्वराणां घोषवत्ता वक्तुं शक्या । तैत्तिरीयप्रातिशाख्ये च स्वराणां नादवत्ता स्पष्टमेव उक्ता । नादघोषयोश्च

संवारनिष्पन्नतया संवारस्याप्याक्षेपात् स्वराणां संवारनादघोषाः बाह्यप्रयत्नाः लभ्यन्ते । परं स्वराणां घोषवता स्वीकारे नादोऽनुप्रदानं स्वरघोषवत्सु इति तैत्तिरीयसूत्रे स्वराणां पृथगुल्लेखः स्पष्टमेव मन्तव्याः । एवमुदात्तत्वादिरूपाः त्रयः अपि स्वराणां बाह्यप्रयत्नाः । (स्पष्टमेतदुच्चैरुदात्त इत्यत्र भाष्ये दर्शितञ्चास्माभिः स्वरप्रकरणे)

भाष्यपर्यालोचनया तु स्वराणां संवारनादघोषाल्पप्राणाः बाह्यप्रयत्नाः इति लभ्यन्ते । तथाहि सुपां सुलुगि इति सूत्रे महाभाष्ये परमे व्योमन् इत्यादौ सप्तम्येकवचनस्य ङे इकारस्य स्थाने सुपां सुलुगि इति सूत्रेण पूर्वसवर्णस्य प्रसङ्गे तथापि पूर्वस्य नकारस्य सवर्णाः तथदधन इत्येते पञ्चापि वर्णाः तथापि आन्तरतम्याद् इकारस्य स्थाने दकार एव भविष्यति इत्युक्तम् । इदञ्च इकारदकारयोः आन्तरतम्यं न स्थानकृतम् , नापि आभ्यन्तरप्रयत्नकृतं, किन्तु बाह्यप्रयत्नकृतमेव । इकारदकारयोः बाह्यप्रयत्नकृतं आन्तरतम्यञ्च तदेव सङ्गच्छते यदा दकारस्य ये ये बाह्यप्रयत्नाः ते ते इकारस्य स्युः , दकारस्य च संवारनादघोषाल्पप्राणाः बाह्यप्रयत्नाः एते एव च इकारस्यापि ।

अत्र इकारस्य अल्पप्राणत्वानङ्गीकारे शेषैः त्रिभिः बाह्यप्रयत्नैः दकारवत् धकारस्यापि इकारेण आन्तरतम्यं भविष्यति दधौ पर्यायेण स्यातां न तु केवलं दकारः । एवम् इकारस्य संवारनादघोषत्वाभावे केवलं अल्पप्राणत्वे दकारवत् तकारस्यापि अल्पप्राणतया तदौ पर्यायेण स्यातां न तु दकार एव । स्वीकृतश्च भाष्यकृता इकारस्थाने केवलं दकार एव , तेनेदं प्रतीयते यद् भाष्यकारः उक्ताः चत्वारोऽपि प्रयत्नाः इकास्य सन्तीति मन्यते । इकारस्य उक्तप्रयत्नचतुष्टयत्वे लब्धे उपलक्षणतया अन्येषामपि अचामुक्ताश्चत्वारोऽपि बाह्यप्रयत्नाः सन्तीति सुतराम् आयात्येव । स्पष्टञ्चैतत् लघुशब्देन्दुशेखरे संज्ञाप्रकरणे ।

एवं रीत्या शिक्षादिषु उपलब्धः वर्णानां स्थानादिविचारः यथा मति उपस्थापितः । अत्र च वर्णानां स्थानादिविषये तत्र तत्र दृश्यमानः सर्वोऽपि मतभेदः एकस्यैव वर्णस्य उच्चारणे व्याप्रियमाणेषु बहुष्वपि आस्यान्तर्गतेषु उच्चारणावयवेषु एकस्य कस्यचित् प्राधान्यमिच्छता केनचित् शिक्षाकृता

एकस्य तद्वर्णस्थानत्वमुक्तम् । अन्यस्य च उच्चारणावयवस्य प्राधान्यम् इच्छता अपरेण शिक्षाकारेण अपस्य स्थानता उक्ता इति उभयोक्तयोरपि स्थानयोः तद्वर्णोच्चारणे व्यापारः इति रीत्या देशभेदेन, भाषाभेदेन एकस्यापि वर्णस्य उच्चारणप्रकारः ध्वनिश्च विशिष्यते । श्रूयते च विभिन्नदेशेषु विभिन्नभाषासु वा वर्णानां ध्वनिविशेषः, वर्णानां श्रुतिविशेषश्च स्थानादिविशेषकृत एव । नहि स्थानादिविशेषं विना वर्णानां ध्वनिविशेषः उपपादयितुं शक्यः । कारणवैशेष्यस्य कार्यविशेष्यप्रयोजकत्वात् । वेदमन्त्राणामपि उच्चारणप्रकारे देशभेदेन श्रूयते विशेषः एक एव मन्त्रः एतत्प्रान्तीयैः पाठकैः अन्यथा उच्चार्यमाणः , प्रान्तान्तरीयैश्च अन्यथोच्चार्यमाणः श्रूयते । अत्रापि उच्चारणविशेषविशेषे सूक्ष्मतरस्थानप्रयत्नादिविशेष एव बीजमिति देशविशेषीयम्, परम्पराविशेषीयम् , भाषाविशेषीयं वा वर्णानामुच्चारणप्रकारं ध्वनिविशेषं च अनुरूद्ध्य तत्र आचार्यैः तेषां स्थानादिविवेकः कृतः इति रीत्या वा समन्वेयः। आपिशलिशिक्षादौ दृश्यमानाः वर्णस्थानविषयकाः नानापक्षाः अपि इत्थमेव उपपादयितुं शक्याः । सिद्धान्तकौमुदी दिशा बाह्यप्रयत्नविचारः बाह्यप्रयत्नस्वेकादशधा विवारः संवारः श्वासो नादो घोषो अघोषो अल्पप्राणो महाप्राणा उदात्तोऽनुदात्तश्चेति । पूर्वत्रासिद्धम् इति सूत्रे भट्टोजिदीक्षितेनोक्तम्

खयां यमाः खयः ँक ँपौ विसर्ग शर एव च ।
एते श्वासानुप्रदाना अघोषाश्च विवृण्वते । ।
कण्ठमन्ये तु घोषाः स्युः संवृता नादभागिनः ।
अयुग्मा वर्गयमा यणश्चाल्पासवः स्मृताः [२२]।।

पूर्वं तावत् विचार्यते यमाः अयोगवाहाः अनुप्रदानाश्च -

१.यमाः वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये यमो नामपूर्वसदृशो वर्णः यमः इति प्रातिशाख्ये प्रसिद्धः ।

२.अयोगवाहाः - वहन्ति इति वाहाः । युज्यते इति योगः, न योगः अयोगः अयोगाश्च ते वाहाः इति अयोगवाहाः । अर्थात् माहेश्वरसूत्रेण सह येषां योगाभावेऽपि ते कार्यं कुर्वन्ति यथा अनुस्वारविसर्गजिह्वामूलीयोपध्मानीयाः यमाः । ते अयोगवाहाः । वर्णसमाम्नाये येषां पाठो नास्ति ।

३. अनुप्रदानम् अनु पश्चात् प्रदीयते =जन्यते इति अनुप्रदानम् बाह्यप्रयत्नः। खय् प्रत्याहारः (ख फ छ ठ थ ट च त क प) तथा तेषां यमाः जिह्वामूलीयः उपध्मानीयः विसर्ग शरप्रत्याहारः (श ष स) एतेषां विवारः श्वास अघोषः बाह्यप्रयत्नः कण्ठ्यम् अर्थात् कण्ठरवेणोक्तम् । अन्ये हश् प्रत्याहारः (ह य व र ल ञ म ङ ण न झ भ घ ढ ध ज ब ग ड द) यण् प्रत्याहारः (य व र ल) यणश्च अत्र चकारेण अच् प्रत्याहारः (अ उ ऊ ऋ ऌ ए ओ ऐ औ) एतेषां संवार नाद घोष अल्पप्राण उदात्तानुदात्तस्वरितश्च एवं प्रकारेण अचां सप्त बाह्यप्रयत्नाः भवन्ति । वर्गाणां द्वितीयचतुर्थवर्णाः बाह्यप्रयत्नाश्च यद्यपि सवर्णसंज्ञायामनुपयुक्ताः तथापि आन्तरतम्यपरीक्षायामुपयुक्ताः भवन्ति । शुद्धोच्चारणे सायुज्यमुक्तिः तथापि ब्राह्मणसमाजे विद्वत्समाजे च प्रतिष्ठितो भवति । उक्तञ्च - पाणिनीयशिक्षायाम् -

एवं वर्णाः प्रयोक्तव्याः नाऽव्यक्ता न च पीडिताः ।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ।।[२३] इति शम् ।।

पादटिप्पणी

१.पा.सू.१.१.९
२.पा.सू.१.१.१०
३.महाभाष्यप्रदीपोद्योते
४.पाणिनीयशिक्षा ३८,२१
५.पा.सू.६.१.१०१
६.आपिशलिशिक्षा
७.चान्द्रवर्णसूत्रम्
८.वर्णरत्नप्रदीपिका
९.माण्डूक्यशिक्षा
१०.शैशरीयशिक्षा
११.याज्ञवल्क्यशिक्षा,उत्तरार्धः
१२. अग्निपुराणम्
१३.भरतनाट्यम्

१४. ऋक्प्रातिशाख्ये

१५.शिवसूत्रम् १

१६.लघुसिद्धान्तकौमुदी

१७.पाणिनीयशिक्षा २०, ३९,४०

१८.याज्ञवल्क्यशिक्षा, उत्तरार्धः

१९.पराशरशिक्षा

२०.वाक्यपदीयम् ब्रह्मकाण्डम्

२१.वाक्यपदीयम् १/८८

२२.वैयाकरणसिद्धान्तकौमुदी, संज्ञाप्रकरणम्

२३.पाणिनीयशिक्षा

षष्ठोऽध्यायः

१.मातृकादृष्ट्या वर्णानां विवेचनम्

२.दार्शनिकदृष्ट्या वर्णानां विवेचनम्

षष्ठोऽध्यायः

मातृकादृष्ट्या वर्णानां विवेचनम्

तन्त्रनाम शास्त्रस्य श्रीमहाविद्यायाः साम्प्रदायिकः ग्रन्थविशेषः । यश्च शारदातिलकमिति नाम्ना प्रसिद्धो वर्तते । तत्र हि वर्णानां तज्जन्य मन्त्रानुष्ठानानामेव माहात्म्यमुल्लिखितं वर्तते । तत्र मातृकायाः पर्यायाः यथा -

जया दुर्गा प्रभा सत्या चण्डा वाणी विलासिनी ।
विजया विरजा विश्वा विनदा सुनदा स्मृतिः ॥
ऋद्धिः समृद्धिः शुद्धिश्च भक्तिः बुद्धिः क्षमा रमा ।
उमा क्लेदिनी क्लिन्ना च वसुदा वसुधाऽपरा ॥
परा परायणा सूक्ष्मा सन्ध्या प्रज्ञा प्रमा निशा ।
अमेधा विद्युता कीर्तिः आद्या च सर्वकामदा ॥

एताः मातृकाः खलु पङ्कजाभयमुद्राः सहिताः शिवस्याङ्के निषण्णाः सस्मितानना आख्याताः । एवञ्च मातृकावर्णभेदेभ्यः एव सर्वे मन्त्राः समुत्पन्नाः सन्ति । ते च मन्त्राः सोमसूर्यानिलात्मकाः शिवशक्तिमयाश्च । मन्त्रविद्या विभागेन ते वर्णाः त्रिविधाः कथिताः । पुल्लिङ्गस्त्रीलिङ्गनपुसङ्कलिङ्गभेदेन मातृकाः यथा उपदिष्टाः तथैव भवन्ति । तत्र मन्त्राः पुंदेवताः । विद्याश्च स्त्रीदेवताः । स्वरवर्णचतुष्काः ऋ ॠ ऌ ॡ वर्णात्मकाश्च नपुंसकाः । स्वरैर्विना अन्येषामपि वर्णानामुच्चारणाभावात् तदात्मकत्वं मन्त्राणामुक्तं भवति । अत्रेयं शङ्का जागर्ति यत् निष्कलचैतन्याखण्डानन्दवाच्यस्य मन्त्रस्य कथं पुंनपुंसकस्त्र्यादिकल्पनमिति ? चेदुच्यते यद्यपि मन्त्रेषु स्त्रीपुंस्त्वादिकल्पना न योग्या तथापि उपासकानां कृते तथा कल्पना कृता उक्तञ्च -

चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः ।
उपासकानां कार्यार्थं ब्रह्मणोरूप कल्पना ।
रूपस्थानां देवतानां पुंस्त्रयङ्कादि प्रकल्पना [१]॥

तथा च पुंमन्त्राः हुंफडन्ताः , स्त्रीमन्त्राः, द्विष्ठान्ताश्च नपुंसकाः नमोऽनन्ता·

एवं त्रिविधाः मन्त्राः आख्याताः । तथा च -

पुंमन्त्राः हुंफडान्ताः स्युर्द्विष्ठान्ताश्च स्त्रियो मताः ।
नुपंसकाः नमोऽनन्ताः एवं त्रिविधाः मन्त्राः [२]।।

अत्र ग्रन्थे वर्णविज्ञानमवलोक्य माहेश्वरचतुर्दशसूत्राणां महत्वं नूनं ज्ञातं भवति येन माहेश्वरसूत्रोक्तवर्णसमाम्नायस्य स्वरूपकल्पना अस्माभिः सर्वैरेव कर्तव्या । साम्प्रतिके पठनपाठनादिसम्प्रदाये तथा सम्यग्ग्राध्याप्यते येन बहवो वैयाकरणाः परिनिष्ठिताः भवेयुः यथा खलु आवश्यकम् । सर्वैः विद्वद्भिः अवश्यमस्य वर्णविज्ञानस्य रहस्यमवधेयमित्यर्थमेवायमस्माकं प्रयासः । केनापि विदुषा प्रोक्तम् -

यद्यपि बहुनाधीशे पठ पुत्र तथापि व्याकरणम् ।
स्वजनः श्वजनो माभूत् सकलः छकलः सकृतशकृत् ।।

ऐहलौकिकसुखं प्रददन्तः मातृका रूपी वर्णाः पारलौकिकमानन्दमपि ददति । मोक्षो हि चतुर्धा - सामीप्यसायुज्यसारूप्यसालोक्यरूपाः । तत्र हि सायुज्यमोक्षस्तु सर्वोत्तमः मन्यते । यतो हि धर्मार्थकाममोक्षेषु चतुर्विधपुरुषार्थेषु मोक्षस्यैव प्राधान्यम् । मोक्षस्तु ज्ञानं विना न भवति । प्रोक्तञ्च - ऋते ज्ञानान्न मुक्तिः[३]। किं नाम ज्ञानम् ? शब्दस्य ज्ञानरूपत्वम् । एवञ्च ज्ञानस्यैव परिणामो विवर्तः वा शब्दः । उक्तञ्च -

वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते ।
कैश्चिद्दर्शनभेदोऽत्र प्रवादेष्वनवस्थितः [४]।।

कस्यचिन्मते वायुः शब्दः । कस्यचिन्मते अणुः शब्दः परञ्च वैयाकरणानां मते ज्ञानं शब्दः इत्यामनन्ति । दर्शनभेदात् अत्र बहवः प्रवादाः (वाक्यपदीयकारिकायाः पाठभेदेन योऽर्थः सम्पद्यते तमर्थं स्वारसिक मुपस्थापयामि । यथा कारिकाः -

अथाऽयमान्तरो ज्ञाता सूक्ष्मवागात्मना स्थितः ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ।।
स मनोभावमासाद्य तेजसा पाकमागतः ।
वायुमाविशति प्राणमथासौ समुदीर्यते ।।

अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः ।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते [५]।।

अत्रायं तत्त्वार्थः इदमानन्तरं यज्ज्ञानं सूक्ष्मवाग्रूपेण (परावाणीरुपेण) स्थितं तदेव स्वस्य स्वरूपस्य व्यक्तये प्रकाशाय शब्दरूपेण विवर्तये स एव शब्दो मनो भावं प्राप्य तेजसा शरीरव्यापकेणाग्निना परिपक्वः प्राणवायुमाविशति । अथासौ प्राणवायुः सम्यक् उदीर्यते प्रेर्यते (अन्तः करणतत्त्वस्य आश्रयी भूतो वायुरन्तःकरणधर्मेण समाविष्टःशरीरान्तरस्थेन ऊष्मणा सहायेन विवर्तते । आत्मग्रन्थीन् पृथक् विधैः रूपैर्विभज्य प्राणो वर्णान् अभिव्यज्य वायौ लीनो भवति । तथा च वक्त्रा स्वीयज्ञानस्य प्रकाशनाय ज्योतिरूपं यज्ज्ञानं तस्य अभिव्यक्तये पश्यन्तीदशायां किञ्चिद् उच्छूनं शब्दार्थोभयात्मकं प्राणवायुमाश्रयति तदा मध्यमावस्थायां स वायुरुपरिगमनाय प्रेर्यते इति । तदेव ज्ञानं वैखरीरूपं धत्ते । तथा च कत्व खत्व गत्वादिना तस्य अभिव्यक्तिर्भवति । वाक्यपदीयटीकायामपि श्रीमद्भागवतस्य श्लोकं दर्शयन् लिखति -

स एव जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ।
मनोमय सूक्ष्ममुपेत्य रूपं मात्रास्वरो वर्ण इति स्थविष्टः [६]।।

विवर्तः द्विविधः मूर्तिविवर्तः क्रियाविवर्तश्च । देशभेदावग्रहरूपेण अवस्थानं मूर्तिविवर्तः । उत्पादविनाशादि क्रियोपहितरूपावस्थानं क्रियाविमर्शः । स एषो अपरोक्षो जीवयतीति जीवः परमेश्वरः चित् स्वरूपः विवरेषु आधारादि चक्रेषु पराख्येन नादेन सह गुहाम् आधारचक्रं प्रविष्टः सन् मनोमयं सूक्ष्मरूपं पश्यर्न्तीम् , ततः मणिपूरकचक्रे, विशुद्धिचक्रे चोपेत्य वैखरीरूपोऽति स्थूलो नाना वेदशाखात्मको भवतीत्यर्थः । ऋक्संहितायामपि उक्तम् -

चत्वारि वाक् परिमिता पदानि ।
तानि विदुर्ब्राह्मण ये मनीषिणः ।।
गुहात्रीणि निहिता नेङ्गयन्ति ।
तुरीयं वाचो मनुष्या वदन्ति ।।

अयमेवार्थः - तथाहि चत्वारि पद जातानि नामाख्यातोसर्गनिपाताश्च । तानि च परा पश्यन्ती मध्यमा वैखरी भेदेन प्रत्येकं चतुर्विधानि सन्ति ।

इमानि ये मनीषिणो वशीकृतमनस्का: परेषां मनसि स्थितानामपि विषयाणां वेत्तारस्ते विदुः जानन्ति । (मध्यमा पर्यन्तानि त्रीणि गुहायाम् अज्ञाने निहितानि (अन्येषां कृते तु न मनीषिणां कृते) वाचश्चतुर्थं वैखरी रूपं मनुष्या: मननशीला: साधारणजना: वदन्ति । न तु वाचस्तत्त्वं जानन्ति । अत एव विदुः क्रियापदमुपात्तम् । वाक्यपदीये तृतीयकाण्डे प्रथमश्लोके -

द्विधा कैश्चिद् पदं भिन्नं चतुर्धा पञ्चधाऽपि वा ७।

इत्यादिना पक्षत्रयं प्रतिपादितम् । तत्रापि भगवत: पाणिने: द्विधा इत्येव पक्षोऽभिमत: । अत्रायं ध्यातव्य: एतादृशस्य पुरुषधौरेयस्य वाक्यमवश्यमेव विचारणीयम् । तथाहि भगवान् पतञ्जलिरागमरहस्यं सर्वथा संरक्षति । स ह्यपाणिक इव नहि पामरापामरसाधारण्येन विषयानुपक्षिपति । अत एव वाक्यपदीये भर्तृहरिणा उक्तम् -

य: पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागम: ।
काले स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थित: ८।।

अनया कारिकया प्रतिष्ठामुपगतै: पूर्वैरागमै: बहुविधैर्विना स्वयमेव तत्तदिति अयथायथं उत्प्रेक्षमाणानां विकल्पयतां शास्त्रोपज्ञमेधाविरहिणां पण्डितम्मन्यमानानां अभिमानग्रहाघ्रातानां तेषां भगवतीविद्याविशुद्धप्रज्ञा प्रतिभालक्षणा न प्रसीदति अत्यर्थम् किन्तु वृद्धोपसेवाशालिनागमजुषां विगलित अभिमानानामेव एषां भगवती प्रज्ञा प्रसादमुपयाति । उक्तञ्च -

तत्तदुत्प्रेक्षमाणानां पुराणैरागमैर्विना ।
अनुपासितवृद्धानां विद्या नातिप्रसीदति ९।।

यद्यपि तासां सर्वासां वाचां वास्तविकं स्थानं तु मस्तिकमेवास्ति । तत एवाविर्भूय वाग् अधस्तनेषु स्थानेषु वामभागतो दक्षिणावर्तं कुर्वती समायाति । अर्थात् सहस्रारात् उद्भवन्ती वाग् पिङ्गलया मूलाधारमागत्य तत: इडया मणिपूरमनाहतं विशुद्धं चागत्य यथा स्थानं प्राप्य तन्नामानि भर्जन्ते । पुनश्च सहस्रारे इहयैव विलाप्यते । यद्यपि महाभाष्ये वार्तिकं वा । परादीनां तिसृणां वाचां क्वापि चर्चा नास्ति । तथापि तत्रत्यागमांशो रहस्यत्वात् अतिगूढरूपेणाच्छादितोऽस्ति । चत्वारि प्रतीकमादाय तादृशगूढार्थं गर्भं मूलमस्ति

तदागमांशस्य । पृषोदरादीनि यथोपदिष्टम् इति सूत्रे भाष्ये वैयाकरणलक्षणप्रसङ्गे उक्तम् के पुनः शिष्टाः? वैयाकरणाः , कुत एतत् ? शास्त्रपूर्विका शिष्टिर्वैयाकरणाश्च शास्त्रज्ञाः । यदि तर्हि शास्त्रपूर्विकाशिष्टिः शिष्टिपूर्वकं च शास्त्रम् । तत् अन्योन्याश्रयं भवति । अन्योन्याश्रयाणि च कार्याणि शास्त्रे न प्रथन्ते इति भाष्यम् । एवं तर्हि निवासतः आचारतश्च शिष्टाः भवन्ति । आसमुद्राद् दक्षिणेन हिमवन्तमुत्तरेण आर्यावर्त्तः । एतस्मिन् आर्या निवासे ये ब्राह्मणाः कुम्भीधान्याः आलोलुपाः अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्यचिद् विद्यायाः पारगाः तत्र भवन्तः शिष्टाः । यदि तर्हि शिष्टाः शब्देषु प्रमाणं किमष्टाध्याय्याः क्रियते ? शिष्टज्ञानार्थाऽष्टाध्यायी । अष्टाध्यायीमधीयानोऽन्यम नधीयानं येऽत्र विहिताः शब्दाः तान् प्रयुञ्जानं पश्यति स पश्यति । नूनमस्य दैवानुग्रहः स्वभावो वा योऽयं न चाष्टाध्यायीमधीते ये चात्र विहिताः शब्दाः तांश्च प्रयुङ्क्ते अयं नूनमन्यानपि जानाति । एवमेवाशिष्टज्ञानार्थाऽष्टाध्यायी । परमहमत्र स्वप्नोपलब्धसंविदमिव यत् किञ्चिन वच्मि तदीयं सारमाकृष्य सन्तुष्टस्वान्ताः सम्पद्यन्तां संयतमनस्काः साधवः । तमसोऽत्यन्तं संसृष्टमपि ज्योतिर्ज्योतिरूत्तमं वा । नाल्पेन प्रयासेन प्राप्तुं युज्यते । तदर्थं प्रणीतेषु बहुषु शास्त्रव्रतेषु एकमेव मन्त्रमवलम्ब्य उपस्थाप्यते सारः उद्वयमित्यादिमन्त्रो बहुधा मया प्रसङ्गवशेन गृह्यते । अत्रापि तन्मन्त्रेणैव मार्गः प्रकाशितो भविष्यति ।

यदा हि साधवः शुचौ देशे स्थिरमासनं प्रतिष्ठाप्य नासाग्रे , भ्रूमध्ये सहस्रारे वा निहिताभ्यन्तरदृष्टिरितस्ततो बभ्रम्यमाणं मनस्तत्स्वरूपे परमाणौ सुषिसे संनिधातुं प्रयस्यति । अशेषलोकशरण्यम् अनन्तकोटिब्रह्माण्डनायकं दीनवत्सलं सौशील्यवात्सल्यौदार्यादि असंख्येयगुणगणाकरं श्रीकरं नारायणम् ।

अनुकूलस्य संकल्पः प्रतिकूलस्य वर्जनम् ।
रक्षिश्यतीति विश्वासो गोप्तृत्ववरणं यथा ॥
आत्मनिक्षेपकार्पण्ये षड्विधाशरणागतिः ।

इति पद्धत्या षड् विधाभिः प्रपत्तिभिः शरणमुपयाति च । तदा -

योगेन योगो ज्ञातव्यो योगो योगात् प्रवर्तते ।
यो नियुक्तो हि योगेन स योगो रमते चिरम् [१०]॥

आदिवर्गः

वर्णानामादित्वात् आदिवर्गः स्वरवर्गः । तत्र भवमादिवर्ग्यम् , अपूर्वकम् । अकारः पूर्वोऽस्य वर्णपञ्चकस्य इति अपूर्वकम् । वर्णपञ्चकम् । अकारेकारोकारऋकारलृकाररूपं तदेव वर्णपञ्चकम् । यद्यपि वर्णसंघट्टशरीरेयं मातृकाबीजयोन्यात्मना विभक्ताः । सप्तवर्गात्मिका, अष्टवर्गात्मिका, नववर्गात्मिका च तेषु तेषु शास्त्रेषु भण्यते । तत्र प्रपञ्चसारे अ क च ट त प याद्यैः सप्तभिर्वर्गैः इति प्रथमे मङ्गलाचरणश्लोके सप्तवर्गात्मिका मातृका पठ्यते । शैवेषु सिद्धान्तागमेषु नित्याषोडषिकार्णवे चाष्टवर्गात्मिका सा प्रतिपाद्यते । मालिनिविजयग्रन्थे च नववर्गात्मिका शिवानन्दविद्यानन्दामृतानन्दादिभिः विद्वद्भिः स्व स्व ग्रन्थेषु यथायथम् अष्टवर्गात्मिका नववर्गात्मिकापि च मातृका व्याख्यायते । मातृकाणां वर्गसंख्या विषये यथामतभेदो दृश्यते तन्त्राणाम् । तथैव वर्णसंख्याविषयेऽपि सैव स्थितिः । सप्तचत्वारिंशत् वर्णरूपा वैखरीवाक् प्रत्यपाद्यत संकेतपद्धत्याम् । शैवेषु तन्त्रेषु पञ्चादशक्षराः सा प्रोच्यते । शाक्तेषु तु तन्त्रेषु प्राद्यान्येनैकपञ्चाशदक्षराः । संकेतपद्धत्यां सप्तषष्ठिः वर्णरूपिणी प्रोक्ताः । अर्थरत्नावल्यां तथैव भणितम् । शैवागममतेऽपि पञ्चाशदक्षरैव मातृका व्याख्याता । सेयं पञ्चाशद् वर्णात्मिका मातृका अष्टवर्गात्मिका भवति । ते चाष्टवर्गा अ क च ट त प यशादयः । अकारादयः षोडशस्वराः प्रथमवर्गः । कादयः पञ्चद्वितीयवर्गः । चादयः पञ्चतृतीयवर्गः । टादयः पञ्चचतुर्थवर्गः । तादयः पञ्चपञ्चमवर्गः । पादयः पञ्चषष्ठवर्गः । यादयश्चत्वारः सप्तमवर्गशादयश्चत्वारः अष्टमवर्गः एवमष्टवर्गात्मिका भगवतीमातृका त्रिपुरसुन्दरीमालिनीविजये च नववर्गात्मिकामात्रिका स्वीकृता । एकपञ्चाशदक्षरा मातृका इति वादिनां मते बोधकचक्रम् ।

प्रथमो वर्गः अ आ इ ई उ ऊ ऋ ॠ ऌ लृ ए ऐ ओ औ अं अः

द्वितीयो वर्गः -क ख ग घ ङ

तृतीयो वर्गः - च छ ज झ ञ

चतुर्थो वर्गः - ट ठ ड ढ ण

पञ्चमो वर्गः - त थ द ध न

षष्ठो वर्गः - प फ ब भ म

सप्तमो वर्गः- य र ल व

अष्टमो वर्गः- श ष स ह

नवमो वर्गः - ल क्ष

लक्षौ मिलित्वा एकपञ्चाशद् वर्णाः भवन्ति । अयं विलक्षणः क्रमः (श्लिष्टं पुरः स्फुरति स द्वयकोटि लक्षरूपम् । मातृकाचक्रविवेकग्रन्थे उक्तम् । १६+२५+४+४+२=५१

एतादृश्याः मातृकायाः अक्षराणां मध्ये एकाक्षरमात्रेऽपि संसिद्धे सम्यक् सिद्धिं प्राप्तः सन् रवि तार्क्ष्य इन्दु कन्दर्पशङ्करानलविष्णुभिः साधकः स्पर्धां विधत्ते । तथा च तेजस्विता निर्विषीकरणाह्लादसौभाग्याप्तधृष्यत्व औज्ज्वल्यपालकत्वाख्य वान्तरफलं वर्णक्रमोपासकस्य सम्भवतीति तात्पर्यम्। एवञ्च यस्याः पूर्णाहन्तायाः पराशक्तेः कलाभूतानि यान्यक्षराणि तान्येव विश्वसूचकतया तेषु प्रकर्षेण तादात्म्येन एतज्जगत् त्रयं ब्रह्माण्डादिकटाहन्तं समुल्लसति । किञ्च मूलाधारादारभ्य ब्रह्मरन्ध्रपर्यन्तमित्यर्थः । इयमेवमातृकापञ्चाशत् रूद्राणां श्रीकण्ठादीनामपि जननी । उक्तञ्च -

यदक्षरमहासूत्रप्रोक्तमेतज्जगत्त्रयम् ।

ब्रह्मादिकाटहान्तं तां वन्दे सिद्धमात्रिकाम् [११]॥

प्रायशोऽघृत्वे तान्त्रिकाः अष्टवर्गात्मिकैव मातृका आमानन्ति । यथा -

वर्गानुक्रयोगेन यस्यां मात्राष्टकं स्थितम् ।

वन्दे तामष्टवर्गोत्थ्य महासिद्ध्यष्टकेश्वरीम् [१२]॥

पाणिनीयशिक्षादृष्ट्या स्वराः अकारादयः एकविंशतिः भवन्ति । कादयो मावसानाः स्पर्शाः पञ्चविंशतिः । यकारादयो हकारान्ताः अन्तस्थाः ऊष्माणश्चेति अष्टौ भवन्ति । कुँ खुँ गुँ घुँ इति चत्वारो यमाः सन्ति । अनुस्वारः, विसर्गः,जिह्वामूलीयः, उपध्मानीयाः एते चत्वारः अपि च प्लुतऌकारः एव दुस्पृष्टः इति विज्ञेयः इति कृत्वा त्रिषष्टिः वर्णाः ज्ञेयाः । यदि च दुस्पृष्टश्चेति विज्ञेयः ऽकार वध एव च इति ऽकार संकलनेन चतुष्षष्टिर्वा वर्णाः वेदितव्याः । यथा - अ आ आ३, इ ई ई३, उ ऊ ऊ३, ऋ ॠ ॠ३,

ऌ, ए ए३, ऐ ऐ३, ओ औ३, औ औ३, इति एकविंशतिः स्वराः । क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म इति पञ्चविंशतिः स्पर्शाः । य र ल व इति चतस्रोऽन्तस्थाः । श ष स ह इति चत्वारः ऊष्माणः इति यादयोऽष्टौ वर्णाः । कुँ खुँ गुँ घुँ इति वर्णसमाम्नाय लेखे संकेतिताः वर्गप्रथमद्वितीयतृतीयचतुर्थसधर्मत्वेन संग्राह्याः, नासिकास्थानवर्णविशेष रूपाश्चत्वारो यमाः । अनुस्वारविसर्ग जिह्वामूलीयो पध्मानीयः दुःस्पृष्टतां प्राप्तः प्लुतऌकारश्चेति त्रिषष्टिवर्णाः । पक्षान्तरे दुस्पृष्टऽकारगणने चतुष्षष्टिर्वर्णाः पञ्जिकाकारेण पद्यैः प्रतिपादिताः । उक्तञ्च - त्रिषष्टिचतुष्षष्टिर्वा वर्णाः शम्भुमते मताः ।

प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा ॥
स्वराविंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।
यादयश्च स्मृताः ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥
अनुस्वारो विसर्गश्च =क =पौ चापि पराश्रितौ ।
दुस्पृष्टश्चेति विज्ञेयः ऌकारः प्लुत एव च ॥[१३]

मातृकास्वरूपविमर्शावसरे नित्याषोडषिकार्णवे द्वादशश्लोक्यां प्रथमेष्वेकादशश्लोकेषु मातृकैव स्तूयते । परावागात्मना अनादृतभट्टारकपरम शिवस्वरूपाषट्त्रिंशत् तत्त्वप्रसरणहेतुभूता संविदत्र ऋजुविमर्शिन्यां मातृकापदेनोक्ता । शब्दराशिर्मातृकामालिनीकालिका इत्यादिभिः पदैः तत्र तत्र शास्त्रेषु वर्णिता, सर्ववर्णोदयकारणभूता वर्णसंघट्टशरीराणां सप्तकोटिमहामन्त्राणां जननी अत एव मन्त्रसद्भावे -

सर्वे वर्णात्मिकामन्त्रास्ते च शक्त्यात्मकाः प्रिये ।
शक्तिस्तु मातृका ज्ञेया सा च ज्ञेया शिवात्मिका ॥[१४]

वाक्चतुष्टयात्मिका मातृका -

तन्त्रदृष्ट्या चतुर्विधा हि वाक् हत, अनाहत, अनाहतहत, अनाहतहतोत्तीर्णरूपम् ।

१. अनाहतहतोत्तीर्णा परा वाक् ।

२.अनाहतहता पश्यन्ती वाक् भवति ।

३. अनाहतमध्यमा वाक् ।

४.हता च वैखरी वाक् भवति ।

१.अनाहतहतोत्तीर्णा (परावाग्) महानिरावरणधाम समुल्ल सितोऽपिकल्पईषच्चलनात्मकमहास्पन्दप्रथमकोटिरूप: स्वर: संकोचविकास विरहात् परमविकाशरूपोऽस्पर्शधर्मानुच्चार्यमहामन्त्रप्रथात्मक: ।

२. अनाहतहत (पश्यन्ती) उभयाश्रितोन्मिषितोऽहतो विश्रान्तशष्कुला श्रवण गोचरोद्भिन्नप्रथ: श्रवणयुग्ममध्यवर्त्याकाशात् तत्त्वप्रतिबिम्बतत्त्वादे: हतोऽपि हतोऽनाहतहत: ।

३.अनाहत (मध्यमा अस्वरमूलोल्लसितपरनादविस्फारस्तन्त्रीमध्यमा स्वरसंकेतआकण्ठकूपान्तादुपचारत: कृत: प्रतिष्ठ: ।

४.हतश्च वैखरी हतकण्ठताल्वादिस्थानकरणसंनिवेशैर्हतोऽकारादि हकारपर्यन्तनानापदार्थविभासक: ।

कैश्चिद् विद्वभि: वैखरी शब्दं व्युत्पादयन् वै निश्चयेन स्पष्टतरत्वात् खं कर्णविवरवर्ति नभो रूपश्रोत्रेन्द्रियं राति गच्छतीति वैखरी । पदनिर्वचननं भवति । उक्तश्च -

स्थानकरणप्रयत्नैरभिहत पवनप्रवर्तितार्णत्वात् ।
हतनामधेयमस्या विहितं वर्णोदयक्रमाभिज्ञै: [१५]।।

सा हि परावाग् स्वातन्त्र्योल्लासस्पन्दादेकाऽपि अनेकधा वितता भवति । तेन च वर्णाम्बिकाया: पश्यन्ती रुपमभिव्यज्यते । तच्चैकादशधाविभक्तं भवति तद्यथा - अकारस्य शिवरूपस्य वामा, ज्येष्ठा, रौद्री, अम्बिका, कला चतुष्टयं तत् समष्टिरूपमकार: इति पञ्चकम् । शक्तिरूपस्य हकारस्य इच्छा ज्ञानक्रियाशान्तिरूपकलाचतुष्टयं तत् समाष्टिरूपेण हकारेण सह पञ्चकमिति । द्वाभ्यां शिवशक्तिवर्णाभ्याम् आद्यन्ताभ्यां दशकं जातम् ।

तयो: परस्परं बीजाङ्कुरन्यायेन समरसभावादेकमित्येकादशधा पश्यन्ती योगिनी हृदयदीपिकामुक्तम् ।

अकारस्य शिरो रौद्री वक्त्रं वामा प्रकीर्तिता ।
अम्बिका बाहुरित्युक्ता ज्येष्ठा चैवायुधं स्मृता: [१६]।।
पश्यति सर्वं स्वात्मनि करणानां सरणिमपि यदुत्तीर्णा ।

तेनेयं पश्यन्ती इत्युत्तीर्णा इत्यप्युदीर्यते माता ।।

पश्यन्ती तेऽनाहताख्यनादनवकमयी मध्यमा वाग् भवति । नव नादात्मिकया मध्यमया नववर्गात्मिकया वैखरी वागभिव्यज्यते । अस्यां वैखर्यां वाचि सप्तचत्वारिंशत संख्याकानि अकारादिसकारान्तानि अक्षराणि भवन्तीति सङ्केतपद्धत्यामुक्तम् । अत्र क्षकार: ककार: षकारसंयोगजत्वान्न पृथग् गण्यते । ळकारस्यापि लकारान्त: पातितत्वान्न पृथक् गणनम् । एवं च सप्तचत्वारिंशत् वर्णात्मिकमातृकापीठं संपद्यते । पञ्चदश च विन्द्वन्ता: स्वरा: मता: ।। एवं वाग्चतुष्टयात्मिका मातृकानादरूपेणावतिष्ठते । पश्यन्ती मध्यमा वैखरीरूपतया त्रैविध्यम् प्रत्येकं च स्थूलसूक्ष्मपरत्वेन त्रैविध्येऽपि नवधात्वम् । एषां नवानामपि भितिभूत: । परावागात्मना दशम: तेषां परागात्मा राविणी तन्त्रालोके यथा

नदते दशधा सा तु दिव्यानन्दप्रदायिका ।
चिनोति प्रथम: शब्दात् चिञ्चिनीति द्वितीयक: ।।
चीरवाकी तृतीयस्तु शङ्खशब्दश्चतुर्थक: ।
तन्त्री घोष: पञ्चमश्च षष्ठो वंशरवस्तथा ।।
सप्तम: कांस्य तालस्तु मेच शब्दरवस्था ।
नवमो दावनिर्घोषो दशमो दुन्दुभिस्स्वन: ।।
नवशब्दान् परित्यज्य दशमो मोक्षदायक: ।
तन्त्रालोकविवेकधृतवचने रवोऽयमेवं स्तुत: -
अनाहतहतोत्तीर्णो महाविषचिद्गति: ।
वीरहृदघट्टनोद्युक्तो रावो देव्या विजृम्भते ।।१७

योगिनीहृदये भणितम् - परावागम्बिकारूपा पश्यन्तीवाग् वामारूपा इच्छाशक्ति: मध्यमावाक् ज्येष्ठारूपा ज्ञानशक्ति: वैखरीवाग् रौद्रीरूपाक्रिया शक्तिर्वर्णिता । यथा

अकारस्य शिरो रौद्री वक्त्रं वामा प्रकीर्तिता: ।
अम्बिका वाहुरित्युक्ता ज्येष्ठा चैवायुधं स्मृता: १८।।

शक्तिःशक्तिमाँश्च

वृत्तिस्त्रिधा शक्तिर्लक्षणाव्यञ्जनाभेदात् । तत्र तावत् शक्तेः किं स्वरूमिति विषये नव्यवैयाकरणाः तान्त्रिकाश्च मतैक्यं दृश्यते ।

शक्तिरपि त्रिविधाः भवन्ति सहजाशक्तिः आधेयाशक्तिः शब्दशक्तिश्च ।

१. जातमात्रस्य पक्षिणो आकाशे उत्पतनस्य शिक्षायाः अभावेऽपि तेषां स्वाभाविकी गतिः सहजाशक्तिरिति ।

२.पाषाणादिना निर्मितायाः प्रतिमायाः प्राणप्रतिष्ठाविधिना स्थापिता विष्णवादिदेवशक्तिः आधेयशक्तिः ।

३.घटशब्देन घटत्वावच्छिन्नस्य घटस्य विशेष्यविशेष्यणवाच्यवाचक भावशक्तिःशब्दशक्तिश्चास्ति ।

तत्र तिसृषु तासु शक्तिषु शब्दशक्तिरर्थबोधे ज्ञातैवोपयुज्यते न तु स्वरूपसती । तस्माच्च शब्दशक्तेः स्वरूपं कीदृशमिति जिज्ञासायां नैयायिकाः अस्माच्छब्दादयमर्थोबोधव्यः इतीश्वरेच्छाशक्तिः, इदं पदं इममर्थं बोधयतु इत्याकारा वा ईश्वरेच्छा शक्तिः स्वीकुर्वन्ति ।

प्राचीनवैयाकरणैः भट्टोजिदीक्षितमहोदयैः बोधजनकतारूपा शक्तिः अङ्गी क्रियते । उक्तञ्च वाक्यपदीये -

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।
अनादिरर्थैःशब्दानां सम्बन्धो योग्यता तथा [१९]॥

मीमांसकानाम्मते अतिप्राचीनवैयाकरणानां मते पदपदार्थयोर्बोध्य बोधकभावनियामिकाशक्तिरिति स्वीकुर्वन्ति । तेषां मतेऽत्र उपकार्यउपकारकभावो सम्बन्धोस्ति । उक्तञ्च वाक्यपदीये

उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते ।
शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः ॥

अतः शब्दार्थयोः इतरेतराध्यासः संगच्छते । एतेन व्याख्यानेन इदं सिध्यति यत् नागोजिभट्टाः मीमांसकप्राक्तन् वैयाकरणानाम्मतमुपस्थाप्य शब्दार्थयोस्तादात्म्यं स्वीकुर्वन्ति । तच्चानादिः । एतेन तेन अध्यासप्रक्रियाऽपि स्वीकृता । अतः शब्दार्थयोस्तादात्म्यं अनादित्वञ्च अनादिकालतः एव सिद्धं

भवति ।

तन्त्रागमशास्त्रेऽपि शब्दार्थयोस्तादाम्यमभेदसम्बन्धेनेति व्याहरन्ति । अत्र मते वाच्यवाचकभावस्थितिस्तु वाचकः, वाचकः शब्दः वाग्रूपः विमर्शाख्यशिवपरकः । वाच्योऽर्थश्च प्रकाशरूपः शक्तिपरकः तयोः परस्परमभेदः । अत एव शब्दार्थयोः परस्परमभेदान्वयः । संसारसृष्टिः शिवशक्तिसामरस्यादेव जायते । तच्च सामरस्यमभेदेन अभेदश्च शब्दार्थरूपयोः शिवशक्त्योरपार्थक्येन स्थितः । अत एव रघुवंशमहाकाव्ये मङ्गलश्लोकेन कालिदासः स्मरति ।

वागर्थाविवसम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वती परमेश्वरौ [२०]।।

तत्त्वार्थः परावागात्मा नाहतभट्टारकपरशिवस्वरूपा षट्त्रिंशत्तत्त्व प्रसरणहेतु भूता संविदेव मातृका पदेनोच्यते तन्त्रशास्त्रे नित्याशोऽशिकार्णवग्रन्थे । सा च मातृका वर्णसम्मेलनेन मन्त्रशब्दवाग्रूपधत्ते ।

सर्ववर्णोदयकारणभूता, वर्णसंघट्टशरीराणां सप्तकोटिमहामन्त्राणां जननी । उक्तञ्च -

सर्वे वर्णात्मका मन्त्रास्ते च शक्तायत्मकाः प्रिये ।
शक्तिस्तु मातृकाज्ञेया सा च ज्ञेया शिवात्मिका ।।
या सा तु मातृका देवी परतेजः समन्विता ।
तया व्याप्तमिदं विश्वं स ब्रह्मभुवनान्तकम् ।।[२१]

अतः शिवशक्त्यपरपर्यायस्य वाच्यवाचकस्य शब्दार्थतादात्म्योपपत्तिः वैयाकरणनागेशस्य तन्त्रशास्त्रकाराणां मतैक्यं साधितम् । उक्तञ्च -

विना स्वरैस्तु नान्येषां जायते व्यक्तिरञ्जसा ।
शिवशक्तिमयान्प्राहुस्तस्माद् वर्णान् मनीषिणः ।।

इत्येवं रीत्या स्वरव्यञ्जनवर्णात्मिकायाः शब्दराशेः शिवशक्तयात्मत्वमुपपद्यते ।

शिवशक्तिमतोर्भेदः-

तत्त्वसंग्रहानुसारमति संक्षेपेण शक्तिशक्तिमतोः स्वरूपं प्रदर्श्यते ।

उक्तञ्च -

सर्वज्ञानक्रियारूपा शक्तिरेका हि शूलिनः ।
इच्छाज्ञानक्रियाद्या यत् प्रभवाः कार्ययोनयः [२२]॥

इति वचनानुसारमेकैवसती इच्छा ज्ञानक्रियादिरूपेण बहुधा भिद्यते ।

एक एव शिवस्तद्वत् शक्तिरप्यविकारिणी ।
लयभोगाधिकारेषु तौ हि चिन्मात्र रूपिणौ [२३]॥

इत्यनेन च एकस्यैव शिवस्य तस्याः शक्तेश्च औपचारिकाः भेदाः उच्यन्ते । एते भेदाः तत्त्वसंग्रहे वर्णिताः सन्ति यथा -

एकैव खलु चिच्छक्तिः शिवस्य समवायिनी ।
त्रिविधोपाधिसंभेदाल्लयभोगाधिकारिणी ॥
तयैतयाभिसम्बन्धादेको देवस्त्रिधा भवेत् ।
शिवः सदाशिवोऽधीशो लयभोगाधिकारवान् ॥[२४]

शक्तेर्लक्षणं तथा महत्त्वं बहुशः तत्र वर्णितं वर्तते । यथा -

कामानपि बहूनेकः कल्पवृक्षः प्रयच्छति ।
चिन्तामणिश्च विविधानचिन्त्यमहिमा यथा ॥
तथाऽनाहितसंस्कारविशेषकस्वरुपिणी ।
चिदचिन्त्या विभो शक्तिरशेषार्थक्रिया विधौ ॥[२५]

इत्यादिना च शक्तेर्माहात्म्यातिशयस्तत्रप्रदर्शितः । अत्रैव श्रीकण्ठेन चिदद्वयवादोऽपि विस्तरेण समालोच्यते ।

शिवशक्त्योरभेदस्तु नात्र स्वीक्रियते । श्रीकण्ठेन हि स्वकीयग्रन्थे उक्तम् तयोर्भेदोऽधुनोच्येत'' इत्यादिना शक्तिशक्तिमतोर्भेदो युक्तपुरस्सरं साधितः । तथा हि

परानपेक्षं रूपं यद् विज्ञानं शिवसंज्ञितम् ।
तस्य शक्तिपरापेक्षं रूपमाहुर्विपश्चितः ॥
आकारद्वयसंवित्तिरशेषस्यापि वस्तुनः ।
परापेक्षानपेक्षाभ्यामस्ति शक्तिः शिवाश्रया [२६]॥

तेन शक्तिः परापेक्षं रूपमीशस्य युज्यते । परापेक्षानपेक्षाभ्यां

शिवशक्त्योर्भेदः तत्र साध्यते ।

केचन विद्वांसः न तु शक्तिः परापेक्षा वस्तुनोऽस्तीति इत्यादिना स च शक्ति शक्तिमतोरभेदवादिमतं तिलसः खण्डयति ।

अनन्यानपि विभिन्नातः शम्भो सा समवायिनी इत्यादिना च प्रकरणमेतदुपसंहरति । अत्र च -

द्वे शक्ती समवायिन्यौ शिवे ज्ञानक्रियात्मके ।
आद्या तु संवित् विज्ञानं क्रियाकुण्डलिनी परा ।।
ज्ञानशक्त्या विजानाति क्रियया कुरुते जगत् ।
क्रिया हि फलदा पुंसां न ज्ञानं स्यात् फलप्रदम् ।।
ताभ्यां न विरहस्तस्य ते च न स्तः शिवं विना ।

इत्येते श्लोकाः रत्नत्रय्यां विशेषतोऽवधेयाः विद्वद्भिः ।

पादटिप्पणी

१.शारदातिलकम्
२. शारदातिलकम्
३.बृहदारण्यकोपनिषदि
४.वाक्यपदीयम् ब्राह्मकाण्डम्
५.वाक्यपदीयम्
६.श्रीमद्भागवतमहापुराणम्
७.वाक्यपदीयम् तृतीयकाण्डम्
८.वाक्यपदीयम् तृतीयकाण्डम्
९.वा.प.२/४८७
१०.वायुपुराणम्
११.नित्याषोडशिकार्णवे
१२. नित्याषोडशिकार्णवे
१३.पाणिनीयशिक्षा
१४. मन्त्रसद्भावे
१५.सौभाग्यसुधोदयग्रन्थे

१६.सौभाग्यसुधोदयेऽपि
१७.तन्त्रालोक:
१८. योगिनीहृदयम्
१९.वाक्यपदीयम् ३.३.२९
२०. रघुवंशम् १.१
२१. तन्त्रसद्भावग्रन्थे
२२. तत्त्वसंग्रह:
२३. तत्त्वसंग्रह:
२४. तत्त्वसंग्रह:
२५. तत्त्वसंग्रह:
२६. श्रीकण्ठ:

वर्णानां दार्शनिकदृष्ट्या विवेचनम्

स्वरप्रवहणशीला प्रकृतिरियं यत्सर्वोऽपि त्रिलोकीचेतनवर्ग आदावेवमा-कीटश्चाऽनन्दापराभिधं सुखमेव पुरुषार्थमन्वानस्तत्साधनेषु सर्वतो भावेन सततं प्रवर्तमानं आस्ते । यच्चैहिकं स्रग्वनिताऽदिजं सुखं तत् क्षयातिशयञ्च, यथाऽमुष्मिकं वैदिकं सामयागादिजन्यं स्वर्गादिः तदपि समानमेव तदुक्तम् यथेह कर्मचितो लोकः क्षीयते तथाऽमुत्र पुण्यचितोऽपीति । अतो निरतिशय सुखमेव परमपुरुषार्थपदवीमारोहति, तच्चाऽऽरूपगमैकप्रतिपाद्य ज्ञानजन्याऽज्ञान निवृत्तिहेतुकमपि कृत्स्नस्यापि द्वैताद्वैतमिश्ररूपत्रिविधस्यापि संसारजातस्याधिष्ठातृ ब्रह्मात्मकपरमशिवस्य प्राणशक्त्याऽत्मनः श्रीमन्महात्रिपुरसुन्दर्याः सायुज्यमन्तरा नैवाऽस्वादयितुं शक्यते । तदुक्तमभियुक्तैः सम्यग्ज्ञानाधिगमाद्धर्मादीनामकारण प्राप्तौ । तिष्ठति संस्कारवशाच्चक्रभ्रमवद् धृतशरीरः इति । अयमेवाऽर्थो भगवत्पादैः श्रीशङ्कराचार्यैरपि सौन्दर्यलहर्यां "परमानन्दाभिख्यं रसयति रसं त्वदु भजनवान्" इति प्रकटीकृतः । सायुज्यं नाम तदात्मकता , साम्प्रदायिकानां शिवशक्तिसम्पुटान्तर्भावात्मकतेति व्यपदिष्टम् । सैवाऽऽत्यन्तिकी मुक्तिरिति तदाप्तये श्रीदेव्याः स्वरूपपरिज्ञानमतीवापेक्षितम् । त्रिपुरातापिन्युपनिषत् कौलोपनिषदादीनां तन्त्रागमानां वेदशिरोभागापरापिधानामैदम्पर्येणैव तत्तदुपासना निरूपणे तात्पर्यम् । वामकेश्वरादितन्त्रग्रन्थेष्वप्रतिपादितदिशोपासनाद्यायासनिरपेक्षं श्रीत्रिपुरेश्वर्याः स्वरूपविवेकार्थे श्रीस्वतन्त्रानन्दार्थः सार्थकाभिधमिमं मातृकाचक्रं विवेकं जग्रन्थ ।

टीकाकृता श्रीसदानन्दमुनिना प्रथमखण्डान्ते इति इति श्रीमातृका चक्रविवेके इत्यस्य व्याख्याऽवसरे मातृकाशब्दस्य तन्त्रेण द्विरुक्तिरवगन्तव्या । तेन मातृका च मातृकाचक्रञ्चेति लभ्यते । तयोर्विवेकोऽत्रेति विग्रहः । मातृकामन्त्रः, मातृकायाश्चक्रं मातृकाचक्रं, मातृकावर्णसन्निवेशेन सम्भूतं चक्रम् । मातृकैव चक्राकारेण सन्निविष्टेति भावः । इत्यादिरीत्या मातृकाचक्रविवेकपदस्य व्युत्पत्तिप्रदर्शनपूर्वकमर्थो वर्णितः । तथाहि मातृकापदेन वर्णात्मको मूलमन्त्रः मातृकाचक्रपदेन च नवचक्रात्मकं साम्प्रदायिकैः श्रीचक्रमिति संज्ञितं चक्रं गृह्यते । तदुक्तम् - श्रीचक्रमूलमनुसंस्थिति दर्शनेन [१] इति ।

श्रीचक्रे नवत्रिकोणश्लेषविशिष्टं यन्त्रम् । मूलमनुर्मातृका इति च तद्व्याख्यातारः । अत्र प्रथममुद्दिष्टं श्रीचक्रं संक्षेपतो निरूप्यते ।

अस्मिन् ग्रन्थे यन्त्रोद्धारस्यादर्शनेन परमतमप्रतिषिद्धमनुमतं भवति इति रीत्याऽन्यत्रोद्धृतमेव श्रीचक्रं ग्राह्यम् । अतो बहुष्वपि तदुद्धारप्रकारेष्वेतद् ग्रन्थगृहीत रीत्यैवोद्धारप्रकारः प्रदर्श्यते ।

विन्दुत्रिकोणसंयुक्तं वसुकोणसमन्वितम् ।
दशकोणद्वयोपेतं भुवनाऽरससमन्वितम् ।
दलाष्टकमलोपेतं दलषोडशकान्वितम् ।
त्रिवृत्तं भूपुरयुतं सोमसूर्याग्निरूपिणम् ।। इति ।

श्रीमत्भगवत्पादैः श्रीशङ्कराचार्यैश्च -

चतुर्भिः श्रीकण्ठैश्शिवयुवतिभिः पञ्चभिरपि ।
प्रभिन्नाभिः शम्भोर्नवभिरपि मूलप्रकृतिभिः ।।
चुतश्चत्वारिंशत् वसुदलकलाश्चत्रिवलय ।
त्रिरेखाभिः सार्धं तव शरणकोणाः परिणताः ।।[२]

श्लोके उक्तम् । तथा च यामले विन्दुत्रिकोण वसुकोणदशारयुग्म मन्वस्त्रनागदलसंयुतषोडशारम् । वृत्तत्रयं च धरणीसदनत्रयञ्च श्रीचक्रराजमुदितं परदेवतायाः इति ।

मातृकारूपमूलमन्त्रश्चात्र सम्प्रदायमते लकारद्वयक्षराकारसहिताऽकारादि क्षकारान्त एकपञ्चाशद्वर्णात्मकः सौम्यसौरानलात्मभिस्त्रिखण्डः । तदुक्तं रूद्रयामले 'त्रिखण्डमातृका चक्रं सोमसूर्यनिलात्मकमितिश्रीचक्रसाम्यमर्हति । अयमत्रार्थसंग्रहः मेयमितिमातृरूपस्य कृत्स्नस्य भेदाभेदतदुभयरूपस्य शिवशक्तत्यात्मकस्य चिच्चैत्यरूपस्य जगतः प्रतिबिम्बभूतं श्रीमन्महात्रिपुरसुन्दर्याः शरीरं नवचक्रमयं श्रीचक्रम् । तदुक्तं - **शिवशक्तिमयं ज्ञेयं श्रीचक्रं शिवयोर्वपुः** तत्र क्रियात्मकानि शाक्तानि पञ्चचक्राणि भेदात्मकचैत्यसंसारस्य प्रतिकृतयः ।

१. प्रथमं तावत् महाविन्दुचक्राधिष्ठानायाश्चिदचिद्सामरस्यमापन्नाया विमर्शशक्त्या एव बहिर्मुखायाः मूलभूताया महेच्छायाः परावाग्रूपिण्या गगनविश्रान्तेर्विन्दुरूपिण्या रश्मिरूपं मेयादित्रिपुटीरूपस्याऽन्योन्य कार्यकारणभाव

धर्मिधर्मभावमापन्नस्य भेदाऽभेदमिश्ररूपेण त्रिविधस्य जगतः प्रतिकृतिस्वरूपं त्रिकोणचक्रम् । तँदेच्चक्रं त्रिविधस्यापि जगतो मेयादिजाग्रदादीच्छादि त्रिकत्वमनुलोमविलोमक्रमेण परस्परं चिच्चैत्याक्रमणं बहिरन्तर्मुखतया जीवशिवभावञ्च व्यञ्जयति । महाशक्त्यवस्थानं महाविन्दुः । बहिर्मुखाया जीवात्मिकाया विमर्शशक्तेरवस्थानं त्रिकोणम् ।

२. अपरं अष्टारबिन्दं त्रिकोणबिम्बस्य रश्मिचक्रचतुरस्रसम्मेलनेन सम्भूतम् । एकत्र चतुरत्ने मकारात्मजीवबिम्बस्य रश्मिभूते कलाऽविद्यारागादि कञ्चुकतत्वानि . अपरत्र च क्षकारात्मकशिवबिम्बस्य रश्मिभूते शुद्धविद्यादितत्त्व चतुष्टयमिति मिलित्वाऽष्टौ तत्त्वानि अष्टावधिष्ठितानि । एतच्चक्रं प्रमातुः पुरं, स्वप्नपदं , आग्नेयखण्डञ्चोच्यते ।

३. तृतीयमन्तर्दशारम् ।

४. चतुर्थं बहिदशारम् । अनयोः ज्ञानकर्मेन्द्रियाणि दशज्ञेयवेद्या विषयाश्च दशेति मिलित्वा विंशतितत्त्वानामवस्थितिः । दशाद्वयमेकं चक्रं प्रमाणपुरं जाग्रत्पदं सौरखण्डम् । कलादिनियन्त्रकं, षष्ठं मायातत्त्वं च, इत्थं मिलित्वा षट् त्रिंशतत्त्वानि समयसिद्धान्तानि बोध्यानि । तानि चाग्रे स्फुटी भविष्यन्ति ।

५. पञ्चमं चतुर्दशारं प्रमेयपुरं सुषुप्तिपदं सौम्यखण्डम् । अत्र विन्दुविसर्गकलानां मेलनात् षोडशकलाः सकलतत्त्वबीजभूताः प्रतिष्ठिताः सन्ति ।

अस्यैव शक्तिचक्रमण्डलस्यान्तर्गतानि चत्वारि शिवचक्राणि । तत्र प्रथमं चक्रं बहिर्मुखायाश्चितोऽवस्थाबोधकं वैन्दवं त्रिकोणमन्तर्मुखायास्तु विश्रमरूपत्वान्मेयादीनां जाग्रदादीनां च वैचित्र्याभावादेकरूपत्वेनाऽकोणात्मक विन्द्वस्थापरिचायकं वृत्तत्रयात्मकं विन्दुरूपम् । अत एव अविनाभाव सम्बन्धस्तस्माद्विन्दुत्रिकोणयोः इति संगच्छते ।

द्वितीयं चतुरस्रमष्टदलं षोडशदलत्रिकोणविन्दुरूपचक्रश्चतुष्टय घटितैकैककोणं चक्रचतुष्टयाधिष्ठातृदेवतांश्चतुष्टयाऽधिष्ठितं दशाद्वयगतम्।

तृतीयं षोडशदलं तच्च चतुर्दशारचक्रमध्ये चतुर्दशस्सु कोणेषु

आभ्यन्तरभागे विभावितानि चतुर्दशदलानि दलविभावितवृत्ताकारदलं कर्णिकावृत्त पददलञ्चापरिमित्युपपन्नं भवति ।

अत्र षोडशकलात्मको विसर्गरूपश्चन्द्रोऽधिष्ठाता । चतुर्थमष्टदलपद्मचक्रं पूर्वोक्तषोडशदलपद्मस्यैकैकदलव्यवहितदलाष्टके सम्भावितं विन्दुवर्गमयाऽलात्मक मष्टारप्रतिकृतिमतमिति । एतच्चक्रचतुष्टयं विन्द्वादिचतुर्दशारान्ताऽन्तर्गतमेव यथा प्रदर्शितस्थानस्थितं बोध्यम् । लेखने चतुर्दशारतो बाह्यकक्ष्यायां सन्निवेशस्तु तादृशार्थाऽव्युत्पन्नशिष्यव्युत्पादनायैवेति । तदुक्तं -

त्रिकोणमष्टकोणं च दशकोणद्वयं तथा ।
चतुर्दशारं चैतानि शक्तिचक्राणि पञ्च च ॥
विन्दुश्चाष्टदलं पद्मं पद्मं षोडशपत्रकम् ।
चतस्रं चाथ चत्वारि शिवचक्राण्यनुक्रमात् ॥

शिवशक्त्यात्मकत्रिकोणानामूर्द्धाधोमुखतया व्यवस्थाऽपि यन्त्रोद्धारोपकार प्रदर्शनस्याऽभावात् स्पष्टं न दृश्यते । तथापि विसर्गविन्दोरन्यतरव्याप्तिप्राधान्येन भेदाऽभेदान्यतरसाम्राज्यद्वारा व्यवस्थितैवेयं व्यवस्था । तथाहि यदा विसर्गोन्मेषस्तदा कारणीभूतायाश्चित आवरणात्कार्यभेदविलासस्फुरणम् । इयमेव चितोऽन्तश्छन्नता शैवानां चिद्रूपाणां त्रिकोणानामधोमुखतया व्यज्यते । क्रियात्मिकायाः शक्तेर्विसर्गस्य वहिरुल्लासरूपभेदस्फुरणं च तच्चक्राणामूर्ध्व मुखतया व्यज्यते । सृष्टिक्रमेण लेखने क्रियात्मिकतया शक्त्या ज्ञानात्मकस्य विन्दोरावरणमिति शिवचक्राणामधोमुखता सम्पद्यते । संहारक्रमेण लेखने विन्दून्मेषे क्रियासंहारेण तस्या अन्तरन्तः कक्षायां स्वस्वकारणे लयप्रदर्शनाय शक्तिचक्राणामधोमुखता शिवचक्राणामूर्ध्वमुखता च । इदानीं क्रमप्राप्यो मातृकामन्त्रविवेकः. संक्षेपेणोद्ध्रियते ।

'मन्त्रोक्तरस्य जननीं मनसा विशामः' ।

इत्युक्तदिशा ऐहिकाऽमुष्मिकलौकिकस्य मन्त्रसमुदायस्य प्रसवित्री मातृकैव । मन्त्रा एव सकलब्रह्माण्डबीजभूताः ।

अयमाशयः शुद्धनिर्विकल्पायाश्चित ईक्षणात्मिका प्रथमा विमर्शशक्तिः

गगनविश्रान्तिरूपा परावाक् । तदुक्तं -

आत्मनः स्फुरणं पश्येद्यदा सा परमा कला ।
अम्बिका रूपमापन्ना परावाक् समुदीरिता ।।
तत्रान्तरे अनादिनिधनं ब्रह्म शब्दतत्त्वं प्रचक्षते ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।।

इति स्तूयते । श्रूयते च । तस्येदं वाचा तन्त्र्या नामभिर्दामभिः सर्वंसितम् । तथा च विश्रान्तमात्मात्मनि पराहव्यवाचि सुप्तौ इति तस्याः परा वाचः प्रथमो विलासः अन्यत्र प्रदर्शितपरापश्यन्त्यादिक्रमेण अकारःतदुक्तम् । वन्दे तामहमक्षय्यामकाराक्षररूपिणामिति । तत्र विसर्गविन्द्वात्मकं सर्वं विश्वमन्तर्लीनमस्मादेव च निःसृतं सत् वहिर्विलसति । तथा च श्रुतिः अकारो वै सर्वा वाक् इति स्मर्यते च अकाराः सर्ववर्णाग्र्यः प्रकाशः परमाशिवः । इति । स एवाऽकारो ज्ञानक्रियाभेदेनाऽन्तर्मुखवहिर्मुखतया च विन्दुविसर्गरूपतां भवति । ततः ज्ञानेच्छादिरूपाणामीक्षणन्यायेन प्रादुर्भावे इकारोकारऋकारऌकाराणां विलासाः अ इ उ ऋ ऌ इति जीवः । विसर्गविषयकं सुप्त्याद्यवस्थात्रिकसम्भावितं त्रिकोणपञ्चकम् । इ ई ऋ ऌ इति चतुरवयवस्य विन्दुपदस्य पूर्वोक्तावस्थाभिश्चत्वारि त्रिकोणानि । समपदं तु अ इ उ ऋ ऌ ए इत्यादि विसर्गादिविन्द्वन्तवर्णाः षटकरूपाः । इयमेव षडङ्गा शिवजीव विन्दुविसर्ग सामरस्यरूपा महाविन्दुशक्तिः समपदा । शिवजीवपदं तु इच्छाज्ञानक्रियाप्रमाणादि क्रमेण चतुरङ्गं पञ्चाङ्गञ्च । पूर्वत्रपदे विन्दुव्याप्तौ विसर्गोन्मेषाभावेन विसर्गाकारस्याभाव उकारस्यापि ज्ञापकत्वेन अकारे लयादर्शनमिति अ, इ , उ, ऋ, ऌ वर्णचतुष्टयम् । उत्तरत्र तु विसर्गव्याप्तौ विन्दून्मेषस्याऽभावात् विन्द्वकारस्याऽभावः । अकारेकारयोः क्रियात्वेनैकात्म्याऽभावाद् इकारस्यापि दर्शनेन अ, इ ,उ ,ऋ , ऌ इति पञ्चाङ्गेति विषमपदद्वयस्यान्योन्यसंश्लेषात्पूर्वोक्ते वर्णषटके समपदे नवत्रिकोणात्मक श्रीचक्रसम्पत्तिः । ततः प्रमेयप्रमातृरूपद्विविध कक्ष्यासम्मिश्रणेन सन्ध्यक्षराणां प्रमाणरूपता । तत्र एकारो विसर्गप्रमातुरन्तः संसारः (स्वप्नः) ऐकारस्तु बाह्यसंसारः (जाग्रत्) औकारो विन्दुप्रमातुरन्तःसंसारः (तूर्यस्वप्नः औकारस्यतु बाह्यसंसारः तुर्यजाग्रत् ततो विन्दुविसर्गौ च

अजडजडप्रमातारौ ।

प्रमेयप्रमाणप्रमातृरूपेण कक्ष्याशयमित्यत्रापि स्वरखण्डेऽस्ति । तत्र प्रथमे दशह्रस्वदीर्घस्वरा: प्रमेयकक्ष्या: प्रमेयाणां जडत्वसाम्याच्चान्द्रा: । मध्यानि सन्ध्यक्षराणि प्रमाणकक्ष्या, प्रमाणानाञ्च प्रमेयप्रमातृसम्मेलनात्मकत्वेन मध्यस्थता जडाजडत्वेन वह्निरूपता च । विन्दुविसर्गौ प्रमातृकादया:, जडाजडप्रकाशक वसारूप्यात्सरौ । एतेनान्यत्र तन्त्रे परिभावितानां नित्याद्यपराभिधानां चन्द्रकलास्वरूपाणां स्वराणामुपवर्णितं त्रैविध्यमुपगृहीतं भवति ।

एवम्भूतस्य स्वरखण्डस्य पूर्त्यभिव्यञ्जकविवृतप्रयत्नसाम्यात् विश्वबीज भूतकाव्यजनकत्वम् । अ इ ए ऋ ऌ इति वर्णपञ्चमीषत्संकुचितं सत् ईषत्संकोचरूपेषत्स्पृष्टप्रयत्नवन्तोऽन्त:स्था: पञ्चमहाभूतशक्ति सङ्कोचात्मककलादि कञ्चुकानां प्रकृत्यादिवर्गसंकोचाकाशादीनां च बोधका: । तदेव स्वरवर्णपञ्चकं पूर्णतया संकुचितं सत् कु, चु, टु ,तु ,पु इति संकोचद्योतकस्पर्शप्रयत्नवद्वर्ग पञ्चकतां क्रमेणावगाहते । तद्वर्गपञ्चकं च ज्ञानेन्द्रियकर्मेन्द्रियज्ञेयकार्यवेद्य प्रकृत्यादिवर्णद्योतकम् । पुनस्तदेव वर्णपञ्चकं विन्दुव्याप्तवीषत्पूर्णतासूचकेषद् विवृतं चेद् वर्गचतुष्टयसंमिश्रणाऽऽत्मका: शुद्धविद्यादिप्रतिपादका ईषद्विवृतप्रयत्न वन्त: ऊष्माण: ।

संक्षेपत: तदेतत्तत्त्वबीजप्रदर्शककोष्ठकं प्रदर्श्यते ।

बीजानि	तत्त्वानि
१. क:	पृथिवी
२. ख:	आप:
३. ग:	तेज:
४. घ:	वायु:
५. ङ:	आकाश:
६. च:	गन्ध:
७. छ:	रस:
८. ज:	रूपम्
९. झ:	स्पर्श:

१०.ञः	शब्दः
११.टः	पायुः
१२.ठः	उपस्थः
१३.डः	पाणी
१४.ढः	पादौ
१५.णः	वाक्
१६.तः	प्राणः
१७.थः	जिह्वा
१८.दः	चक्षुः
१९.धः	त्वक्
२०.नः	श्रोत्रम्
२१.पः	प्रकृतिः
२२.फः	अहंक्रिया
२३.बः	बुद्धिः
२४.भः	मनः
२५.मः	पुरुषः

२६. यः कला बन्धः वायोः सर्वकर्तृत्वशक्तिसङ्कोचात्मकमात्राकर्तृत्वरूपः, मायातत्त्वाधिष्ठानञ्च ।

२७. रः अविद्या बन्धः । अग्नेः सर्वज्ञताशक्तिरूपविद्यासंकोचादल्पज्ञतारूपः ।

२८. लः रागः बन्धः पृथिव्याः पूर्णत्वशक्तेः संकोचादाशंसारूपः ।

२९. वः कालबन्धः सलिलस्य नित्यत्वशक्तेः संकोचादनित्यतारूपः ।

३०. ळः नियतिबन्धः आकाशस्याव्यापकत्वशक्तेः संकोचोद्देशनैयत्यरूपः ।

३१. शः	शुद्धविद्या
३२. षः	ईश्वरः
३३. सः	सदाशिवः
३४. हः	शिक्तः
३५. क्षः	विन्दुरूपः शिवः

३६. स्वरा: सकलविश्वबीजभूता: कला: । मायातत्त्वम् च । तत्र ईकारे माया बीजं यकार: मायास्थानमिति विवेक: ।

इत्थं षट्त्रिंशततत्त्वानि पशुपदक्रमेणनिर्दिष्टानि । मातृकानामनुलोमपाठेन विसर्गव्याप्ति: प्रदर्श्यते विलोम पाठेन विन्दुव्याप्तिरितिचिच्चैत्ययो: शिव शक्तयात्मनोरन्योन्यभावोपपत्तिप्रदर्शनेन यस्य कस्यापि खण्डस्यापक्रमणेन विलोमानुलोमावर्तनं सम्प्रदायसिद्धान्त: । यदुक्तं अन्योऽन्यलीनवपुषोरिह चैत्यचित्योरिति । लघुस्तुत्यां च एकैकं तव देविबीजमनघं सव्यञ्जनमिति । तथा कूटस्थं यदि वा पृथक्क्रमगतं यद्वास्थितं व्युत्क्रमादिति च । इत्थं मातृकामहामन्त्रमय: सकलोऽयं पार्थिवं प्राकृतमायिकरूपेण अण्डत्रयात्मा भेदाऽभेदरूप: संसार: जाग्रत्स्वप्नसुषुप्तितुर्याऽतितुर्यदशासुश्लिष्ट: श्रीचक्रस्थ स्कन्धत्रये त्रिकोणसंश्लेषप्रतिबिम्बता: जाग्रदादिदशाविशेषवशेनैव भेदाऽभेदरूपतया विलसन्मनोविमर्शमात्रादनतिरिक्तत्वेन नैव परमार्थिभेदसत्ता मवगम्यते । एतत्सर्वं ग्रन्थकृता प्रथमसूत्रद्वयेन परामृष्टम् , तद्यथा -

जाग्रत्सुषिुप्तिकृतदक्षिणवामभागां ।
स्वप्नस्वभावपरिकॢप्तजघन्यभागाम् ।
तुर्यातितुर्यघटितानन‌हृत्प्रदेशां ।
प्राणेश्वरीं परशिवस्य परामृशाम: ॥
स्पर्शस्वरोल्लिखितजागर सुप्त्यवस्था
मन्त:स्थसूचितसुषुप्त्युदितप्रबोधाम् ।
उष्मोक्तजागरदशोदितसुप्त्यवस्थां ।
मन्त्रोत्करस्य जननीं मनसा विशाम: ॥

तत्र तत्र टीकाकृता इति समयसिद्धान्त इति खं० १-इव१५सूत्रव्याख्याने च महतामित्यस्य मन्त्रसमयविदामित्यर्थप्रदर्शनेन अत्र ग्रन्थेसमयाचारसिद्धान्त: प्रतिपादित इति प्रतीयते । अत एव समयाचाराद् घृत भास्कररायकृतललित सहस्त्रनाम भाष्ये १२५ पृष्ठे मातृकावर्णरूपिणी इत्यस्य नाम्नो विवरणाऽवसरे मातृकावर्णानामेव श्रीचक्रात्मकत्वं मातृकाविवेके षष्ठे पटले विस्तरेण प्रतिपादितमित्युक्तेर्मातृकाविवेक: समयिनां तन्त्रमिति रूढिमवलम्ब्य

तादृशार्थस्यैवात्र प्रतिपादनादस्यऽपि तथात्वं कल्प्यते । मातृकाचक्रविवेके उत्तरखण्डे (चतुर्थखण्डे) जाग्रत्प्रस्तावेकादिमान्तस्पर्शवर्णानां संकोचाधिक्य दर्शनाय सर्ववर्णकारणरूपस्याकारादिवर्णपञ्चकस्य स्फुरणे प्रतिपादितप्रक्रिया व्युत्पादिता यथा -

यद्वर्णपञ्चकमपूर्वकमादिवर्ग्य -
मन्तःस्थतां भजति संकुचिते तदीषत् ।
तत्कादिवर्गतनुसंकुचितं नितान्त-
मूष्मात्कमं च दधतेऽङ्कुरिताभिपूर्तिः ॥

तवर्गादिवर्णप्रतिपाद्यानि तत्त्वानि -

श्रोत्रादिकं खलु तवर्गमयं विलोमाद्वागादिपञ्चकमिदं च टवर्गरूपम् ।
शब्दादि खाद्यपि चवर्गकवर्गरूपमैतानि वायुदहनाम्बुमहीविलासाः [३]॥

श्रोत्रादिकं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणरूपं तत्त्वपञ्चकम् । विलोमात्तवर्ग मयम् । विलोमक्रमिकतवर्गरूपनकारादितकारान्तवर्णपञ्चकरूपम् । अत्रापि नकारप्रतिपाद्यं श्रोत्रतत्त्वमाकाशांशः । धकारप्रतिपाद्या त्वक् वाय्वंशः । दकारप्रतिपाद्यं चक्षुस्तेजोऽंशः । थकारप्रतिपाद्या जिह्वा जलांशः । तकारप्रतिपाद्यः प्राणाः पृथिव्यांश इति विज्ञेयम् । इदं प्रत्यक्षनिर्देश्यं वागादिपञ्चकं च वाक्पाणिपादपायूपस्थवायुरूपतत्त्वपञ्चम् । विलोमादित्यस्यात्रापि सम्बन्धः । विलोमक्रमिकटवर्गरूपं णकार आभाशांशो वाक् । दकारो वाय्वंशः पादौ । उकारस्तेजोंशः पाणी । ठकारोजलांशः उपस्थः । टकारः पृथिव्यंशः पायुः । शब्दादिशब्दस्पर्शरूपरसगन्धरूपतत्त्वपञ्चकमाकाशवत् च आकाशवाय्वादित्य स्यानुवृत्तिः । ञकारः आकाशांशः शब्दः । मकारो वाय्वंशः स्पर्शः । जकारस्तेजसांशोरूपम् । छकारः सलिलाशोरसः । चकारः पृथिव्यंशो गन्धः । ङकार आकाशः । घकारो वायुः । गकारस्तेजः । खकारः सलिलम् । ककारः पृथिवीति विवेकः । एतानि तवर्गादिवर्गचतुष्टयतत्त्वानि । वायुदहनाम्बुमही विलासाः । वायोस्तवर्गादिवर्गचतुष्टयतत्त्वानि वायुदहनाम्बु विलासाः । वायोस्तवर्गाधिष्ठातृत्वात् टवर्गप्रतिपाद्यतत्त्वानि अग्निः विलासः । जलस्य च वर्गाधिष्ठातृच्चवर्गप्रतिपाद्यतत्त्वानि जलस्य विलासः । पृथिव्याः

कवर्गाधिष्ठातृत्त्वात् कवर्गप्रतिपाद्यतत्त्वानि पृथिवीविलासा इति विवेक: । कचटतवर्गतत्त्वात्मन: स्थूलस्य पृथिव्यण्डस्य पवर्गवर्णरूपम् प्रकृत्यन्तं सूक्ष्मरूपतया कारणम् ।

देहात्मिका प्रकृतिरान्ततरुपमुर्व्या: ।
सूक्ष्मं जलस्य खलु रूपमहं क्रियास्यात् ।
अग्नेस्तु बुद्धिरनिलस्य मनोऽन्तरात्मा ।
सर्ग: खलु प्रकृतिज: क्षितिसर्गबीजम् ।।

अत्रायं भाव: - देहात्मिका देहरूपिणी प्रकृति: । देहाभिमान एव प्रकृतिरिति व्यवह्रियते । साप्रकृति: । उर्व्या: पृथिव्या: । कवर्गरूपिण्या इति भाव: । अन्तरं अन्त: कक्षायां स्थितं रूपं स्वरूपं सूक्ष्मं रूपम् । अं क्रियाऽहङ्कार: स्यात्खलु । अग्नेष्टवर्गरूपस्य अन्तरात्मना बुद्धि: । अनिलस्य तवर्गरूपस्य अन्तरात्मना मन: । एवं प्रकृतिज: सर्ग: संसार: । पवर्गवर्णचतुष्टयं भवति । रूपप्रकृति: संसार: । क्षितिवर्गस्य कवर्गादिवर्गचतुष्टयात्मन: पृथिवी संसारस्य । बीजं कारणम् । सूक्ष्मस्य प्रकृतिसंसारस्यैव स्थूलभाव: । पृथिवी संसार इति प्रकृतिसंसारस्य ब्रह्माण्डस्य पर्यायस्य कार्यत्वं स्वाभाविकस्य प्रकृत्यन्तरस्य पृथिव्यन्तं मूलत्वम् । प्रकृत्यन्तस्तु मायाविलास इति तात्पर्यम् । अत एव चतुस्त्ररूपस्य प्रकृत्यन्तरविबिम्बत्वम् दशारयुग्मरूपस्य पृथिव्यन्तस्य रश्मिचक्रत्वं महायन्त्रे विभाव्यते । प्रकृत्यण्डम्

देहात्मनो प्रकृतिपुरुषयो: प्रमाता
देहोऽत्र तस्य निलयोऽपि तदङ्गमात्मा ।
आत्मा यथा भवति मातृपदं वपुश्चेत्
तल्लीनमस्त्यविरह शिवयो: स्वभाव: ४।।

अत्रायं भाव: - देहात्मनोर्देहात्मपर्याययो: प्रकृतिपुरुषयोर्मध्ये । अत्र विसर्गप्रकरणे देह: प्रमाता । तस्य देहस्य निलयोऽपि आश्रयोऽपि । अपि शब्देनाङ्गित्वसम्भावना प्रतीयते । देहस्य विमर्शतत्त्वपरिणाम रूपस्य आत्मन: प्रकाशं विना न कुत्रापि स्थितिरूपपद्यते । धर्मस्य धर्मिण्येवाश्रयणमिति

नियमात् । आत्मातदङ्गम् , तस्य देहस्याङ्गम् , तदन्तर्गतत्वेन तदङ्गत्वम् विसर्गप्रमातृदेहस्य प्रकृतिपर्यायस्य व्याप्तौ आत्मा तदन्तर्गतः सन् तदङ्गतां भजते । यथा आत्माप्रमातृपदं प्रमातृस्थानं भजन्त्यारोहते । तत्र विन्दुव्याप्तिपदे तल्लीनं तस्मिन्नात्मनि लीनो भूतम् । वपुः अस्ति सत्तामवलम्बते । न तु परंमोच्छेदं प्राप्नोति । तथात्वे विमर्शपदस्य पुनरूदयप्रसङ्गात् । विमर्शस्य पुनः पुनरूदयप्रकाशव्याप्तावपि विमर्शस्यात्यन्तिकोच्छेदो न सम्भाव्यते इत्यवधारणीयम् । अविरह इत्येन प्रकाशविमर्शयोरितरेतरव्याप्तौ उभयोरप्यनुच्छेदं प्रतिपद्यते । शिवयोः शिवा च शिवश्च शिवौ तयोः शिवयोः । अविरहः अन्योन्याविना भावः । स्वभावः नैसर्गिकः । प्रकाशं विना विमर्शोऽपि न विमर्शं विना प्रकाशोऽपि न , किन्तु प्रकाशव्याप्तौ विमर्शस्य प्रकाशैक्येन स्थितिः विमर्शव्याप्तौ प्रकाशस्य भिन्नसत्वेनैवस्थितिरिति विभागः ।

अहङ्कारबुद्धिमनो रूपेण त्रिविधस्य विमर्शादभिन्नस्य धर्मस्य स्वरूपपरामर्शः

जाड्यादहङ्कृतिरिव प्रथते विमर्शो ।
बुद्धिजडाजडतया मनसस्त्वजाड्यात् ।
त्रैगुण्यमेतद्बहिः करणत्रये स्यात् ।
सौसुप्तजाग्रदवशेषदशानिदानम् ।।

विमर्शजाड्यात् जडत्वभूमिकापरिग्रहात् अहङ्कृतिरिति प्रसिद्धो भवति । जडत्वभूमिकापरिग्रहविमर्श एवाहङ्कारशब्देन व्यवह्रियते । देहे अहमिति यो विमर्शः स एव जडः विमर्शोऽहङ्कारः । जडभूतदेहाश्रिततत्वेन तद्धर्मत्वात् । अयमेव जडविमर्शोऽन्तः कक्षायामहङ्कारः सन् देहधर्मबहिःकक्षायां शब्दादिपञ्चकरूपः सन् भूतचतुष्टय अहंकारस्य पृथिव्यां अङ्गिन्याधर्मः ।

क्रियासाधनमिन्द्रियं स्वयमपि स्थौल्येन क्रियारूपत्वाज्जडं च स्वत एव स्पन्दमानत्वादजडं च । अन्तः क्रियासाधनरूपेण जडाजडोर्विमर्शः । अन्तः कक्ष्यायां बुद्धिरित्युच्यते । बहिः कक्ष्यायां वागादिपञ्चकमुच्यते ।

अथ विमर्शः एव अजडत्वभूमिका परिग्रहेण मन इत्युच्यते विमर्शस्याज्जडत्वं ज्ञानसाधनारूपेण । ज्ञानसाधनं खलु भवश्चक्षुरादिकमन्तर्बहिः कक्ष्या विभक्तं सूक्ष्मरूपतया बुद्धिवागादि विलक्षणं पदं जडमेव । एतद्बहिः

करणत्रयम्। अन्तःकरणत्रैगुण्यं सत्वादित्रिगुणसमाहारः स्यात् । अहंकारो रजोगुणः उत्पत्तिरूपत्वात् । बुद्धिः सत्वं स्थितिरूपत्वात् । मनस्तमोगुणः संहाररूपत्वात् । चिदेकाकारता खलु संहारः । प्रकाशविश्रान्तिरूपो लौकिकैस्तम इत्युच्यते । तदस्य मनसो लौकिकापेक्षयैव तमस्त्वम् । अथवा क्रियया संहारपक्षे क्रिया रूपोऽहङ्कारस्तमः ज्ञानरूपं मनोरजः अजडत्वं जगदुत्पत्तिदशा. अजडत्वं तत्संहार इति लौकिकपक्षः । जडत्वं जगदुत्पत्तिदशा, जडत्वं संहारदशेति योगसिद्धान्तः । अतो यथाविवक्षिततं जडाजडयोरहङ्कारमनसस्तमो रजो गुणयोर्योजनाकर्तव्या । सुषुप्तिरेव सौषुप्तं सुषुप्तिजाग्रद्भ्यामशेषदशा स्वप्नः, अहंकारो जडत्वात्सुषुप्तिनिदानम् । बुद्धिर्जडतया जाग्रन्निदानम् । मनस्त्वजडतया स्वप्ननिदानमिति विवेकः ।

देहिनो गुणत्रयप्रकृतियोगेन सुषुप्त्यादिदशात्रये परिभ्रमणम् -

देही गुणत्रयमय प्रकृतिर्दशासु
सुप्त्यादिकासु नियमात्परिबंभ्रमीति ।
तास्वप्यहङ्कृतिपुरः सरणात्त्रिपुर्या
मेयोन्नतिं कलयति प्रमुखक्रियांशम् ॥[५]

देही देहाभिमानी प्रमाता गुणत्रयमयप्रकृतिः गुणत्रयसंसृष्टिरूपिणी प्रकृतिः स्वभावो देहपर्यायो यस्यतथोक्तः । एतेन गुणत्रयसंसृष्टिरेव प्रकृतिरिति प्रकृतिलक्षणमुक्तम् । एवं रूपप्रकृतिर्जीवः । सुषुप्त्यादिकासुदशासु सुषुप्तिजाग्रत्स्वप्नेषु नियमादव्याभिचारेण परिबंभ्रमीति पुनः पुनर्भवती । तास्वपिदशासु अहङ्कृतिपुरः सरणात् देहधर्मस्याहङ्कारस्य प्राधान्यात् । त्रिपुट्यां प्रमातृप्रमाणप्रमेयरूपायां संसारकलापसंपुटिकायां मेयोन्नतिं प्रमेयव्याप्तिं प्रमुखक्रियांशं प्रधानक्रियांशो यस्यास्मिन् कर्मणि तथा विमृशति । देहस्य प्रमातृत्वे तद्धर्मस्य विमर्शस्य जडत्वाजडपक्षस्य प्रमेयस्य व्याप्त्यनुसंधानं भवति ।

सर्वस्यान्तःकरणस्य मन एव प्रमाणभूतं मनसः एवाहङ्कारादयः भूमिकाः मनसो विमर्शप्रथमरूपत्वाद् विमर्शवैभवं मनो वैभवमिति ।

मेयादिका सततयुक् त्रिपुटी मनस्तां

मेयादि भासयति मूढमहंक्रियात्मा ।
मात्रादि भास्यति चाथ निजस्वभावाद्
बुद्धिश्चमध्यमपदे मन एव बोध्यम् ।।

मेयादिका मेयमानमातृकाया त्रिपुटी त्रयाणां मेयादिपुटानां समाहारस्त्रिपुटी । सततयुक्तमन्योन्याविनाभावस्वभावा । तां त्रिपुटीम् । मनः विमर्शस्य मूलं रूपं मूढं जाड्यपर्यायमेढ्यभूमिकापरिग्रहेण । अहङ्कियात्माहङ्कार-स्वरूपे सत् । मेयादि भासयति । प्रमेयादिकं यथा तथा भासयति । मनस एवानुसन्धानमहङ्कार आरोप्यते ।

अथ तदेव मनः निजस्वभावादजडरूपात् तां त्रिपुटीमित्यनुवर्तते । प्रमाणादिकं यथा तथा मासयति । चित्प्रमातृव्याप्तिं दर्शयति । मन एव मध्यमपदे जडाजडसमानपदे । बुद्धिश्च प्रमेयप्रमात्रोः समव्याप्तिप्रदर्शिका बुद्धिश्च मन एवेति बोध्यम् । उक्तप्रमेयं कारणीकृत्यपवर्गे प्रकृत्यादितत्त्वसन्निवेशं दृढीकृत्योपदर्शयत्यनेन श्लोकेन -

तस्मात्पकारवपुषः प्रकृतेः प्रमातुरात्मा मकारवपुरन्तर एतलीनः।
तन्मध्यतस्थितिरहङ्कतिधीहृदां स्यादेवत्प्रमातृपदमिन्द्रियलग्नविश्वम् ।।६

पूर्वोक्तप्रमेयरूपात्कारणात् पकारवपुषः अर्थात् पकारप्रतिपाद्यायाः प्रकृतेः । पकारवपुषः पकारस्वरूपाया इत्युपचारः । प्रमातुः देहपर्यायप्रकृतिरूपस्य प्रमातुः । अन्तर एव व्याप्यपद एव । मकारवपुर्मकारस्वरूपः । अत्राप्युपचारः । आत्मा पुरुषः । लीनः व्याप्तः । तन्मध्यतः तयोः प्रकृतिपुरुषयोर्मध्यभागे । अहङ्कतिधीहृदाम् अहङ्कारबुद्धिमनसाम् । स्थिति सन्निवेशः स्यात् । यद्यपि मकारस्यात्मनो व्यापककवर्गप्रामातृपदे सन्निवेशः तथापि पवर्गव्यापककवर्गयोर्मध्ये सन्निवेषादुभयपक्षप्रक्रियासम्बन्धो वेदितव्यः । स्पर्शकदम्बकस्य प्रमाणपदत्वान्मकारस्य प्रमातुस्तत्प्रकाशानुसारेण परिगणना । तथापि प्रमाणपदक्रियासम्बन्धमात्रं ताटस्थ्यादङ्गी कर्तव्यमेव । अतः प्रकृतिव्याप्तिः पुरुषपर्यन्तं प्रवहतीति निरवद्यम् । चतुरश्रवचक्रसन्निवेशे तु मनोबुद्ध्योरेवात्मपुरुष पयोरङ्कारप्रकृतिभ्यां व्याप्तिस्ताभ्यां च तदुभयव्याप्तिरिति विवेकः ।

एतत्प्रमातृपदं प्रकृत्यन्तरूपम् । इन्द्रियलग्नविश्वं मनोबुद्धिरूपज्ञान

क्रियेन्द्रियसम्बद्धं विश्वम् ।

पार्थिवसंसारप्रक्रिया -

चेतश्चमत्कृतिपदं वमति स्वलीनं विश्वं बहिः श्रुतिमुखेन्द्रियवर्गभावात् ।
तत्रापि धीन्द्रियगणः पवनोऽपि पृथ्वी ज्ञेयैर्जलैरपिमरुद्भिरूदीरितोऽन्तः ॥७

चमत्कृतिपदं चमत्काराणां स्थानम् । चेतः विमर्शस्य मूलरूपं मनः कर्तृ । स्वलीनं स्वन्तिर्गतम् । प्रकृतिसंसारे स्वप्नसंसारः इव लौकिकैरपि विश्वस्य मनोविलासमात्रत्वाभ्युपगमान्मनोनिष्ठमिति मनोलीनत्वम् , मनः स्वस्वरूप एव विलसदित्यर्थः । विश्वं बहिर्वमति । विश्वस्य वहिर्वमनं च मनश्चमत्कारविशेषः मनसः किं रूपेण बहिर्वमनमित्यत्राह - श्रुतिमुखेन्द्रिय वर्गभावात् । श्रोत्रादिवागादिज्ञानक्रियेन्द्रियवर्गस्वरूपाङ्गीस्वीकारात् । श्रोत्रादिभूमिका परिग्रहेणेत्यर्थः । श्रोत्रादिभ्य एव ज्ञेयरूपस्य विश्वस्य निर्गमः वागादिभ्य एव कार्यरूपस्य नियमेन विश्वस्येन्द्रियप्रकाशान्तर्भासनादिन्द्रिय कारणत्वम् । तथाचेन्द्रियरूपान्तरत्वाद्विश्वेन्द्रियप्रकाशकादेव पर्यवस्यति । इन्द्रियप्रकाशोन्मेष एतत्स्फुरणम् , तदनुन्मेषेत्वस्फुरणनित्यत्वन्व्यञ्जयति रेफाभ्या विश्वस्येन्द्रिय प्रकाशकारणं न तु मायाविमोहिकारणादसम्प्रतिपन्नपरमाण्वादय इति ।

एवं परमार्थादिन्द्रियप्रकाशोध्वान्तस्य विश्वस्य पशुविषयेविपरीतप्रतीति प्रक्रियामाह - तत्रापि इति । तत्र बहिः कक्ष्यायाम् । अपि शब्दोऽन्तः कक्ष्यासमुच्च याभिधायकः । यथान्तः कक्ष्यायां प्रकृतिसंसारे पशोर्विपरीतप्रतीतिः तथा बहिः कक्ष्यायां पार्थिवाण्डसंसारेऽपि । इन्द्रियगणो ज्ञानेन्द्रियवर्गः पतनोऽपि परमार्थरूपेचिद् व्याप्ते संसारे वायुस्थानकोऽपि पृथ्वीस्थानं संकोचभावात्प्राप्तः । ज्ञेयैर्ज्ञेरूपैः वैद्यैर्जलैरपि चिद्व्याप्तौ जलस्थानकैरपि । अत्र विपरीतमरुद्गिः । व्याप्त्या वायुस्थानं प्राप्तैः । अन्तरूदीरितः स्वभ्यन्तरे क्षिप्तः व्याप्त इति । तवर्गरूपाणां ज्ञानेन्द्रियाणां चवर्गरूपैः शब्दादिभिर्व्याप्ति रिति ।

कर्मेन्द्रियाणां कार्यरूपवेद्यानां च वैपरीत्यम् -

कर्मेन्द्रियाणि कठिनत्वपरान्तमग्नि वहन्याकृतीनिस्वपदस्थधराश्रितानि ।
पृथ्वीमयप्रकृतिखग्रहणोन्मुखानि बोध्यानि भूतविततेरिह वैपरीत्ये ॥८

अयं भाव: कर्मेन्द्रियाणि टवर्गप्रतिपाद्यवागादीनि । कठिनत्वपरान्तमग्नि कठिनत्व परान्त: परभावादग्निं भजन्तीति तथोक्तानि । क्रियाया संकोचनिर्बहणपदत्वात् कर्मेन्द्रियाणां कार्यरूपवेद्यानां चातिसङ्कोचाभावादति काठिन्यम् । वह्नयाकृतानि जडांशप्रधानवह्निमयानि । चिद्व्याप्तौ तु कर्मेन्द्रियाणामजडांशप्रधानवह्निमयत्वम् । वह्नेर्जडाजडमयत्वं तु पूर्वमेवव्याख्यातम् । खपदस्थधराश्रितानि व्याप्तिलक्षणमाकाशपदमाक्रन्तवतीं पृथिवीमाश्रितानि । वागादीनां पशुपदेऽपि यद्यपि देहपर्यायप्रकृत्याश्रितत्त्वं तथापि कार्यवेद्यप्रधानभूत पृथिवीव्याप्त्यनुसंन्धानात् पृथिव्याश्रितत्त्वं पृथिवीत्यादिचिद्व्याप्ति पदे पूर्णरूपतया च आचारितरूपिण्या: महापृथिव्या एव पार्श्वे पृथ्वीमय्या: प्रकृते: ग्रहणे व्याप्तौ उन्मुखान् भूतविततेरिह वैपरीत्ये बोध्यानि ।

अत्रायमभिप्राय: पशोर्ज्ञानेन्द्रियाणि ज्ञेयेषु शब्दादिषु किञ्चिदेव ज्ञातुं क्षमन्ते न तु सर्वम् । अतस्तानि तै: ज्ञेयै:, व्याख्यातानि । शब्दाय एव कार्यावस्थायां वचनादिभावेन स्थूलतां प्राप्यकाशादयो भवन्ति । कर्मेन्द्रियाणि च वचनादिमात्रमाकाशादिकं कर्तुं क्षमन्ते न तु महाभूतरूपमाकाशादिकर्तुः । अतस्तानि च महाभूतै: कार्यैर्व्याप्तानि ।

एवं द्विविधमिन्द्रियवर्गं द्विविधेन वेद्यवर्गेण व्याप्तं सत् आत्मदेहरूपस्य प्रमातृद्वयस्य ज्ञेयकार्यवर्गाभ्यां व्याप्तिं समर्पयति । चिद्व्याप्तौ तु आत्मास्वसाधनै ज्ञनेन्द्रियै: ज्ञेयवेद्यं व्याप्नुवन् स्वात्मीकरोति । अशेषज्ञेयस्य स्वात्मीकारणात्सर्वज्ञो भवति । देहश्च स्वसाधनै: कर्मेन्द्रियै: कार्यवेद्यं व्याप्नुवन् । तत्स्वामीकरोति निशेषकार्यस्य स्वात्मीकरणात् सर्वकर्ता भवतीति ज्ञानक्रियेन्द्रियणां प्रकृति विकृतिभावप्रक्रिया वेदितव्या । प्रमेयप्रमातृमिश्ररूपस्य प्रमाणसूर्यस्य कलासंस्थानप्रक्रियाया व्युत्पादनं यथा -

नानात्मकस्य तरणेर्द्वयतो हि सिद्धि: ।
मायाबलात्प्रथमात्तत्र चमेयकोट्या: ।

ग्राह्यग्रहीतपदवर्णसमन्वेयन
योज्याःकला बहिस्थान्तरपि क्रमज्ञैः ॥[९]

नानात्मकस्य प्रमाणरूपस्य तरणेः सूर्यस्य द्वयतः प्रमेयप्रमातृभ्यां सिद्धिः स्वरूपलाभो हि । अत्र च मायाबलात् प्रमेयकोट्या एव प्रथमता , प्रमातृकोट्या द्वितीयपदता । विसर्गव्याप्तिरेव प्रथमेत्यर्थः । अत्र प्रमाणसूर्यस्य सिद्धिः द्विवर्णप्रतिपाद्यानां कलानां योजने ग्राह्यगृहीतृत्वपदवर्णसमन्वेयन ग्राह्यस्थानकानां वर्णानामानन्तरं ग्राहित्वस्थानकवर्णानां यथायोग्यं समन्वेयन । बहिः कवर्गादितवर्गान्तरूपे पृथिव्यान्ते । अन्तरमपि पकारादिमकारान्तरूपे प्रकृत्यन्ते । क्रमज्ञैः ग्राह्यग्राहककर्णक्रमविद्भिः । कलायोज्याः । कवर्गटवर्गाणां यथाक्रमं योगः चवर्गतवर्गाणां च तथा । पकारबकारयोर्योगः फकारमकारयोश्च तथा । एवं च दशारयुग्मं खेः रश्मिचक्रं चतुरस्वम् , बिम्बचक्रम् ।

यत्तु ककारादिङकारान्तैरनुलोमविलोमोपहितद्वादशवर्णैः मकारादि ङकारान्तविलोमपठितद्वादशवर्णानां योगेन द्वादशानां सूर्यकलानां प्रकल्पना पारम्पर्यं तत्प्रमेयप्रमात्रात्मनः सूर्यस्य स्वरूपभूतेषु चतुर्विंशतिस्पर्शाक्षरेषु अर्धं प्रमेयकोटिरर्धं प्रमातृकोटिरुभयपक्षसमन्वयाद् द्वादशकलानिर्वृत्तिरिति विद्यमानमपि चक्रसंस्थानसंवादं न लभते इति मातृकाचक्रमर्मविद्भिर्महानुभावैरुपेक्षितम् ।

कलायोजनप्रकारं चक्रे संस्थाने संवादयन् मतान्तरप्याक्षेपादिप्रायेण उपदेशः -

माता दशेन्द्रियमयो दशकं च मेयं
तन्मेलनाद् दशकलात्मदशारयुग्मम्
अन्तः कलाद्वयमिह प्रवृत्तौ निलीन
स्त्रैगुण्यमातरि पुमांश्चतुरस्य बिम्बे ॥[१०]

मातृमेयात्मको हि रविः माता च बहिस्तवर्गटवर्गप्रतिपाद्यदशेन्द्रियः । मेयं च तथा चवर्गप्रतिपाद्यशब्दाद्याकाशादिकदश उभयम् । तन्मेलनात् यथाक्रमं पृथिव्यादिकार्यवेद्यप्रतिपादककवर्गाक्षरपञ्चकेन वागादिकर्मेन्द्रिय प्रतिपादक टवर्गाक्षरपञ्चकस्य मेलनात् । तथा गन्धादिप्रतिपादककवर्गाक्षरपञ्चकेन घ्राणादि प्रतिपादकतवर्गाक्षरपञ्चकस्य मेलनात् । पञ्चपञ्चकलात्मकं सम्भूय दशकलात्मकं

दशारयुग्मं भवति । अन्तः पवर्गरूपे प्रमातृपदे कलाद्वयं कार्यवेद्यबीजभूत प्रकृतिप्रतिपादकेन पकारेण कर्मेन्द्रियबीजभूतबुद्धिप्रतिपादकस्य बवर्णस्य मेलनादेका कला । ज्ञेयवेद्यबीजभूताहङ्कारप्रतिपादकेन फकारेण ज्ञानेन्द्रियबीज भूतमनः प्रतिपादकस्य मकारस्य मेलनादन्या कलेति कलाद्वयमिहचतुरक्षर निष्पन्नकलाद्वयात्मके चतुरस्रबिम्बे त्रैगुण्यमातरि त्रिगुणसवित्र्यां प्रकृतौ पुमान्यकाररूप आत्मा निलीवः । अहङ्कारसंहितायां प्रकृतौ बुद्धिमनसोर्यन्निलयनं तत्पुरुषस्य निलयने पर्यवस्यतीति भावः । स्पर्शवर्णचक्रस्य प्रमाण चक्रत्वान्मनो बुद्धिरूपेणैव पुरुष यात्र च संस्थानं न तु मकाररूपेण । तथापि मनोबुद्ध्योः पुरुषस्यैव रूपान्तरत्वात्पुरुषस्यापि मकारस्य प्रमाणप्रमातृ चक्रयोर्मध्यवर्तित्वादुभय चक्रसम्बन्ध इति पुमान्निलीन इति । मकारप्रतिपाद्य पुरुषतत्त्वस्यैव प्रमाण प्रमात्रोरुभयचक्रसम्बन्धं स्फुटीकरोत्यनेन श्लोकेन -

मानात्मनैव चिदचित्स्थितिरत्रचक्रे
भेदात्मके न भवतीह विसर्गबिन्दोः ।
मस्यानुषक्तिरपि मुख्यसमन्वयस्य
बिन्द्वैकभोगपदमातृपुरोचितस्य ॥११

अत्र भेदात्मके चक्रे प्रमाणचक्रस्य ग्राह्यगृहीतृभेदाविनाभावभूमित्वात् दशारयुग्मरूपत्वम् । न तु चतुर्दशार अष्टादशारवदेकैकचक्रत्वमतो भेदात्मके प्रस्फुटभेदस्वरूपम् । अत्र प्रमाणचक्रे चिदाचितोः प्रमातृप्रमेययोः स्थितिः । मानात्मनैव इन्द्रियरूपेणैव । इन्द्रियाणां प्रमाणपर्यायाणां ग्राह्यग्राहकोभयसिद्ध रूपत्वात् ग्राह्यग्राहकरूपेणैव प्रमेयप्रमातृस्थितिरित्यर्थः । अतः कारणादित्यौ चित्यादध्याहर्तव्यम् । इह प्रमाणचक्रे विसर्गविन्दोः विन्दोरपि सतो भेदमयत्वात् विसर्गस्येत्यर्थः । मस्य मकारप्रतिपाद्यस्य पुरुषस्यानुषक्तिरनुषङ्गो न भवति । चतुर्विंशत्यक्षरात्मकद्वादशकलारूपे प्रमाणचक्रे पुरुषस्थानकस्य मकारस्य पञ्चविंशतितमस्य न संन्निवेश इत्यर्थः । तर्हि तस्य मकारपुरुषस्यात्र चक्रे किं सम्बन्धाभाव एवेत्यत्राह - अपि मुख्य समन्वयस्येति प्रधान्येन सम्बन्धवतोऽपि प्रमाणचक्रे प्रकृतिव्याप्तिविषयत्वेन सम्बन्धवतोऽपि तत्र चक्रे नानुषक्तिर्भवती त्यन्वयः । कुत इत्याह बिन्द्वेकभोगपदमातृपुरोचितस्य - विन्दोरेकभोगस्थानम्

अष्टरूपं प्रमातृपुरं तदुचितस्य । द्वौ हि संग्रहेण प्रमातारौ । अभेदानुसन्धाता च तत्र मकारप्रतिपाद्यो भेदानुसन्धाता अतः प्रसिद्धप्रमाता मकारप्रतिपाद्यप्रमातृ पुरसन्निवेशमेवार्हति न तु प्रमाणपुरसन्निवेशम् । तत्र तद्रूपान्तरयोर्मनोबुद्ध्योरेव सन्निवेशः । सम्बन्धस्तु प्रमाण चक्रेऽपि मकार प्रतिपाद्यस्यास्यत्ववेति निष्कर्षः ।

विसर्गव्याप्तिप्रकरणमुपसंहरन्नादितश्चिन्नगरणरूपं प्रकरणमेयं क्रौडीकृत्य दर्शयति -

स्वप्ने स्मृतं तदनु जाग्रति सत्यकल्पं
बन्धे प्रपद्यवपुषा स्वविमर्शशक्त्या ।
क्षित्या च तत्परवशो हृतमातृभावो
मध्यन्दिनद्युमणिरेष मकारविन्दुः ॥१२

स्वप्ने स्मृतं मनसा संकल्पितम् । तदनु जाग्रति सत्यकल्पं दृढानुभवारूढतया परमार्थवदेव भासनं न तु परमार्थता अन्तः कक्ष्यापरामर्श निर्विकल्पचिदात्मनः शिवस्य नित्यनिरावरणत्वेन भासमानत्वात् बहिरवभास मानस्य प्रवृत्तिरूपविमर्शशक्तेरेव स्वरूपेण वपुषा प्रकृतिपर्यायेण बहिस्तुक्षित्या च एवं कक्ष्याद्वयेऽपि बन्धं प्रपद्य तत्परवशः तयोर्देहमहापृथिव्योः परवशः परतन्त्रः । हृतमातृभावः ताभ्यामिवापहृतप्रमातृभावः प्रमेयतां प्रापित इति भावः । मकारविन्दुः मकारप्रतिपाद्यो बिन्दुः, च तत्त्वं पुरुषः इत्यर्थः । मध्यन्दिनद्युमणिः मध्याह्नकालसूर्यो जातः इति शेषः । यथा मध्यन्दिनसूर्यः स्वरश्मिपटलेन स्थगितो नावभासते । तथायमपि चिदात्मास्वस्या एव विमर्श शक्तेर्विजृम्भणरूपेण अन्तर्बहिः प्रपञ्चेन च मायावृत्त मूलस्वरूपो जातः इत्यर्थः ।

इदानीं प्रकरणान्ते चिदव्याप्तिरूपमुत्तरप्रकरणप्रमेयभावतारयन् जाग्रच्चक्रे वक्ष्यमाणे स्वप्नचक्रे च विसर्गप्रमातुः प्रति सिंहासनं तुर्यजाग्रत्स्वप्नरूपं पदद्वयं तत्र न्यायेन एकैकमातृकया समुन्मीलितं व्युत्पादयति ।

यत्पादिवर्गमुखार्णचतुष्टयस्य
सङ्कोचवर्जनमिदं खलुतन्त्रनीत्या ।
तुर्यस्थितं हमुखशान्तचतुष्टयात्म
योज्यं क्रमेण बहिरन्तरभेदसृष्टयोः ॥१३

पादिवर्गमुखार्णचतुष्टयस्य विलोमेन पवर्गादिवर्गचतुष्टयं पवर्गतवर्गट-वर्गरूपं वर्गचतुष्टयं वकारलकाररेफयकाररूपं वर्णचतुष्टयं तस्योभयस्य । तन्त्ररीत्या एकया क्रियया । प्रयोजनद्वयसिद्धिरूपया तन्त्ररीत्या तन्त्रन्यायेन । इदं संकोचवर्जनं खलु स्पृष्टतेषत्स्पृष्टताप्रयत्नकृतसंकोचत्यागः खलु । यत्तत् तुर्यास्थितं हमुखशान्तचतुष्टयात्मवत्पवर्णकदम्बकं पवर्गस्य वकारस्य च संकोचत्यागरूपो हकारः । तवर्गस्य लकारस्य च संकोचत्यागरूपः सकारटवर्गस्य च रेफस्य च संकोचत्यागरूपः षकारः । चवर्गस्य यकारस्य सङ्कोचत्यागरूपः शकारः । कवर्गस्य देहप्रतिपादकलकारस्य च विसर्गप्रमातृरूपत्वात् तस्य च चिद्रूपाप्तिपदे चित्स्वरूप एवान्तर्धानात्पदद्वयेऽपि हकारएव विलयन् अतो न तत्सङ्कोचत्यागरूपो वर्णोऽन्वेषणीयः । एवं स्पर्शसङ्कोचत्यागरूपमतं तत्सङ्कोचत्यागरूपं हकारादिशकारान्तवर्णचतुष्टयं पदद्वयं सत् क्रमेण । बहिरन्तरभेदसृष्टयोः बहिरभेदसृष्ट्यां अन्तरभेदसृष्ट्यां च भेदजाग्रत्प्रतियोगिन्यभेद जाग्रत् पदे भेदस्वप्नप्रतियोगिन्यभेदस्वप्नपदे चेत्यर्थः । दशारयुग्मार्धपदे अष्टारार्धपदे चेति वेदितव्यम् । योग्यं योजनीयम् ।

अथ निवृत्तिरूपस्य शुद्धविद्याप्रमातुः प्रमेयेष्वभ्यस्यमानाहम्भावस्य भेदो न प्रशान्त इत्यभेदजाग्रत्पदाधिष्ठातृत्वनाभ्युपगतं यदव्याप्तिपदस्य बहिर्बहिरर्थानामन्तरन्तर्थेषु निमज्जनरूपं स्वभावं व्युत्पादयन् शवर्गे शुद्धविद्याद्यभेद प्रमातृणां विषयविभागं दर्शयति् ।

यदबाह्यबाह्यपदमज्जनमन्तरन्त
स्तच्चित्पदे जडपदे विपरीतमेतत् ।
अक्षात्मवेद्यमिह शः स हि शुद्धविद्या
देहाविभिन्नकरणेन्द्रियमीश्वरः षः ॥१४

अन्तरन्तः पदे बाह्यबाह्यपदमज्जनं यत् बाह्यबाह्यपदस्य यन्मज्जनं प्रमेयाणां प्रमाणपदे मज्जनं प्रमाणानां प्रमातृपदे मज्जनमित्यर्थः । तच्चित्पदे चिद् व्याप्तिपदे । भवतीति शेषः । जडपदे चितव्याप्तिपदे एतद्विपरीतम् । अन्तरन्तः पदस्थबहिर्बहिः पदे मज्जनं विपरीतम् । प्रमातृपदस्य प्रमाणे मज्जनं , प्रमाणपदस्य प्रमेयपदे मज्जनमित्यर्थः । इह शुद्धविधेश्वरसदाशिव

शक्त्याह्वयस्य प्रमातृचतुष्टयस्य । साधारणपदे शवर्गे । अक्षात्मेन्द्रियप्रकाशैकात्मा इन्द्रियप्रकाशे लब्धकात्ममित्यर्थः । वेद्यं प्रमेयजातं शः । शवर्ण इति वेदितव्यम् । प्रमाणलब्धैकात्यम्यप्रमेयस्थानीयः शवर्ण इत्यर्थः । यद्यपि चवर्गयकारसंकोच त्यागात्मनः शकारस्य शब्दादिमात्रे घ्रुस्थानित्व युक्तं तथापि सर्वप्रमेयोपलक्षत्वेन चित्पदेऽहंकारे कवर्गलकारयोः रूपभेदशकारोऽपि सर्वप्रमेयोपलक्षण इति वेदितव्यम् । स हि शकारः शुद्धविद्याप्रभावः । प्रमातृप्रमाणप्रमेयरूपेण पदत्रयेण निष्पाद्यस्वरूपस्य प्रमातुः कथं प्रमेयमात्रप्रतिपादके शकारे स्वरूपोपपत्तिरित्य त्रोच्यते । वर्णचतुष्टयात्मकः सर्वोऽपि शवर्गः शुद्धविद्यादिप्रमातृ चतुष्टयस्य साधारणपदे प्रत्येकं स्वरूपं भवति । तथापि शुद्धविद्यादीनां चतुर्णां प्रमा प्रमातॄणां शकारादयश्चत्वारो वर्णाः एकैकस्यैकैक एव स्वरूपसिद्धिहेतुभूतस्य विशेषस्य प्रतिपादक इत्युपचारात्तत्तदेकैकवर्णरूपता तेषाम् । अतस्तस्येन्द्रियैकात्म्य त्वेद्य प्रतिपादकशकाररूपत्वात् । ईश्वरस्य प्रमातुर्दाहविभिन्न कार्यवेद्यैकात्म्य कर्मेन्द्रियत्वं स्वरूपसिद्धिहेतुर्विशेषः । अतस्तस्य तादृक्कर्मेन्द्रिय प्रतिपादकषकार रूपत्वम् । एतदेवाह देहाविभिन्नकरणेन्द्रियमीश्वरः ष इति ।

अथ सदाशिवशक्तिप्रमातृस्वरूपं वर्णद्वयमाह -

ज्ञानेन्द्रियं स हि सदाशिव आत्मनैक्ये ।
स्वात्मा खविश्रममयो ह इतीह शक्तिः ।
एत्ततुरीयपदमङ्गचतुष्टयाढ्यं ।
बाह्यनन्तरालपदयोः श्रितरूपसाम्यम् ॥५/४

सदाशिवस्य प्रमातुरात्मविभिन्नसात्मां कृतज्ञेयवेद्य ज्ञानेन्द्रियत्वं स्वरूपसिद्धिहेतुविशेषः । अतस्तस्य तादृग्ज्ञानेन्द्रियप्रतिपादकसकाररूपत्वात् । एतदाह धाम्नैक्ये आत्मना तादात्म्ये सति तादृशं ज्ञानेन्द्रियम् । स हि सकारो हि तादृग्ज्ञानेन्द्रियप्रतिपादकः । सकारो हि सदाशिव इत्यर्थः । खविश्रममयः अपरिच्छिन्न चिदाचित्सामरस्य रूपाकाशविश्रममयः । स्वात्मा देहोत्मोभयलक्षणं स्वरूपम् । ह इति हकारेति वर्णः । इह शवर्गे । शक्तिः शक्तिमान प्रमाता । अपरिच्छिन्नविश्रान्तिमयदेहात्मसामरस्य लक्षणस्वरूपत्वं शक्तेः स्वरूपसिद्धिहेतु र्विशेषः । अतस्तस्यास्तादृंशस्वरूपप्रतिपादकहकाररूपत्वम् । एवं शुद्धविद्यादीनां

साधारणपदे शवर्गे तत्तस्वरूपसिद्धिहेतुविशेषप्रतिपादकवर्णाश्रयणेन विषयविभागं व्युत्पाद्यास्य शवर्गरूपस्य पदस्य बाह्ये दिष्टमेव स्फुटप्रत्यययायोद्वाहयति । एतदित्या अङ्गचतुष्टाढ्यम् महाभूतचतुष्टयगर्भिण्यो महापृथिव्याः प्रकृत्याश्चचित्पदे हकारे निमज्जनादुभयत्राङ्ग चतुष्टयाढ्यम् । एतत्तुरीयपदम् । अभेदजाग्रत्स्वप्नं तुर्यपदम् । बाह्यान्तरालपदयोः स्पर्शान्तछ स्थप्रतिपाद्य जाग्रत्स्वप्नपदयोः श्रितरूपसाम्यम् । चवर्गस्य यकारस्यापि संकोचत्यागे शकार एव टवर्गस्य रेफस्य सङ्कोचत्यागे षकार एव । एवमवशिष्टमुन्नेयम् । शवर्णशुद्धविद्यादीनां प्रत्येकस्वर एव साधारणं पदमित्युक्तम ।

एतत्पदं पदमखण्डितमेव शुद्धं
विद्यादिकस्य खलु तत्त्वचतुष्टयस्य ।
वेद्याद्युदश्चिति स्फुरणक्रमेण
तत्तदद्दशावतरणं विबुधैर्विभाव्यम् ॥१५

एतच्चवर्गरूपं पदम् । अखण्डितमेव अविमलमेव । शुद्धविद्यादिकस्य तत्त्वचतुष्टयस्य पदम् । प्रमाणप्रमेयाङ्गस्य प्रमातुरेकवर्णमात्रेण दुष्प्रतिपादतत्वात् । एवमपि शुद्धविद्यादीनामेकैकवर्णव्यवहारोपचारे प्राक्प्रतिपादिततोपपत्तिमासूत्रयति । वेदादिति । वद्याद्युदश्चिति स्फुरणं चैत्यव्याप्त्यवसाने यदा तदुन्मेषप्रारम्भः तदयं प्रारम्भो वैद्यादिक एव भवतीत्यनुभवः प्रमाणम् । यथाहि पाशवावसाने साधको गुर्वनुग्रहसमुन्मिषित विवेकदृष्टिवेद्यमेव स्वात्मेन्द्रियप्रकारो निमज्जयति । प्रमेयस्यैवं प्रमाणनिमज्जनाभ्यां सदारूढविद्यास्वभावस्तदनन्तरं स्वात्मीकृतप्रमेयं प्रमाणं प्रमातृपदे निमज्जयितुमुद्युञ्जानः शरीररूपे तावत्प्रमातृभागे स्वामीकृत कार्यप्रमेयं कर्मेन्द्रियवर्गरूपप्रमाणं निमज्जयति । अतो विश्वशरीरः सन् विश्वचेष्टकतया विभूतसर्वकर्तृत्वशक्तिरारूढेश्वरता कक्ष्यस्ततः परं स्वात्मीकृत ज्ञेयप्रमेयं ज्ञानेन्द्रियप्रमाणमात्मरूपे प्रमातरि निमज्जयति । अतो विश्वात्मकः सन्नाविर्भूतसर्वज्ञत्वशक्तिरारूढसदाशिवकक्ष्योः ज्ञानस्य प्राग्भावेन क्रियां क्रियाप्राग्भावेन ज्ञानं च सन्दधानस्ततः परं ज्ञानक्रियासामरस्यभूमिमपरिच्छिन्न विश्रान्तिमयीमिच्छात्मिकां शक्तिक्रियामारोहतीति पक्रियया वेद्याद्युदश्चितस्फुरण क्रमेण तत्तदंशवर्ण उक्तमर्यादया शुद्धविद्यादितत्तद्दशावतरणं विबुधविद्वद्भिर्वि

भाव्यम् । उक्तमर्यादया वैद्यादिकं चित्रवहणे यं यं भागमधिकृत्य शुद्धविद्यादीनां स्वरूपलाभः तत्तद्भावरूपतत्तदावरणस्य तत्तत्प्रमातृ पदत्वमौपचारिकमितिभावः ।

इदानीं बाह्ये ज्ञानेन्द्रियप्रतिपादकतवर्गसङ्कोचत्यागरूपस्य सकारस्य सदाशिवकलायाः सतोऽपि बहिस्तस्य प्राधान्यानौचित्यादीश्वराङ्गत्वम् अन्तः पदे रेफाक्षरत्यागरूपस्य षकारस्येश्वरकलायाः सदा शिवाङ्गत्वमिति व्युत्पादयति ।

सा सदाशिवः स खलु बिन्दुमयस्तवर्ग-
स्तत्रेश्वराङ्गमयमान्तधामयोग्यः ।
ज्ञानक्रिये न सुशिवस्य सदाशिवेशा
वन्तर्बहिश्च नियताङ्गिपदौ क्रमेण ॥१६

बिन्दुमयस्त्यक्तसङ्कोच इत्यर्थः । तवर्गः । स खलु सकारः खलु । असौ सकारः सदाशिवस्वभावः । अन्तरधामयोग्यः । स्वप्रलक्षणज्ञानसमुचितोऽयं सकाररूपः सदाशिवस्वभावः । तत्र बाह्यपदे क्रियाप्रधाने । ईश्वराङ्गम् । ईश्वरस्याङ्गमेव । क्रियापदे ज्ञानांशस्य न्यग्भावः । अत्रोपपत्तिमाह सदाशिवेशौ शिवस्य ज्ञानक्रिये ।

ननु शिवस्य ज्ञानशक्तिलीलासरूपसदाशिवः क्रियाशक्तिविलासरूप ईश्वरः अस्तु प्रकृते का नामोपपत्तिरित्यत्राह एतौ सदाशिवेशौ । क्रमेणान्तर्बहिश्च नियताङ्गिपदौ सदाशिवस्यान्तः कक्ष्यानियतमङ्गिपदं तस्य ज्ञानत्वाभावात् । ज्ञानस्य चान्तः पदे प्राधान्यात् बहिः कक्ष्यात्यङ्गपदम् । ईश्वरस्य बहिः कक्ष्याङ्गिपदं तस्य क्रिया स्वभावात् । क्रियायाश्च बाह्यपदे प्राधान्यात् । तस्यान्तः कक्ष्यान्तः कक्ष्यात्वङ्गपदम् । अतो रेफसङ्कोचत्यागरूपस्य षकरस्येश्वरकलायास्तत्रा ङ्गत्वमेवेति विवेकः ।

सदाशिवकलाया अन्तः प्राधान्यमीश्वरकलायाः बहिः प्राधान्यमित्युक्तम् । इदानीं शक्त्याः कलायाः इच्छात्मिकायाः साम्येन तदुभयमूलतया बहिरन्तरपि प्राधान्यमिति प्रतिपादयति ।

इच्छा प पञ्चक व बिन्दुमयी हशक्ति-
र्ज्ञानक्रियासमपदं खलु सौभयात्मा ।
बिन्दौ समुन्मिषति सर्गपदे क्रमेण ।१७

संसृष्टरापरिसमाप्तिकयोर्विभाव्या ॥

पञ्चकत्वे बिन्दुमयी । वर्णपञ्चकात्मनः पवर्गस्य वकारस्य च यो बिन्दुत्वम् । गुणप्रधानोऽयं निर्देशः । संकोचत्याग इत्यर्थः । तन्मयीतत्स्वरूपा । हशक्तिः हकारप्रतिपाद्या शक्तिदशा । इच्छा इच्छा स्वभावा । सा इच्छाशक्तिः । ज्ञानक्रियासमपदं ज्ञानक्रिययोः साधारण्येन मूलपदम् । इच्छां विना विज्ञानमपि न प्रवर्तते क्रियापि न प्रवर्तते इति ज्ञानक्रिययोः इच्छैवान्तरं कूटस्य रूपम् । अत एव सा उभयात्मा उभयस्य बहिश्च प्राधान्यमेव नाङ्गत्वमिति भावः । इदानीं विसर्गपदे विद्यादिक्रमेण बिन्दून्मेषे प्रवृत्ते सत्यसौ बिन्दुन्मेषः क्रमप्रवृत्ति-शाली यत्सर्वमपि पदं व्याप्नोति तावद्विसर्गगन्धस्यानुवृत्तत्वाद्बिन्दुविसर्गयोः संसृष्टिरेव न बिन्दोरेकाधिपत्यमिति व्युत्पादयति बिन्दौ इत्यादि । सर्गपदे क्रमेण बिन्दौ समुन्निमषति इति । आपरिसमाप्तिः सर्वत्रपदे बिन्दुव्याप्तिनिष्पत्ति पर्यन्तम् । तयोबिन्दुविसर्गयोः संसृष्टिः । त्रिपुटीरूपे पदे क्वचित् बिन्दुन्मेषः क्वचिद्विसर्गस्फुरतेति संसृष्टिः । विभाव्या = ऊहनीया । अयमर्थः शुद्धविद्या प्रमातरि वेद्यानामिन्द्रियप्रकाशनिमज्जनेन वेद्यांश एव चिदुन्मेषः, इन्द्रियाणां प्रमातृपदे निमज्जनाभ्यासपाटववांभावादिन्द्रियादिकेषूत्तरपदेषु भेदस्याप्रशमा द्विसर्गस्य स्फुरत्तेति बिन्दुविसर्गसंसृष्टिः, ईश्वरदशायां शुद्धविद्योत्तरपदत्वात्प्रमेयेषु चिदुन्मेषः सिद्ध एव । विशेषस्तु स्वात्मीकृत स्वविषयाणां ज्ञानेन्द्रियाणामात्मरूपे प्रमातृभागे निमज्जनं तत्प्राधान्येन अपाटवमेवाप्रधानम् । अतस्तदाद्युत्तरपदे भेदस्फुरत्तेति विसर्गसंसृष्टिः सदाशिव दशायामीश्वरदशापर्यन्त चिदभेदोन्मेषः सिद्ध एव । विशेषस्तु स्वामीकृतज्ञेयानां ज्ञानकारणानां विश्वमयस्य च स्वात्मप्रमातृपदे निमज्जनम् तस्या अपि दशाया निराकुलचिद्विक्रमरूपेच्छा शक्तितत्त्वैकात्म्यं साविशेषमिति तदंशे भेदगन्धाद्विसर्गस्पर्शः शक्तिदशायां तु विश्रमरूपत्वाद् परिच्छिन्नायामेव भेदसाम्राज्यमिति तात्पर्यम् । त विन्दून्मेषपदे विसर्गानुवृत्तितारतम्यविवेकशुद्धविद्यादितत्त्वानां प्रस्फुटज्ञानकारणमिति तस्य तत्कर्तव्यत्वेन चोदना ।

शुद्धविद्यासु बहिर्बहिर्दशायामन्तरर्दशा नान्तर्भवति तदन्तरन्तर्दशायां तु बहिर्बहिर्दशायान्तर्भवतीति व्युत्पादयति -

पूर्वत्र नैवहि परो नियतः परत्र ।
पूर्वो भवेन्नियत एव शषादिवृन्दे ।
एकत्र संविदुदयेऽप्यपरत्र भास-
स्तस्या इतीदमथवा सममेव बिन्दुः ॥१७

शषादिवृन्दे शषादिप्रतिपाद्ये शुद्धविद्याविवृन्दे । पूर्वत्र शुद्धविद्यादौ पूर्वदशायाम् । परः परदशा । नैवहि नियतः । न नियता शुद्धविद्यायामीश्वरदशा न नियता ईश्वरदशायां च सदाविशदशा सदाशिवदशायां शक्तिदशा च तथेत्यर्थः । परत्र तु ईश्वरादिदशायां तु पूर्वः शुद्धविद्यादिदशानियत एव भवेत् । नियमेन भवेदेव । ईश्वरदशायां शुद्धविद्यादशाऽन्तर्तास्त्येव । सदाशिवदशायां चेश्वरदशा, शक्तिदशायां च सदाशिवेति योजना ।

इदानीं वैद्योपक्रमेण संविदुदये क्रमं विना वेद्यादिप्रतिपादकं सर्वमपि शषादिवृन्दं संविन्मयूखानां निराधारः (निर्वधिः) प्रसरणेन युगपदेव सङ्कोचति त्यजतीति पक्षान्तरमुपक्षिपति एकत्रेपि एकत्रवेद्यभागे । संविदुदये सति अपरत्रापि प्रमाणादिपदे सर्वत्रापि । तस्याः संविदो भास इति । भासः प्रवहतीति शेषः । इदं शषादिवृन्दं शषाद्यक्षरचतुष्टयमथवा पक्षान्तरेण । सममेव युगपदेव । बिन्दुः बिन्दुशब्देन त्यक्तसङ्कोचत्वं लक्ष्यते । त्यक्तसङ्कोचो भवतीति शेषः । अयमर्थः वैद्यपदोपक्रमेण बिन्दून्मेषे शुद्धविद्यादिदशानां कालविलम्बापेक्षः क्रमो न नियतः । क्वचित्प्रमातरि भाग्याधिके शक्तिपातस्य तीव्रतया शुद्धविद्यादि दशानां निर्विलम्बेन क्षणादाविर्भावो युगपदेव सम्भवति । क्वचित्तु क्रमापेक्षयाशनैः सम्भवतीति पक्षद्वयमत्रानुसन्धेयम् ।

इदानीं शकाराद्यक्षरचतुष्टयाधिष्ठातुरीश्वरस्य बह्वक्षरसन्निवेशति दशारयुग्मरूपे पशुजागरचक्रे कथं सन्निवेशौचित्यमित्याशङ्क्य तदुपपादयति ।

जाग्रच्छिवस्य पशुजागरयुक्तदेश
मन्तर्दशारमिह कोणगतं बहुत्वम् ।
भेदोदयोल्लसितमेतदभेदकोट्यां
प्राप्नोति संग्रहमिति प्रतिप्रदुहस्य ॥१८

शिवस्य जाग्रत् जाग्रदवस्था । पशुजागरयुक्तपशुजागरावस्थया युक्त

योगिनी । यतः श्लिष्टमित्यर्थः । तत् तस्मात्कारणादन्तरदशारं दशेन्द्रिय सन्निवेशपदं व्याप्यदशारम् । ऐशं ईश्वराधिष्ठातृकम् । इहेश्वराधिष्ठातृके दशारचक्रपदे भेदोदयोल्लसितं भेदविजृम्भरेण समुदश्चितम् । यत्कोणगतं बहुत्वं कोणबाहुल्यम् । एतदभेदकोट्या अभेदपक्षाविर्भावे संग्रहणम् । अभेद पदोचितं बाहुल्यत्यागं प्राप्नोतीति प्रतिपदाद्रहस्यं ज्ञानरहस्यम् । अयमर्थः विसर्गव्याप्तौ सकलभेदमुज्जम्भस्थले चतुर्विंशत्यक्षरात्मके स्पर्शकदम्बके पञ्चवर्गविभक्तं यत्पञ्चाङ्कं पदं चतुरस्रे दशार युग्मस्य चतुर्षु कोणपञ्चकेषु व्यवस्थिम् । पशुजागरशिवजागरे तु भेदसंक्षये सति चतुरस्रपदं पादिवर्णचतुष्टयं हकारत्वेन परिणमते । बहिर्दशारकोणपञ्चगतः कवर्गश्च हकारेऽन्तर्भवति । अवशिष्टकोणपञ्चकगतश्चवर्गः शकारत्वेन परिणति । अन्तर्दशायां कोणपञ्चगतष्ट वर्गः षकारत्वेन परिणमति । अवशिष्टकोणपञ्चकगतस्तवर्गः सकारत्वेन परिणमति । मकारो हकाररूपेण परिणामिनि पवर्गे च सम्बन्धमुपलभ्यंते । प्रमातृकक्षायां चं वक्ष्यमाणत्रिकोण बिम्बे सम्बन्धमुपलभत इति । विसर्गपदे बिन्द्वाविर्भावप्रक्रिया चतुरस्रदशायुग्मरूपं चक्रत्रयं कोणचतुष्ट्याकारेण परिणमति । विसर्गपदे बिन्दुपदे च वर्णानां कोणानां चोक्तरूपेण भवितव्यमिति ये मन्यन्ते ते भेदाभेददशयोरप्यविशेषं प्रतिपाद्यन्त इत्यलम् ।

इदानीं पक्षान्तराश्रयणेन इन्द्रियदेहात्मनि मज्जितप्रपञ्चानां शुद्धविद्येश्व सदाशिवानां पृथिवी (भूः) प्रकृतिमायान्ताश्चिन्मयीकृता विषया इत्युपकल्पयति ।

> यः पार्थिवे चिदुदयः स हि शुद्धविद्या ।
> यः प्राकृते स पुनरीश्वरता किलाऽण्डे ।
> यो मायिके स तु सदा शिवतेति शादे-
> स्त्रैरूप्यधीरतिरहस्यतमं गुरूणाम् ॥१९

बहिरिन्द्रियविषयरूपे पार्थिवाऽण्डे यश्चिदुदयः । चिदव्याप्तिः । स हि खलु बिन्दूदयः शुद्धविद्या । शुद्धविद्यायामिन्द्रयप्रकाशैरेकाकारीकृतप्रमेयत्व लक्षणात् । पार्थिवाऽण्डे प्रमातृस्थानीयः पवर्गः सम्बन्धवानेव त्रिपुट्यां नित्यं तत्सम्बन्धनियमात् । अतस्त्यक्तसङ्कोचे पर्थिवाऽण्डे चतुर्वर्णरूपस्य सर्वस्य शवर्गस्य सम्भवः । एवं चास्मिन्पक्षे शुद्धविद्याप्रमातृभेदसमोपक्रमपदत्वात्पशु

जाग्रच्च त्रिकोणबाहुल्ये सत्येव सन्निवेशोपपत्तिरिति च विसर्गरूपस्पर्शः शवर्गाकारेण परिणमदवस्था शुद्धविद्या प्रमातरि भेदशिरोदर्शनमुपलभन्त इति मुख्यावृत्यात्वमीश्वस्यैव शिवजाग्रत्पशुजाग्रच्चक्रमसंश्लेषः शुद्धविद्या (या) सत्वपरिणतविवेकानामङ्गीकाराय पाक्षिकस्तच्छ्लेष इत्यलम्। यः प्रकृतेऽण्डे चिदुदयः शवर्गाकारेण सङ्कोचत्यागः स पुनरीश्वरता किल । अत्रोपपत्तेः प्रतिभासमात्रगम्यत्वात् । किलेतत् साम्प्रदायिकमैतिह्यम् । अत्र पवर्गस्य शवर्गाकारेण सङ्कोचत्याग एवमूह्यः । मकारस्योष्ठ्यवर्गस्य संकोचत्यागः कण्ठचवर्णो हकार इति सुगमम्। पकारस्य प्रकृतिवर्णस्य हकारे चित्पदेऽन्तर्भावः। फकारादिवर्णत्रयस्य शकारादिवर्णत्रयत्वे युक्तिरुच्यते । फकारबकारमकारा जलाग्निवायवः शकारषकारसकाराश्च तथा, अतः फकारादिसङ्कोचे त्यागरूपत्वं शकारादीनां समानत्वप्रतिपादकत्वाच्छकारादीनां जलादिप्रतिपादकत्वम् । प्रागुक्तभूतवैपरीत्याभावविमर्शे स्फुटं फकारादीनां रूपमुच्यते । अल्पप्राणो वर्गप्रथमवर्णः अल्पवृत्तिश्चेतरभूतापेक्षया पृथिवी अतस्तत्प्रतिपादकः। महाप्राणो वर्गप्रथमवर्णः अल्पवृत्तिश्चेतरपेक्षया महावृत्तिश्च जलम्। अतस्तत्प्रतिपादकः। नादवान्वर्गस्तृतीयवर्णः । महाप्राणान्नादोऽधिवृत्तिः जलाधिकवर्तिवृत्तिश्चाग्निः, अतः स तत्प्रतिपादकः । नादवान्घोषवांश्च वर्गचतुर्थवर्णः केवलनाद (भवः नादः) वतो घोषवानधिकवृत्तिरग्नेरधिकवृत्तिश्च वायुः अतस्तत्प्रतिपादकः । उक्तसकलधर्मसंसृष्टिरूपपवर्गपञ्चमम् । अतः पृथिव्यादिभ्यश्चतुर्भ्योऽधिक वृत्तिराकाशः । अतः पञ्चमवर्ण आकाशप्रतिपादक इति । अतः फकारादि प्रतिपाद्यतत्त्वप्रतिपादकतया सङ्कोचत्यागरूपत्वाच्च शकारादयः फकारदिपरिणति रूपा इति लभ्यते । ईश्वरस्य विश्वमयप्रकृत्याभिमान लक्षणत्वात्यक्त सङ्कोचं प्रकृत्यण्डमीश्वरपदत्वप्रतिपादकतया सङ्कोचत्यागरूपत्वाच्च शकारादयः फकारादि परिणतिरूपा इति लभ्यते। ईश्वरस्य विश्वमयप्रकृत्याभिमान लक्षणत्वात्यक्तसङ्कोचं प्रकृत्यण्डीश्वरपदत्वमर्हतीत्यभिप्रायः। यो मायिकेऽण्डे चिदुदयः स तु सदाशिवता। मायिकाण्डस्य स्वप्रात्मप्रकाशप्रकाशपदत्वात्सदाशिवस्य विश्वात्मत्व लक्षणात्यक्त सङ्कोचो मायाण्डः सदाशिवपदमिति। शादेः शकारादिवर्ण चतुष्टयस्य। त्रैरूप्यधीः पृथिव्यण्डे प्रकृत्यण्डे मायाण्डे च सिद्धस्य त्रैरूपस्य

ऐकरूप्ये सत्येव स्थानकृतत्रैविध्यस्य यादिर्विवेकः । सादीतीह शुद्धविद्यादिदशा विवेकप्रस्तावे गुरूणां रहस्यतममिति रहस्यम् ।

इदानीं शवर्गे कवर्गस्य देहप्रतिपादककलाकारस्य शङ्कासङ्कोच त्यागरूप वर्णादर्शनात् । तद्दर्शनोपपत्तिमाह -

विन्दूद्वये विशति सर्ग इमं तथैव ।
सर्गोदये तमथ सोऽपि पदे तदन्तः ॥
कः स्याद्धकारहृदिलश्च वकारगर्भे
बाह्ये तु चित् प्रकृतिसर्गमुखे विभक्ता ॥२०

विन्दूदये विन्दुव्याप्तौ । इमं विन्दुम् । पूर्वमेतद्व्यापकसर्गो विशति । बिन्द्वादेकी भवतीत्यर्थः । पूर्वं बिन्दुगर्भादेव बहिर्विश्वस्त्रष्टा विसर्गः पुनस्तमेव विशतीत्यर्थः । तथैव सर्गोदये विसर्गव्याप्तौ तं विसर्गम् अथान्तरम् सोऽपि बिन्दुरपि विशतीत्यर्थः । अतस्तस्मात्कारणादन्तः पदे बिन्दुव्याप्तिस्थले कः जलादिभूतचतुष्टयप्रतिपादकेन फादिवर्णचतुष्टयेनातिगर्भः पृथिवीप्रतिपादकः ककारो हकारदिस्यात् । तत्रान्तर्गतो भवतीत्यर्थः । स्वप्नस्याप्यन्तरपदत्वात् तत्रापि विसर्गप्रमातुर्लकारस्य गर्भे स्थितिमाह लश्चवकारगर्भ इति लः लकारो वकारगर्भे च चकारात् हकारगर्भे च अन्तःस्थसंकोचत्यागरूपे शवर्गे च हकारगर्भे लकारान्तर्धानं भवतीत्यर्थः । विसर्गस्य बिन्दुसमावेशे तदेक रसत्वमेव । बिन्दो र्विसर्गसमावेशे विशेषमाह - बाह्येत्विति । बाह्ये विसर्गव्याप्तिस्थले तु चिद्बिन्दुः प्रकृतिसर्गमुखे प्रकृतिरूपस्य विसर्गस्य मुखे सम्मुखे तिष्ठन्नपि विभक्ता प्रकृतौ नान्तर्भवति अपितु विभक्तरूपेण दृश्यते । मकारो हि पकाररूपिण्ड्याः प्रकृतेश्च तत्समीपस्थितिसूचितस्याबहिर्मोक्षणस्य कर्तैव । तया नान्तर्धीयते न तत्रैक रसस्यात् स्वरूपहानिर्लभते । पृथिवीरूपस्य विसर्गबिन्दुना बहिर्विसृष्टस्य न बिन्द्वेकरसीकरणं पवर्गे बिन्दोर्दर्शनात् । अतो विसर्गव्याप्तौ न बिन्दुस्वरूपतो लोप इति भावः ।२१

अथ विसर्गस्य बिन्दुनिलयान्तः पदस्य चतुरङ्गत्वं विसर्गबिन्दो रनिलयनेन बाह्यपदस्य पञ्चाङ्गत्वमिति प्रागुक्तमपि प्रमेयं प्रस्फुटं प्रतिपत्तये पुनरुद्भासयति । -

अन्तःपदं भवति तच्चतुरङ्गमैक्या
च्चिच्चैत्ययोः करुणसीम्नयपि भावितैक्यम् ।
पञ्चाङ्गकं भवति बाह्यपदं प्रकृत्यां
चिद्वह्निगर्भकुहरादथ निर्गतायाम् ॥[२२]

तस्मात्कारणात् बिन्दौ विसर्गनियलनरूपाद्धेतोः । अन्तःपदं चतुरङ्गं भवति । कुत इत्याह चिच्चैत्ययोरैक्यात् चितश्चैत्येकरसीकरणसामर्थ्यसम्भवात् । किम्बिधमन्तः पदम् । करणसीम्यपि भावितैक्यं विसर्गप्रमातुः सर्वस्यापि पदस्योपलक्षणेन निन्मज्जनेन बहिर्भासमाने करणत्रयपदेऽपि विभावितचिदैक्यम् । विसर्गपदस्य कवर्गहकारमज्जनेन उपलक्षणेन करणत्रयस्थानीयचवर्गटवर्गतवर्ग सङ्कोचत्यागरूपाणां शषसानां हकारे निमज्जनमेवेति विभाव्यमित्यर्थः । तेषां यद्वहिः स्फुरणेन सि (शु) द्धविद्यादिस्वरूपविवेचनं तत्हकारनिमज्जनेन सत्येवेति वेदितव्यम् । ततश्चाभेदरूपं चित्पदमेकाङ्गमेव शषज्ञानां हकारनिमज्जनेनादर्शनेन शुद्धविद्यात्वरूपं न विज्ञायते इति तद्विज्ञानाय हकारान्तर्गतानामेव तेषां बहिरवभासनमिति वेदितव्यम् । अथ विसर्गस्पन्दे चिद्वह्निगर्भकुहरात्प्राकृत्यर्थो विनिर्गतायाम् । कारणत्रयेण सहत्यध्याहार्यम् । बाह्यपदं पञ्चाङ्गकं भवति । चैत्यस्य चित्पदं विना स्वरूपासिद्धेस्तत्रालुप्तेन चित्पदेन सहेत्यर्थः ।

इदानीं शक्तिरूपस्य हकारस्य स्वरूपं विविच्यव्युत्पादन्नेतदुत्तरपदस्य लकारक्षकाररूपकूटाक्षरप्रतिपाद्यस्य शिवतत्त्वस्य स्वरूपमवबोधयति ।

ज्ञानक्रियोन्मुखहकारभयाद्वयेच्छ
र्विश्रान्तिरन्तरबहिन्मुखविश्रमात्मा ॥
कुटाक्षरात्मतनुरेष शिवः सुषुप्ति-
र्विश्रान्तिरेव सविकल्पकलाल्पगन्धा ॥[२३]

ज्ञानक्रियोन्मुखहकारमयाद्वेच्छाविश्रान्तिः सदाशिवेश्वरात्मकयोर्ज्ञान क्रिययोर्विषये उन्मुखा । तदाधिष्ठातृत्वादित्यर्थः । हकारमयऽद्वयेच्छाहकार स्वरूपाभेदेच्छा । हकारप्रतिपाद्यत्वे हकारस्वरूपत्वाभेदेच्छायामाचरितम् । सैवेच्छाविश्रान्तिस्वरूपाद्विश्रान्तिरूपत्वाद्विश्रान्तिः । अयमर्थः येयमपरिच्छन्नज्ञान क्रियात्मकसदाशिवे स्वरूपज्ञानक्रियाकरणाधिष्ठात्री ज्ञानक्रिययोः कूटस्थत्व

लक्षणेन तदधिष्ठातृत्वेनेच्छाव्यपदेशविषया ज्ञानक्रियाकूटस्थत्वस्यैवेच्छा लक्षणत्वादिच्छा स्वरूपिणी शक्तितत्त्वमित्यागमिकैरूद्धाष्यमाणा द्वैतस्पृष्टिरिह तकारप्रतिपाद्या महाविश्रान्तिः । सैवान्तः पदे अबहिर्मुखविश्रमात्मप्रपञ्चानभिमुखा विश्रान्तिरूपा । कविकल्पकलाल्पगन्धा । सुषुप्तिविश्रान्तिरेव स्वरूपानुभवमात्र विकल्पयुक्ता सुषुप्तिरेव । कूटाक्षरात्मतनुर्लकारक्षकारोभयैक्यरूपकूटाक्षरात्मक निजस्वरूपः । तत्प्रतिपाद्य इत्यर्थः । एष अपरोक्षानुभवगोचरः । शिवः शिवतत्त्वम् । भवतीति शेषः । जाग्रत्येव सम्भवन्ति सोमादिसाधनताभ्यास वशात् स्वतः प्रवृत्ता वा काचित्सुषुप्तिविश्रवान्तर्मुखी चेच्छिवतत्त्वं भवति । सैव बहिर्मुखीचेच्छक्तितत्त्वं भवतीति विवेकः ।

अथान्तर्मुखजाग्रत्सुषुप्तिविश्रान्तिरूपस्य शिवस्य जडसुषुप्तिविश्रान्ति रूपायाः स्वप्रतिमाद्याः शक्तेरिव जगत्कारणत्वेन तत्त्वजगद्बीजस्थित्यौचित्यमिति तदवस्थानं कूटक्षररूपेण विभाव्यमानं व्युत्पादयन्ति -

नास्त्यस्ति वेत्युदितसंशयजाग्रतीह
सुप्तौ --- शिवे भवति । (जः ग्र जगदभेदरूपम्)
ज्ञानक्रियात्मकतया प्रतिरूपभिन्न
मेवं चतुर्विधमधिश्रितबीजमात्रम् ।।२४

नास्त्यस्तित्वे त्युदितसंशयजाग्रति नास्त्यस्ति वेत्युद्भूतसंशयः जाग्रत्यत्र ही ह सुप्तौ अस्ति वा नास्ति वेति संशयगोचरेण निर्देशितायां सुषुप्तावित्यर्थः । शिवे तादृक्सुषुप्ति स्वरूपे शिवे । अभेदरूपमपि अथेत्येवं भिन्नमेव सम्भूय चतुर्विधं जगत् अधिश्रितबीजमात्रं बीजमात्रेणाधिश्रितं भवतीति शेषः । अयमर्थः स्वप्नरूपेऽन्तः पदे भेदज्ञानरूपं, जाग्रदरूपे बहिःपदे भेदक्रियारूपं, तथैव स्वप्नरूपेऽन्तर्पदे अभेदज्ञानरूपं, जाग्रद्रूपे बहिः पदे भेदक्रियारूपमिति संग्रहेण जगच्चतुर्विधम् । तदेव शिवतत्त्वे कूटाक्षररूपेण बीजमात्रं तिष्ठतीति व्युत्पादितम् ।

इदानीं लकारसकारककारषकाररूपवर्णचतुष्टये कादिस्पर्शकूटाक्षरस्य चतुर्विधजगद्बजसंसृष्टिरूपत्वं व्युत्पादयति -

ज्ञानं द्वयाद्वयमयं लसकारूपं
तादृक् च कर्मकषकारमयं विदुस्तत् ।
श्लिष्टं पुरः स्फुरितसद्वयकोटिलक्ष
रूपं परस्परगतं च समं च कूटम् ॥२५

द्वयाद्वयमयं भेदाभेदात्मकं ज्ञानं लसकाररूपम् , भेदज्ञानपदान्तःस्थवर्गे प्रकृतिप्रत्तिपादको यो लकारस्तस्यैव तत्पदधिष्ठातृत्वात्तत्पदस्य ज्ञानपदत्वात् ज्ञानप्रमातृत्वं मनः प्रतिपादकस्य लकारस्य तद्व्याप्यत्वाभिमानदोषान्न ज्ञातृतोपपत्तिः तन्मूलरूपस्य वकारस्य च तथा ज्ञेयस्थानीयस्य यकारस्य च ज्ञातृत्वं नाशङ्कनीयम् । ज्ञेयवर्गस्य गन्धादेः सर्वत्र पृथिव्याद्यङ्गत्वात् प्रकृत्याकार पृथिवी रूपस्य लकारस्यान्तः पदे क्रिया प्रमातृशङ्का न समुचिता । अतो लकारस्य ज्ञातृत्वं निश्चितम् । शवर्गपदे अभेदज्ञानत्वं सदाशिवात्मनः सकारस्य निर्विवादम् । तादृग्द्वयाद्वयमयं कर्म च कषकाररूपं ककारषकाररूपं भेदप्रक्रियापदे स्पर्शस्थले टवर्गस्यकवर्गव्याप्तत्वाभिमानदोषान्नकर्तृत्वम् । अपि तु कवर्गाधिष्ठातुः ककारस्य अभेदक्रियापदे शवर्गे (ट)वर्गे ईश्वरात्मनिष्ठाकारस्य कर्तृत्वं स्फुटम् । तदेतच्चतुष्कमिदम् । श्लिष्टभेदज्ञानेन लकारेणाभेदज्ञानं सकारः भेदक्रियया ककारेणाभेदक्रियया षकारः । भेदाभेदयोरन्योन्यश्लिष्टता स्वभावात् । श्लेषे च पुरः स्फुरितसद्वयकोटिप्रमाया बालादिति भावः । श्लिष्टयोरक्षरद्विक्योः सदव्यकोटिपरः स्फुरणे कीदृग्रूपमित्यताह लक्षणरूपमिति । लकारसकारयोः श्लेषभेदरूपस्य लकारस्य पुरःस्फुरणे ल इति वर्णः स्यात् । ज्ञाने ज्ञानमेकरसी भवतीति सकारस्य लकारे सामरस्यात्सकारयोगम्भावितोच्छून भावो लकारो ल इति श्रूयते । ककारषकारयोः श्लेषे कारस्य द्वैतरूपस्य पुरःस्फुरणे क्रियायां क्रिया न सामरस्यं लभत इति षकारःस्यात् । एतत्कूटं परस्परगतं क्रमात् परस्परेण व्याप्तम् । प्रथमं लकारेण सकारो व्याप्यते ।

एतत्संस्थानं भेदसंसारबीजम् । अनन्तसकारेण लकारः । आट् एतत्संस्थानमभेदसंसारबीजम् । क्रियापदे च प्रथमं ककारेण षकारो व्याप्यते । अनन्तरं षकारेण ककारः । एतत् संस्थानकृतं भेदबीजत्वं पूर्ववत् । समं च मध्यमपदे समव्याप्तिकत्वाभिनिष्पन्नं सत् भिदाभेदोभयविमिश्रेण बीजम् ।

भेदसंसारबीजभूतेन संस्थानेन दृश्यमानस्य कूटस्यैवं संस्थानप्रक्रिया गुरुमुखात् पराम्पर्यागतप्रतिभावद्भिरनुसन्धेया । शिवतत्त्वपुञ्जकस्य कूटस्यैकाक्षरव्यङ्गस्य शिवतत्त्वस्य न विश्रान्ति स्वरूपाभङ्ग इति वेदितव्यम् ।

इदानीं मकारादिक्षरकारान्तदशाक्षररूपस्य प्रमातृपदस्याष्टारत्रिकोण बिन्दुचक्रेषु सन्निवेशं व्युत्पादयति ।

ज्ञानात्मजागरसुषुप्त्यवधिमकारकूटा-
त्मको पशुशिवौ गुणकोणबिन्दोः ।
श्लिष्टौ वसादिचतुरस्त्रयुगान्वयोथ
नागाश्वरम्युदरगौ ननु सर्गबिन्दू ।।२६

ज्ञानात्मजागरसुषुप्त्यवधीज्ञानात्मनोर्जागस्य सुषुप्तेश्च अवधी । स्थानभूतौ। अवधिस्थाने तिष्ठन्तावित्यर्थः । ज्ञानजागरोऽन्तःस्थप्रतिपाद्यः स्वप्नः तस्यावधौ यकारप्रान्ते स्वप्नस्य प्रवृत्तिः प्रथमपदस्य जाग्रदाभिमुख्येन प्रवर्तमानत्वाद्वकारमारभ्य यकारे परिसमाप्तिः । तदनन्तरपदत्वान्मकारस्य स्वावदिस्थानत्वम् । ज्ञानसुषुप्तिः शकारवर्ग(र्ण)प्रतिपाद्यनिर्विभेदजाग्रत्स्वप्नं पदद्वयं तस्यावधौ हकारोत्तरभागे क्षकारः निवृत्तिरूपा या ज्ञानसुषुप्तिः सुषुप्त्यभि मुखं प्रवर्तमानत्वाच्चकारमारभ्य हकारे परिसमाप्तिः तदनन्तरपदत्वात् क्षकारस्य ज्ञानसुप्त्यवस्थानत्वम् ।

एवं ज्ञानजागरज्ञानसुषुप्त्यवधीमकारकूटात्मकौ मकारकूटाक्षरस्वरूपौ । पशुशिवौ गुणकोणबिन्दोः त्रिकोणबिन्दुचक्रयोः श्लिष्टौ । त्रिकोणगर्भे बिन्दुः बिन्दुगर्भः त्रिकोण इति जीवशिवयोरन्योन्यव्याप्तिस्वभावत्वाच्छ्लेषः । भेदस्त्रैगुण्यरूप इति त्रिगुणावच्छिन्नस्य भेदप्रमातुर्जीवस्य त्रिकोणरूपता अभेदस्त्वेकरूप इत्येभेदप्रमातुः शिवस्य त्रिगुणत्वोपलक्षणानिष्कोण बिन्दु स्वरूपता। ननु भेदप्रमातृत्वं प्रकृतेः पृथिव्या एवेति युज्यते तत्र भेदपदे जीवस्य प्रमेयत्वमिति प्राक्प्रतिपादितम् । तत्कथमत्र भेदप्रमातृत्वं जीवस्योच्यते । अभेदप्रतिसिंहासनारोहश्चाप्यत्रैवोच्यत इति चेदुच्यते । प्रमातृत्वस्य अनुसंधातृत्व लक्षत्वाचित्पद एव मुख्यवृत्यापपत्तिः । चैप्यपदेऽनुव्याप्तिमधिकृत्य गौण वृत्योपचार इति चैत्यप्रमातृत्वं जीवस्यैव फलसमये अभेदपदीये व्यवहारे तु

चैत्यस्यैवेति विवेकः । तिस्त्रिकोणबिन्दोः श्लिष्टौ जीवशिवौ । वशादिचतुरस्त्र युगान्वयोत्थाननागाश्रश्चशम्युदरगो वकारादयः शकारादयश्च वर्णावशादयः वशादिभियच्चतुरस्त्रयुगम् । वादिभिर्यान्तैश्चतुभिर्वर्णैकरेकं चतुरश्रयम् । शादिभि र्हान्तैश्चतुर्भिवर्णैरन्यच्चतुरश्रयम् । वादिभिर्यान्तैश्चतुभिर्वर्णैकरेकं चतुरश्रयम् । शादिभिर्हान्तैश्चतुभिर्वर्णैरन्यच्चतुरश्रयम् । तयोश्चतुराश्रयोन्वयः श्लेषः तेनोत्थमुद्भूतं यन्नागाश्रमष्टककोण तदेव रश्मयः रश्मिचक्रम् । क्षकारात्मनः शिवस्य शादिवर्ण निष्पन्नं चतुरस्त्रं रश्मिचक्रं मकारात्मनो जीवस्य वादिवर्णनिष्पन्नं चतुरश्रं रश्मिचक्रम् । तयोश्चक्रयोर्यथाक्रमन्तरगौ अधिष्ठातृत्वेन मध्यस्थितौ । सर्गविन्दुः । ननु विसर्गबिन्दुस्वरूपौ ननु । त्रिकोणात्मनो जीवस्य विसर्गरूपता बिन्दुचक्रात्मनः शिवस्य बिन्दुरूपतेति विवेकः ।

इदानीं क्षकारमकारात्मनोः शिवजीवयोर्ज्ञानक्रियासुषुप्त्योर्मध्यपदे ज्ञानक्रियाजागरयोर्मध्यपदे च यथाक्रमं सन्निवेशौचित्यं व्युत्पादयति । -

ज्ञानक्रियात्मकसुषुप्तिविबोधमध्य-
संस्थौ क्षामावुभयपक्षगबिन्दुसर्गौ ।
सव्यापकौ तदुभयस्य तदङ्गिभूतौ
जाग्रत्सुषुप्तिसमवायपदेऽनुषक्तौ ॥२७

ज्ञानक्रियात्मकसुषुप्तिबोधमध्यसंस्थौ । ज्ञानात्मिकासुषुप्तिरभेद जाग्रत्स्वप्न रूपा शवर्गप्रतिपाद्या, क्रियात्मिका भेदसुषुप्तिः स्वरेषु बिन्दुभाग प्रतिपाद्या । तयो सुषुप्त्योर्मध्ये क्षकारात्मनः शिवस्य संस्थानं ज्ञानात्मनो विबोधो जागरोऽन्तः स्पर्शप्रतिपाद्यो जागरः तयोर्मध्यभागे आकारत्मनः जीवस्य सन्निवेशः । ज्ञानविभेदसुषुप्तेरप्युपलक्षणम् । अभेदजाग्रत्स्वप्नसुषुप्तिज्ञानविबोधात्मिकायाः पूर्वकोटेः क्रियाविवेधरूपायाः उत्तरकोटिमध्ये जीवस्य सन्निवेश इति वेदितव्यम् ।

एवं निरूपितसन्निवेशस्थानौ क्षकारमकारात्मकौ शिवजीवौ । उभयपक्षग बिन्दुविसर्गौ ज्ञानक्रियासुषुप्तिलक्षणोभय पक्षगस्तद्व्यापकस्त दुभयाधिष्ठाता । बैन्दवः क्षकारः भेदसुषुप्तिसहितज्ञान जागरकेवलक्रिया जागरलक्षणोभय पक्षव्यापकस्तदधिष्ठाता विसर्गो मकारः । एवं सुषुप्तिरूपोभयपक्षबैन्दव सुषुप्तिसहितजागरूपोभयपदपक्षव्यापकौ । अत एव तदङ्गिभूतौ । निवृत्तिरूपाया

द्विविधायाः सुषुप्तेः प्रवृत्तरूपस्य भेदसुषुप्तिसहितस्य द्विविधस्य जागरस्याधिष्ठातृत्वसूचकेन मध्यसन्निवेशेन निवृत्तिप्रवृत्तिरूपयोः अभेदपदयोऽङ्गिभूतौ जाग्रत्स्वप्नसुषुप्ती समवायपदे जाग्रत्सुषुप्त्योर्यः समवायो मिश्रणं तत्पदे अन्तःस्थेदमवर्गयोः खलु जाग्रत्सुषुप्त्योः समस्तयोर्न तु व्यस्तयोः समवायः । अन्तःस्थपदे च जाग्रत्सुषुप्त्या समवायः ईषत्स्पृष्टताविषयत्वात् । ऊष्मपदे च जाग्रत्सुषुप्त्योः समवायः चच्छ्लेषाद्विवृताविषयत्वात् । अतो व्यापकवर्गादशाक्षररूपस्य स्पर्शदशयोर्व्यापकाः । अत एव तस्य व्यापकवर्गसंज्ञा । तत्र मध्यपदे पक्षद्वयव्यापकयोः शिवजीवयोर्मध्यपदोचितयोस्सन्निवशः सोपपत्तिक इति विवेकः ।

इदानीं दशारयुग्मचतुर्दशाख्यापकस्य अष्टारात्मनो मध्यचक्रस्य अधिष्ठातृत्वेन जीवशिवात्मकमकारक्षकारसामरस्येन सर्वचक्राधिष्ठातृभूताया मध्यचक्रलीलायास्त्रिपुरेश्वर्याः स्वरूपमिति व्युत्पादयति । -

सङ्कोचपूर्तिपरसीमपदोभयार्था
श्रीचक्रमध्यनिलया त्रिपुरेश्वरी सा ।
त्रेधा विसर्गपदमेकविधं पदं च ।
बिन्दोस्तुरीयमिति बाहुचतुष्टयाढ्या ।।२८

सङ्कोचपूर्तिपरसीमपदोभयार्था सङ्कोचस्य सङ्कोचभावस्य पूर्तेः पूर्णभावस्य इत्यपरसीमा परं परमावधिस्थानम् । जाग्रदात्मकदशारयुग्मरूपं सुषुप्त्यात्मकं चतुर्दशाररूपं च तदुभयोभयार्था श्रीचक्रमध्यनिलया प्रमेयप्रमाणप्रमातृलक्षणपुरत्रयात्मनः श्रीचक्रस्य मध्यं स्वप्नात्मकमष्टाररूपप्रमातृपुरम् । तदेव निलयः सन्निवेशस्थानं यस्या सा त्रिपुरेश्वरी । अनेन मकारक्षकारयोरष्टाराधिष्ठातृत्वादुभयसमरस्यमेव त्रिपुरेश्वरीस्वरूपमिति प्रतिबोधितः । अथ त्रिपुरेश्वर्याः सुषुप्तिस्वप्नजागरतुर्यलक्षणसकलचक्रार्थस्वरूपिण्या दशाचतुष्टयमवाङ्गचतुष्टयमिति तद्विभागमाह - चेधेत्यादि । त्रिधा त्रिविधम् । विसर्गपदं भेदपदम् । भेदस्य तु सुषुप्तिभेदस्वप्नमेवजागरूपम् । बिन्दोरेकविधं पदं तुर्यरूपम् । अत्र च यद्यपि अभेदजाग्रत्स्वप्नसुषुप्तिरूपेणत्रयविध्यं सम्भवति । तथापि तस्य त्रैविध्यस्य भेदप्रतियोगित्वोपाधिवशात् । स्फुरता न तु पारमार्थ्येनेति तुर्यस्याभेद

पदस्यैकविध्यमेवेति । बाहुचतुष्टयाढ्या इत्युक्तदशाचतुष्टोपलक्षणेन बाहुचतुष्टयेन आढ्याया: सम्पन्नाया: त्रिपुरेश्वर्या: साम्प्रदायिको योऽयं बाहुचतुष्टयसंकेत: सोऽयं दशा चतुष्टयाङ्गत्वोपलक्षणं न तु पारमार्थिक इति सद्गुरुकटाक्षक्षयित सर्वसंशयस्य भाग्यवतो जीवनस्य एकवेद्यं महारहस्यमिति साम्प्रदायिकप्रवाद: । तथैवमेव बाहुचतुष्टयसङ्केतमायुधचतुष्टयसङ्केतेन सह प्रस्फुटं व्युत्पादयति ।

सोषुप्तजाग्रद्वहि: पदजागरेषु
तोयक्षमानिलयमेष्व कलात्मशक्त्या ।
आत्ते चवर्गयमयस्वगुणेक्षुचाप-
पुष्पेषु पाशनिगृतचित्तत्रिबाहु: ॥२९

सौषुप्तं सुषुप्ति: । जाग्रज्जागर: । अवहि: पदजागरस्वप्न । सुषुप्तिजाग्रत्स्वप्नेषु तोयक्षमाऽनिलयेषु जलपृथिवीवायुरूपेषु । सुषुप्तिर्जडवत्वात् जलरूपा, जाग्रत्सङ्कोचरूपत्वेनकठिनत्वात्पृथ्वीरूपयेति भव: । पृथिव्या एवातन्यन्तकठिनस्वरूपाया: परमचैत्यत्वात् । किंविधया शक्त्या । आत्तेचवर्गयमयस्वगुणेक्षा चापपुष्पेषुपाशनिगृहीतचिता सुषुप्तिजाग्रत्स्वप्नेषु क्रमेण आत्तै: परिगृहीतै: इकारचवर्गयकारमयै: स्वगुणै: स्वकीयधर्मै: भूतपञ्चकाधिष्ठानात् भूताया: पृथिव्या: शब्दादिपञ्चक खलु धर्मरूपम् । नियमेन तदाश्रितत्वात् एतैरेव शब्दादिभि: सुप्त्यादिदशात्रये प्राप्तौ लवप्यतारतम्यमयै: ।

अत एव सुषुप्तविक्षचारपमिति सङ्केतितै: । जलमयत्वेन मधुरत्वाच्च जीवस्त्ररूपावजकत्वाच्च जाग्रति प्रवृद्धभूतै: प्रस्फुटपञ्चरूपै: वशीकरणमात्र व्यापारवत्ताया कुसुमबाण इति संकेतितै: स्वप्ने किञ्चिदुच्छूनदशायां वायुरूप त्वाद्वात्यावद्भ्रमणव्यापारेण भेदाभेदभ्रान्तिजननेन पाश इति सङ्केतितै: एवं इकारचवर्गयकारमयै: प्रतिपाद्या: शब्दादय एव इक्षुचापपुष्पबाणपाशत्वेन सङ्केतिता: । तैरेवं भूतै: साधनै: निर्गृहीता बद्धा: आवृत्ता चित् जीवस्वरूपिणी चितिर्यया तया पृथिव्या शक्त्या । त्रिबाहु: बाहुत्रयवती, एवं चैत्यात्मिकया ।

एवं बन्धकं बाहुत्रयं तदायुधत्रयसहितं व्युत्पाद्य मोचकं चतुर्थं बाहुं तदायुधेन सहव्युत्पादयति ।

तुर्येऽग्धिाम्निहचिता ससृणिप्रणुन्न
चैत्यातिपश्विभजडत्वरूजैकबाहुः ।
एवं चतुर्भुजं विभाव्यचतुर्दशाऽङ्ग
क्ष्मात्माङ्गिनी जयति मध्यपदेऽतितुर्या ।।३०

अग्निधाम्नि अग्निस्वरूपे । चिद् व्याप्तिस्थानत्वादितिभावः । तुर्ये चतुर्दशायां परिशेष्यात्तुर्यमिति । तदा काशस्वरूपमिति वेदितव्यम् । हचिता । हकारप्रतिपाद्या चिता । ससृणीत्यदिसकाररूपेण सृणिना अङ्कुशेन प्रणननः चैत्यमेवाति पशुर्महापशुः । अत एव महापशुत्वत्वादिः, भो गज तस्य जडत्वम् । चिद् व्यतिरेकेण स्फुरणं तदेव रुक्रोगः यया तयेति हचिद्विशेषणमेतत् । यथा महापशुर्गजः खड्गाङ्कुशेन बाध्यते । चैत्यमपि तथा सकाररूपेण सदाशिवविमर्शेन बोध्यते । चिदेकरूपतां प्राप्तये इति सकारस्याङ्कुश संकेततोपपत्तिः । अभेदविमर्शः सकारो हकारात्मिकायाः संविभकत्या अङ्गत्वाद्धर्म इति तदायुधत्वं तस्य, एवं सकाराङ्कुकशभूता हसाकारशक्त्या । एकबहुः एकबाहुमती । एवं चतुर्भुजं विभाव्य । चतुर्दशाङ्का । चतुर्भुजविभाव्यानि चतस्रो दशा एवाङ्गानि यस्याः साक्ष्मात्तमाङ्गिनी । क्षकारमकारसंसृष्टिरूपा अङ्गिनी । क्षकारमकाराभ्यामेव दशाचतुष्टामधिष्ठितमिति । तदुभयसंसृष्टिरङ्गित्वं त्रिपुरेश्वर्याः प्रमाणस्वरूपतेति सम्यगुपपत्तिः । निर्विकल्पपदस्य तुरीयस्य माध्यमिकत्वेनाधिष्ठातृतया क्षकारो बीजभूतः । विकल्पपदस्य तुरीयस्य माध्यमिकत्वेनाधिष्ठातृतया क्षकारो बीजभूतः । विकल्पपदस्य सुषुप्तादिदशा त्रयात्मनो माध्यमिकत्वेन मकारो बीजभूतः ।. तदुभयसंसृष्टिरेव सर्वमूलत्वात्तुर्यातीत स्वभाव इति समुपदिशति । मध्यपदे तुर्येति । एतस्यैव पदस्य सर्वोत्कृष्टता जयतीति । शाब्देनोन्मीलिता । सुषुप्त्यादिभिः पञ्चभिर्दशाभिरङ्गैरूपलक्षित स्तात्सर्वमयादितदन्यो भवितुमर्हति । तत्कथं तुर्यातीतस्यास्याङ्गित्वमुक्तमित्यत्राह-

सुप्तिप्रभृत्युदितचैत्यविजृम्भितस्य
जाग्रत्पदप्रभृतिचिद्विनिमज्जनं यत् ।
तुर्यं पदं च खलु तत्र सुषुप्तिभागो ।
यश्चिन्मयः शिववपुस्तदतीव तुर्यम् ।।३१

सुषुप्तिदशामारभ्य । उदितस्य चैत्यविजृम्भितस्य जाग्रत्पदप्रभृति जाग्रत्पदमारभ्य यच्चिद्विनिमज्जनं चिन्मयतावभासः । तत्खलुतुर्यं पदम् । सुषुप्तिस्वप्नजाग्रत् क्रमेणोन्मीलितस्य भेदावभावस्य जाग्रत्स्वप्नसुषुप्तिक्रमेण योऽयमभेदावभासः तत्खल्वभेदावभाससंस्थानं तुर्यदशा । तस्यां दशायां यश्चिमयसुषुप्तिभागः जाग्रत्स्वप्नयोश्चिन्मयावभासानन्तरं सम्भाव्यमानश्चिन्मयी भूतसुषुप्तिरूपो विश्रमः । असौ खल्वतीवतुर्यं तुर्यावतीतस्वभावम् । शिववपुः शिवस्य शिरोरूपं वपुः । चिन्मयौ जाग्रत्स्वप्नौ शिवस्य जघन्यं वपुः, चिन्मयीसुषुप्तिरतीततुर्यमत्युत्तीर्णं तुरीयमिति व्यपदेशाङ्गीकारेण तुर्य एवान्तर्भावः । तेषां तुर्यातीतं नाम नान्यापृथग्दशा चिन्मयसुषुप्तेस्तुर्यातीतत्वसम्भावना विषयस्य तुर्य एवान्तर्भावात् । चतुस्तुर्यातीतस्वभावः सर्वदशासमवायरूपो न दशामात्रः किं तु सर्वदशाधिष्ठाता । एतन्मतानुसारेण क्षकारमकारः समवायः सर्वदशाधिष्ठातृ भूतस्य तुर्यातीत स्वभावात्मङ्गित्वमभिप्रायेणोक्तम् दशमात्रपरत्वेनेति पूर्वसूत्राभि प्रायः ।

नन्वेवं चाङ्गिपरत्वेनाभिमततस्यतुर्यातीतस्वभावस्य सर्वदशाङ्गसमवाय एव युक्तः स त्वेकदेशनियतक्षकारमकारसंसृष्टिसन्निवेशौचित्यमिति न मन्तव्यम् । यथा शरीरेण सर्वशरीरसमवायतोऽपि शरीरैकदेशे हृदयकमले सन्निवेशाङ्गी कारस्तथा सर्वदशासमवयात् एव तुर्यातीते स्वभावस्य क्षकारमकार संसृष्टिरूपमध्य चक्रसन्निवेसो युज्यत एवेति निरवद्यम् । येषां पुनर्मते तुर्यातीतं चिन्मयसुषुप्तिपरं पञ्चमी दशैव तेषां मते क्षकारमकारसंसृष्टिरपं पदं सर्वदशासमवेतं महातत्त्वमेव त्रिपुरेश्वरीप्राणपर्यायमिति व्यत्यययोगः । अतितुर्यं शिववपुरिति पूर्वसूत्रे सामान्योक्तं विशेषेण व्युत्पादयति -

तुर्यं द्विखण्डमभवस्य जघन्यभागो
मूर्धाऽतितुर्यमनयोरनुभूः क्षमध्यम् ॥
जाग्रच्छिराः स्वपनसुप्तिजघन्यभागो
मप्राणकः पशुरसौ विपरीतबोधः ॥[३२]

द्विखण्डं खण्डद्वयोपलक्षितम् । अभेदजाग्रत्स्वप्नरूपमिति भावः तुर्यम् । अभवस्य शिवस्य जघन्यभागः । अतितुर्यम् । अभेदसुषुप्तिरूपं तुर्यम् ।

तुर्यदशाभागः मूर्धा शिरः । अभवस्येति सम्बध्यते । शिवस्य निर्विकल्पप्रधानत्वात् विकल्पाप्राधान्याच्चेति भावः । अनयोरप्रधानप्रधानाङ्गयोरङ्गयोरक्षमध्यक्षकाररूपं मध्यम् । अनुभूः प्राणस्थानम् । जघन्यशिरोरूपयोरङ्गयोर्मध्यस्थाने कण्ठे खलु प्राणस्थितिरिति भावः । उभयाधिष्ठातृरुभयमध्यस्थितिरूपपन्नेति तात्पर्यम् ।

शिवप्रसङ्गेन जीवस्याप्यङ्गविवेकमाह जाग्रच्छिरो यस्य जाग्रच्छिराः । स्वप्नसुषुप्तिजघन्यभागः स्वप्नं स्वप्नः । स्वप्नसुषुप्ति जघन्यभागो यस्य असौ । विपरीतबोधः शिवाद्विपरीतज्ञानम् । पशः विकल्पप्राधान्यानिर्विकल्पाप्राधान्याच्च पशोः शिववैपरीत्यम् । एवं विधः पशुः 'म' प्राणकः । उभयाङ्गमध्यवर्ती यो मकारः स एव पशोः प्राणस्थानमिति पूर्ववद्विवेकः । भेदसंसारप्रवर्तिन्या प्रकृत्या यथा मकाररूपः पशुर्बन्धः, अभेदसंसारप्रवर्तिन्या प्रकृत्या तथा क्षकाररूपस्यापि शिवस्य बन्धः सम्भाव्यते । तत्कथं नियतबन्धं मकारक्षकार सामरस्यमुपास्यत्वेनाङ्गीकृतमित्यत्राह -

मात्मा पशुः प्रकृतिरेव तया निगीर्णो
हात्मापि चित्प्रकृतिरेव निवृत्तिरूपा ।
इत्थं द्विधा प्रकृतिविश्रमभूः क्षकारः
शम्भुः पर परत एव भवेत्प्रकृत्याः ।।३३

मात्मा मकारस्वरूपः पशुर्जीवः प्रकृतिरेव । तत्र हेतुमाह । तया निगीर्ण इति । प्रकृत्या ग्रस्तत्वात् । प्रकृत्युत्तीर्णस्तदुत्तीर्ण इति भावः । हात्मपि चित् । हकाररूपिणी चित् । निवृत्तरूपा प्रकृतिरेवतदनुषङ्गनैयत्यादित्यभि प्रायः । क्षकारस्तु इत्थं द्विधा प्रकृतिविश्वभूः इत्थमुक्तमर्यादया द्विधा । द्विरूपिण्याः प्रवृत्तिनिवृत्तिरूपिण्याः । प्रकृतेर्विश्वं स्थानं भूः । विश्वं = स्थानम् । शुद्धान्तर्मुखत्वेन संसारद्वयकलास्पृष्टत्वात् प्रकृत्यनावृतः किन्तु प्रकृतेः स्वयमावश्यकमित्यभिप्रायः । अत एव क्षकारः पर शम्भुः प्रकृत्याः परत एव । न तु तदन्तः पतितः । अतो नित्ययुक्तः क्षकारः अस्यैव यद्वही रूपं हकारः यच्चात्यन्तर्बही रूपं मकारः तयोरेव प्रकृतिपारतन्त्र्येण प्रकृतित्वं न तु क्षकारस्य अतस्तस्योपास्यत्वं युज्यते एवेति तात्पर्यम् ।

क्षकारस्य मकारप्रतियोगितया विकल्पगन्धो दुर्निवारः अशुद्धनिर्विकल्प

चित्सुषुप्तिपदेव परमतत्त्वम् । तदेवोपास्यमीति ये मन्यन्ते तदाक्षेपायाह-

यद्वा शिवः क्ष इह म प्रतियोगिभावात् ।
सौषुप्तमेव परशम्भु पदं चिदात्मा ॥
यच्चक्रमध्यपदता तदधीशता च ।
शम्भो(स्तदस्य)सदेश्यगुणगन्धितयार्च्यभावात् ॥[३४]

मप्रतियोगिभावात् मकारस्य जीवप्रतिपादकस्य प्रतियोगिभावात् अन्योऽन्यव्याप्यव्यापकभावसंसर्गात् । क्षकारः शिवः । न तु परमशिवः । विकल्पगन्धनैयत्यादिति भावः । चिदात्मा चिन्मयं सौषुप्तपदं सुषुप्तिरेव । परमशम्भुपदं परमशिवपदत्वम् । यद्वा । यद्वेति पक्षान्तरे । अस्मिन् पक्षे चित्सुषुप्तावपि विकल्पात्यन्तोच्छेदो दुष्प्रतिपादः । साधिते विकल्पात्यन्तोच्छेदे पर्यन्तं नो जडत्वं प्रसज्येत् । जडस्य च नोपास्यात्वम् । अतो विकल्पपदे वा गन्धपदे वा तत्त्वमुपास्यमिति क्षकारस्य चक्रमध अस्थित्य विभाव्येन चक्राधिष्ठातृत्वेनोपास्यत्वं स्फुटी भूतमिति समाधत्तेयच्चक्रमध्यपतेत्यादि । क्षकारस्य शम्भोश्चक्रमध्यपदता साम्प्रायिकी चक्रस्य मध्यप्रतिष्ठा चितप्रतिबोधिता तदधीशता । चक्रधीशता च तदेतदस्य शम्भोर्गुणगन्धितया हेतुना सिद्धिरेते (सिध्यति) अर्च्यभावात् अर्चनीयत्वात् । उपपाद्यत इति शेषः । गुणगन्धेना ऽर्चनीयो न तु निर्गुण इति प्रतिपत्तिरेव क्षकारस्य शम्भोश्चक्रमध्य स्थितिः साम्प्रदायिकीति समर्थयतीति विवेकः ।

अथ पुनः पुनरावर्तमानाभिर्दशाभिरेव तिथिभिः कालो व्यवस्थास्यते । तिथयश्च शुक्लपक्षे पञ्चदश कृष्णपक्षे च तावत्यः सम्भूय त्रिंशत्संख्यकाः पुनः पुनरावर्तन्ते । योगिदृष्टौ दशानामेव तिथिरूपतायां तिथिसमानसंख्यातादशानां साम्प्रदायिकोपदेशगम्यते तदेव प्रमेयमुपदिशति ।

चन्द्राग्निभुक्छशिभुगग्निरथः समस्वं
भानुः पदे पदमिदं त्रितयं स्वरादौ ।
खण्डत्रयात्मकमखण्डपदं च तद्वत्
तद्विश्रमः प्रतिदशं समसङ्ख्यतैषाम् ॥[३५]

सूत्रद्वयेन दशायां दशायां तथा तथा रूपः संसारः पञ्चभूतात्मनैवकलापेन

सम्पद्यते । तान्यपि भूतानि दशास्वभावान्येव । तथाहि जलतत्त्वात्मकश्चन्द्रः सुषुप्तिरूपः । वायुतत्त्वात्मकः सूर्यो जागद्रूपः । तेजस्तत्त्वात्मको बह्निस्वरूपः । पृथिवीतत्त्वात्मिका प्रकृतिगुणत्रयपर्यायस्तेजसः पर्यायस्तेजस्त्रयबीजभूता । तुर्यमाकाशतत्त्वात्मकः पुमान् सकलप्रपञ्चबीजरूपिण्याः प्रकृतेः विश्रान्तिस्थानं तुर्यातीतम् । यद्यपि सुप्त्यादौ कलानां बाहुल्यं विद्यते, तथापि ताः कलाः पञ्चस्वेवतत्वेष्वन्तर्भवति । इति प्रतिदशं पञ्चावाङ्गदशाः । सुषुप्तिसुषुप्तिजलम् । सुषुप्तिजाग्रद्वायुः सुषुप्तिस्वप्नो बहिः । सुषुप्तितुर्यपृथिवीसुषुप्तितुर्यातीतम् अवकाशः । इत्येवं जाग्रदादावप्यङ्गदशपञ्चविभागोऽवगन्तव्यः । एवं प्रकृतिरूपासु सुषुप्तिजाग्रत्स्वप्नेषु प्रतिदशं पञ्चाङ्गदशा गणनायां प्रवृत्तिरूपसंसारः पञ्चदशाङ्गवान्भवति । तान्येवाङ्गानि शुक्लपक्षस्य पञ्चतिथय इति विवेकः । अथ निवृत्तिसंसारे प्रवृत्तिसंसाराङ्गानां सर्वेषां निवृत्तिरूपतेति तत्र कृष्णपक्षस्य यास्तिथयः पञ्चदश भवन्ति । प्रवृत्तिसंसारे वेद्यमयस्य चन्द्रस्याभिवृद्धिरिति तत्संसारस्य शुक्लपक्षता । निवृत्तिसंसारे वेद्यस्य चन्द्रस्य क्षय इति कृष्णपक्षता तस्येति विवेकः । सूत्रयोरक्षरार्थस्तु अग्निभुगग्निव्यापकश्चन्द्रः । शशिभुक् चन्द्रव्यापकोऽग्निः । एवं चन्द्राग्नयोः स्वभावोऽग्निः । न तु सर्वासु दशास्वग्निना चन्द्रकबलेन शुक्लपक्षत्व हानिरिति । अथ समता अनयोश्चन्द्राग्नयोः समता । भानुः । स्वरादौ स्वरवर्णादौ पदे पद इदं त्रितयम् । संसारकलापत्वेन नियताभ्युपेयमितिशेषः । तद्वच्चन्द्रादिवत् । खण्डत्रयात्मकं चन्द्राग्निभानुरूप खण्डत्रयात्मकम् । चन्द्राद्याकारेण विलसनम् । अखण्डपदप्रवृत्तिपर्याय पृथिवीरूपम् । चन्द्रादयः खलु गुणत्रयमयाः प्रवृत्तिपर्यायपृथिवीविलासरूपा च इति विवेकः । अखण्डपदं गुणत्रयसमष्टिरूपत्वात्प्रकृतेरखण्डत्वम् । एतच्च पदं पदे चन्द्रादिपदवच्च संस्थानमिति एतद्वच्छब्दार्थः । तद्विश्रमश्च तस्य प्रकृतिरूपस्य विश्रमः विश्रान्तिस्थानम् । आकाशरूपम् । स्वात्मतत्त्वमित्यर्थः । एतदपि पदं प्रतिदशं नियतमिति । अङ्गदशापञ्चकनैयत्यदशानामुक्तम् । एषामङ्गानां दशासु नियतानां तिथिभिः समसंख्यता वेदितव्येति शेषः ।

भेदाविभेदसमतनुभिः सुषुप्ति
स्वप्नप्रजागरपदैस्त्रिगुणीकृताभिः ।

पृथ्वादिरेवान्ततिथिभिर्ननु शुक्लपक्षाः
कृष्णस्तु जागरपदातिकतन्निवृत्या ॥३६

भेदाविभेदसमतातनुभिः । क्रमेण भेदाभेदतदुभयसाम्यस्वरूपैः । सुषुप्ति स्वपन्जागरपदैः । त्रिगुणीकृताभिः पृथिव्यादिरेवान्ततिथिभिः पृथिव्याद्याकाशान्तङ्ग दशारूपाभिः । पञ्चभिस्तिथिभिः । त्रिगणनायां पञ्चदशभिः शुक्लपक्षो ननु । भवतीति शेषः । जागरपदातिकतन्निवृत्या अथ तुर्यदशायां जाग्रदादिप्रथममन्त्यातु निवृत्तिरासां तिथीनां निवृत्या निवृत्तिरूपाङ्गीकारेण । कृष्णः पक्षः तु शब्दो भेदे । एवं सिद्धसाम्प्रदायिककलाविवेकयोगदृप्तदृष्टेः पुरुषस्य कालपञ्चकत्वं सिध्यति एतत्प्रमेयोपदेशः ।

इदानीं महाप्रकृतिरूपपरात्मिकाया विमर्शशक्तेर्दशाविशेषरूपाणामङ्गानां नवसंख्याकत्वेन तस्याः प्रतिबिम्बं श्रीचक्रमपि नवचक्रसमयरूपमिति व्युत्पादयन्नाह -

देहात्मिका प्रकृतिरेव परा विमर्शः
सैव प्रवृत्तिनिवत्युभयादिभूता ॥
वागर्थमिश्रवपुरिन्दवनतार्यमत्र
य्येकैक युक्तिपुटिका नवभूतिरेका ॥३७

देहात्मिका देहरूपिणी अनेन त्रिपुरेश्वर्याः शरीरत्रयमेव मुख्यं रूपमितिव्युत्पादितम् । प्रकृतिरेव परावाग्रूपिणी स्वरसप्रहणलक्षमा । एवं प्रकृतिरिति परावागिति । व्यवधिष्ठाविमर्शः शक्तिः । शिवप्रवृत्तिनिवृत्युभयादि भूताः प्रवृत्तिसंसारस्य निवृत्तिसंसारस्य मिश्रसंसारस्य च कारणभूतः सर्वोऽपि संसारः प्रकृतिमूलः प्रकृतिरेव विलासरूपत्वादित्यर्थः । वागर्थमिश्रवपुः न तु केवलं परावाग्रूपत्वाच्छब्दरूपा हपि त्वर्थरूपा च मिश्ररूपा च सर्वव्याप्तिवस्तुनः शब्दमूलत्वाच्छब्देऽन्तर्भावात् एकरूपतां त्रिपुरेश्वरीम् । इन्द्रनलार्यमादि त्र्य्येकैकयुक्त्रिपुटिका त्रिपुटिकाप्रमेयप्रमाणप्रमातृसमुदायलक्षणा इन्द्रनलार्यम्णां त्रय्या एकैक्यं एकैक्यं प्रत्येकं युज्यते इत्येकैकम् । एवं प्रत्येकं प्रवृत्तिरूपेण चन्द्रेण निवृत्तिरूपेणानलेन उभयसाम्यरूपेणार्यम्णा सूर्येण युक्ता या त्रिपुटी प्रमेयादिपुरत्रयी तत्स्वरूपा सती तत्त्वत एकस्यापि विश्रान्तिदशायामद्वितीयापि

नवमूर्तिः नवसंख्याकस्वरूपभेदाः । अयमर्थः जडत्वात्प्रमेयरूपं चतुर्दशात्मकं सुषुप्तिपरं विसर्गप्राधान्यन्याद्बिन्दुप्राधान्यादुभय प्राधान्याच्च त्रिधा भिद्यते । प्रमाणरूपं दशाद्वयात्मकं जाग्रत्पुरमपि तथा । प्रमातृरूपम् । अष्टारात्मकं स्वप्नपुरमपि तथेति नवचक्रविवेकः । एतच्चक्रतत्तद्दशा रूपेण नवधाविलासं स्यात्सा त्रिपुरेश्वर्यां बिम्बं भवतीति हृद्गताभिप्रायः ।

एवं शिवस्य सगुणस्वरूपं प्रकृतिमेवोत्कृष्य उपास्यत्वम्भावनया नवचक्रेश्वरीं व्युत्पाद्य तस्याश्चैत्यत्वे प्रसिद्धे सम्भक्तिमुस्यत्वव्याहतिशङ्काखण्डत्वम् (कारणत्वम्) प्रवादमपवदन्नाह -

चैतन्यता च जडता च विमर्शचित्यो
स्तुत्या यदिन्मद्वनलयोरुभयं तदिच्छा ।
स्यात्कर्म चावगलितं तु मिथो जडत्वात्
ज्ञानं तयोः समपदं च तथा द्विरापम् ।।३८

भीतिरजडेति सम्प्रत्ययः विमर्शस्य चित्सामग्र्यं प्रतिपादयन् जडत्वमपवदति । विमर्शचित्योः विमर्शप्रकाशयोः चैतन्यता च जडता च तुल्या । उभयोरपि प्रत्येकं चैतन्यत्वं जडत्वं च भवतीति चमत्कारः । अयं चमत्कारोऽन्योन्यव्याप्तिनिबन्धः । व्यापकमेव चैतन्यं व्याप्यमेव जडमिति द्वयोरपि व्यापकत्वे व्याप्यत्वे च सति चिदचिद्भावचमत्कारो निर्विशेषणकर्तव्य इति भावः । उभावेतौ प्रकाशविर्मशौ इच्छाज्ञानक्रियावन्ताविति विमर्शस्याजडत्व प्रतिपादने हेतुमाह यद्यस्मात्कारणात् इन्द्वनलयोरुभयं द्वयम् । तदिच्छा तयोः प्रकाशविमर्शयोरिच्छा प्रकाशस्य कदाचिद्व्यापकत्वे अनल इच्छा भवति । कदाचित्व्याप्यत्वे इन्दुः । विमर्शस्यापि तथा । विमर्शस्येन्दुरेवेच्छेति नाशङ्कनीयम् । तस्य विमर्शस्य व्यापकदशायां तदिच्छाया इन्दोरग्निवैभवप्राप्तिरग्नितत्त्वमेव प्रकाशेच्छायाः, अग्नेरपि तदव्याप्येदन्तायामिन्दु जाड्यप्राप्तरिन्दुत्वमेव ।

एकं प्रकाशविमर्शव्यवहारपदे स्वरूपस्याऽलेन्दुद्वयस्याऽन्योन्यमेषित व्यपेच्छारूपेण प्रत्येकं जडजडत्वमुक्तामिथः कर्तृकार्यरूपं जडाजडत्वमाह - स्यादित्यादि । मिथः अवगिलितं व्याप्तं कर्त्रा खलु कर्म व्याप्यते ।

अतः परस्परमवगिलितं ग्रसितं कर्म च भवति भूतात्मकर्ता च

भवतीत्यर्थः । तयोः समपदम् । अन्योन्यविषयत्वात्तुल्यरूपं ज्ञानं च । तथा पूर्वपद द्विरूपम्। अन्योन्यं ज्ञाता च भवति ज्ञानं च भवतीत्यर्थः । एवमिन्द्रनलोविमर्शकाशयोरेषित व्यपेच्छा भावे कार्यकर्तृत्वभावे ज्ञातृज्ञेयभावे मिथो निर्विशेषे सति प्रकाशतत्त्वं जडमितिदुराग्रहे विवेकहीनतामापादयतीत्यर्थः ।

अथ खण्डत्रयात्मनो मातृका महामन्त्रस्य प्रतिलब्धमुभयपदार्थे न सदा वर्तनं भवेत् । खण्डानामन्योन्यमादिमध्यान्तत्वनिर्विशेषेऽन्यकार्यकारण भावचमत्कारश्चक्रकारता च भवतीति रहस्यमेद्व्युत्पादयति ।

पक्षद्वयेऽपि परिवृत्तिपशात्त्रयाणा
मिच्छादिकत्रितयता प्रतिधाम धाम्नाम् ।
षट्स्वत्रवृत्तिषु च कारणकार्यता स्याद्
बिन्दुद्वयोर्भमवयोः पफवर्णयोश्च ॥[३९]

त्रयाणां धाम्नाम् । पदानाम् । मन्त्रखण्डानामित्यर्थः । पक्षद्वयेऽपि । दक्षिणतो वामतश्चेत्यर्थः । परिवृत्तिवशात् आवर्तवशात् प्रतिधामं प्रतिपदम् इच्छादिकत्रितयता वामतश्चेत्यर्थः । परिवृत्तिवशात् आवर्तवशात् प्रतिधाम प्रतिपदमिच्छादिकत्रितयता इच्छात्वं क्रियात्वं च भवति । यस्य कस्य चिद्वाखण्डस्यादित्वाङ्गीकारे इच्छात्वं मध्यत्वाङ्गीकारे ज्ञानत्वमन्त्येत्वाङ्गीकारे क्रियात्वमिति विवेकः । अत्र खण्डत्रये उक्तमर्यादया षट्सुवृत्तिषु सर्वासु विन्दुक्षवर्णयोः (बिन्दुः) स्वरवर्गस्तस्य बिन्दोः क्षकारस्य च तथा मभवयोः ।

व्यापकवर्गसन्निवेशतो मकारस्य स्पर्शवर्गस्य तयोर्मकार बकारयोर्युगस्य स्पर्शवर्गस्य तयोरेव । पकारफकारयोर्युगलस्य स्वरवर्गस्थितस्य विसर्गस्य चान्योन्यं कार्यकारणभावो भवति । अयमर्थः । प्रतिखण्डं हृदयप्रदेशात्प्राण पदादावर्तोदयः संभाव्यः प्रतिखण्डं च हृदयप्रदेशे बिन्दुविसर्गौ स्वरवर्गोदये अन्तः इति बिन्दुविसर्गौ स्वरवर्गोदरे चतुरस्त्रचक्रसंनिविष्टाः प्रकृत्यहङ्कारबुद्धिमनः प्रतिपादकाः पकाफकारबकारमकाराः । तत्र विसर्गस्थानीयौ पकारफकारौ , बिन्दुस्थानीयौ बकारभकारौ व्यापकवर्गोदरे मकारक्षकारौ । विसर्गबिन्दुस्थानीयौ । विसर्गबिन्दुस्थाने एवं सति यदा सर्वेषु बिन्दुमुपक्रम्यप्रलोमावर्तेन व्यापकवर्गावगाहे क्षकारपर्यन्तनावर्तः तदानीं बिन्दुः कारणं क्षकारः कार्यम् । क्षकारमारभ्य

अनुलोमावर्तेन बिन्दुपर्यवसाने क्षकारः कारणं बिन्दुः कार्यम् । अथ स्वरोदरगतं विसर्गमारभ्य स्पर्शोदरगतपफवर्णरूपविसर्गान्तमनुलोमेनावर्ते विसर्गः कारणं पफरूपविसर्गः कार्यम् । पफरूपविसर्गमुपक्रम्य स्वरविसर्गान्तप्रतिलोमेनावर्ते पफविसर्गः कारणं स्वरस्थविसर्गः कार्यम् । अथ स्पर्शोदरगतं बभवर्णरूपं बिन्दुमुपक्रम्यानुलोमेन व्यापकवर्गोदरस्थमकाररूपबिन्दुपर्यन्तमावर्ते बभरूपविन्दुः कारणं मकारबिन्दुः कार्यम् । मकारबिन्दुमारभ्य प्रतिलोमेन बभरूपबिन्दुपर्यन्तमावर्ते मकारबिन्दुः कारणं बभरूपबिन्दुः कार्यमिति तद्विवेकः ।

अत्र बिन्दुक्षकारयोर्बिन्दुत्वं शुद्धविसर्गपफवर्णयुगलस्य विसर्गत्वं शुद्धं बभवर्णयुग्ममकारयोः साङ्कर्येण बिन्दुत्वं विसर्गत्वं चेति साम्प्रदायिकोपदेशः प्रमेयप्रमाणप्रमातृखण्डेषु यस्य कस्यचिद्वा मूलत्वाभ्युपगम सिद्धान्तः सिद्धैकरनुभवानुरोधेनापि कृतः अनुभवश्चैवं हि घटादिस्फुरणे चक्षरादिप्रमाणस्फुरणं चक्षुष्मत्प्रमातृस्फुरणं चाविभाव्यः क्रममनुभूयते । तत्र कश्चित् घटस्फुरणं प्रधानतया मन्यते कश्चिदिन्द्रियस्फुरणं प्रधानम् । कश्चित् प्रमातृस्फुरणमिति तत्पुरुषप्रतिभाव्यवस्थामिति सिद्धान्तत्रये विप्रतिषेधविषये सति सिद्धसिद्धान्तः प्रकाशविमर्शचमत्कारभूतषु घटादिस्फुरणे सिद्धान्तत्रयसमष्टिरेव संतिष्ठतीति ।

चतुरस्रगर्भितदशारविन्यासवतो जाग्रदात्मनः स्पर्शखण्डस्य पशुदशा शङ्कया प्राधान्येन यजनविवेकिजनस्य उपेक्षा विषये वा स्यादिति अस्यैव खण्डस्य प्रधानयजनौचित्यं साम्प्रदायिकमिति सूत्रचतुष्टयेन व्युत्पादयति

चन्द्राग्निविश्रमणयोः स्वरयादिधाम्नोः
विश्वस्य बीजदशयोः प्रथमे पदे चित् ।
चित्ये निमज्जति परत्र चितौ तु चैत्य
मेतत्समस्तमुभयोल्लसिते तु भानौ ॥४०

चन्द्राग्निविश्रमणयोः स्वयादिधाम्नोः स्वरवर्गव्यापकवर्गात्मनोः पदयोः चन्द्रस्य विसर्गस्य विश्रमणं विश्रान्तिस्थानत्वं स्वरवर्गपदे अग्नेः बिन्दोः विश्रमणं व्यापकवर्गपदे स्वरवर्गे चिन्निगरणेन चैत्यैकच्छत्रतेति भावः । विश्वस्य बीजदशयोः चैत्यविश्रमचिद्विश्रमयोः प्रत्येकं विश्वबीजत्वं विमर्शयत्वेन प्रकाशमयत्वेन चानुभवात् । प्रथमे पदे स्वरपदे । चित् चित्ये निमज्जयति । चितो दर्शनं

नास्तीत्यर्थः । परत्रव्यापकवर्गे तु चैत्यं चिता निमज्जति । चैत्यस्य दर्शनं नास्तीत्यर्थः । उभयोल्लसिते चिच्चैत्ययोरुल्लसिते उल्लासरूपे भानौ तु स्पर्शखण्डे तु एवं एतत् चिच्चैत्ययुगलं समस्तमन्योन्यनिगीर्णस्वरूपम् । चिच्चैत्यरूपमुभयमपि तत्त्वं संभूय दर्शनपदे भवति । शिवशक्त्योरुभयोरपि दर्शनस्थानत्वाद्भानुरूपं जाग्रच्चक्रमेव प्राधान्येन यजनीयमिति विवेकः । चतुर्दशारचक्रे गर्भितचित्स्वरूपं यच्चैत्यम् । अष्टारगर्भितचैत्यस्वरूपा या चित् एवमेतच्चक्रक्ष्याधिष्ठातृभूतं देवतायुगलं दशारद्वयाधिष्ठातृभूते चतुरस्रचक्रे सम्मिलितम् । अत एवास्य चक्रस्य चतुरश्र भाव इति व्युत्पादयति ।

इन्दौ च हव्यमुजिचोदरसीम्नि यतस्या-
च्चक्रद्वयं चिदचिदभ्यवर्दनरूपम् ।
बिम्बद्वयीयुगलमेतदशीतिमानो-
र्बिम्बस्थले हि चतुरस्रतया समस्तम् ।।४१

इन्दौ । च । चतुर्दशारचक्रे । हव्यभुजि । च । अष्टारचक्रे । प्रतिचक्रम् । उदरसीम्नि । बिम्बस्तरश्मिचक्रमध्ये बिम्बचक्रस्यौचित्यम् । यच्चक्रद्वयं स्यात्प्रतिपादचक्रं मन्दरे चक्रद्वयं भवतीत्यर्थः । चतुर्दशोदरे अष्टदलषोडशदलरूपं चिच्चैत्यरूपं चक्रद्वयम् । अष्टारोदरे त्रिकोण बिन्दुरूपं चैत्यचिदात्मकं चक्रद्वयम् । कीदृशं चक्रद्वयम् , चिदचिदभ्यवमर्दरूपम् । चिदचितोश्चिच्चैत्योरभ्यवमर्दः अन्योन्यक्रमणं तद्रूपं तदवस्थम् । चतुर्दशारे षोडशदलात्मना चैत्यचक्रेण अष्टदलात्मकचिच्चक्रणम् । अत एवाष्टदलस्य षोडशदलरश्मिरूपेण तद्बहिरव स्थानम् । अष्टारे बिन्द्वात्मना चिच्चक्रेण त्रिकोणात्मना चैत्यचक्रमणम् । अत एव त्रिकोणस्य बिन्दूरश्मिरूपेण बहिरवस्थानम् । एवं व्यवस्थिमेतद् बिम्बद्वयीयुगलम् । अष्टदलषोडशदलात्मकं त्रिकोणबिन्द्वात्मकं च युगलं सम्भूय चतूरूपम् । अशीतिभानोः । सूर्यबिम्बस्थले दशारद्वयोदरे चतुरश्रतया चतुरस्ररूपेण समस्तं सम्भूयस्थितम् । अष्टादलषोडशदलत्रिकोणबिन्दुरूपं चक्रचतुष्टयं चतुरश्चचतुष्कोणरूपेण स्थितम् । अतश्चतुरस्रं प्राधान्येन यष्टव्यमिति निष्कर्षः । शम् ।

पादटिप्पणी

१.मा.च.वि.१/२१पृ.

२.सौन्दर्यलहरी ०६

३.भा.४ .४

४.भा.४/६

५.भारती ४/८

६.भा.४/१०

७.भा.४/१३

८.भा.४/१४

९.भा.४/१५

१०.भा.४/१६

११.भा.४/१७

१२.भा. ४/१८

१३.भा.४/१९

१४.भा.५/४

१५.भा.५/४

१६.भा.५/५

१७.भा.५/६

१८.भा.५/७

१९.भा.५/८

२०.भा.५/९

२१.भा.५/१०

२२.भा.५/११

२३.भा.५/१२

२४.भा.५/१३

२५.भा.५/१४

२६. भा.५/१५

२७.भा.५/१६
२८.भा.५/१७
२९.भा.५/१८
३०.भा.५/१९
३१.भा.५/२०
३२.भा.५/२१
३३.भा.५/२२
३४.भा.५/२३
३५.भा.५/२४
३६.भा.५/२५
३७.भा. ५/२६
३८.भा.५/२७
३९.भा.५/२८
४०.भा.५/२९
४१.भा.५/३०

सप्तमोऽध्यायः

वर्णोत्पत्तिविमर्शः

सप्तमोऽध्यायः

वर्णोत्पत्तिविमर्शः

यदा वक्तारः किञ्चिद् वक्तुमिच्छन्ति तदा आत्मा बुद्ध्यादिक्रमेण सुषुम्नारन्ध्रनिर्गताः वर्णाः कण्ठादिकरणैः क्रमादाविर्भवन्ति । प्रोक्तञ्च -

आत्माबुद्ध्या समेत्यर्थान् मनोयुङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ।
प्रातस्सवनयोगं तं छन्दो गायत्रमाश्रितम् ॥
कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् ।
सोदीर्णो मूर्ध्न्यभिहितो वक्त्रमापद्यमारूतः ।
वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ॥[1]

एवं हि तन्त्रागमशास्त्रोपदिष्टाः माहेश्वरसूत्रप्रोक्ताश्च पञ्चाशत्, एकपञ्चाशत्, द्विपञ्चाशत् वा वर्णाः क्रमशः समुत्पद्यन्ते । ते सर्वेऽपि वर्णाः सूर्याग्निरूपाः वर्णिताः ।

वर्णानां लिङ्गानि, देवाः, स्वरूपाणि फलानि च

माहेश्वरसूत्रप्रोक्ता हि वर्णाः चराचरशक्तिसम्पन्नाः समग्रदेवमूर्तयः को तत्त्ववेत्ता इति न वेति । तन्त्रशास्त्रे व्याकरणे वेदे च सर्वमेव वर्णानां तन्मूलकशब्दानामेव चमत्कार उज्जृम्भते । अतः को वर्णः कस्य देवस्य स्वरूपभूतः तेषां हि कीदृशः आकारः, वर्णानां कीदृशः वर्णः, किञ्च तस्य मन्त्राक्षरबीजभूतस्य फलमिति सर्वं सोत्साहं जिज्ञास्यं भवति । एतदेव सर्वं तत्त्वं नाना तन्त्रागमग्रन्थेषु सम्यङ् निरूपितम् । तदनुसृत्य स्वकीयग्रन्थेऽस्मिन् तत्त्वं निरूप्यते मया ।

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च ।
अहमेवाक्षयः कालो धाताऽहं विश्वतोमुखः ॥[2]

माहेश्वरसूत्राणां आद्यक्षरः अकारः अहमेवास्मि । गीतसंगीत उच्चारणनिरूपणं कोषादिनियमेषु च सर्वत्र प्रायशः अ ध्वनिरूल्लसति । अतः उक्तम् -

अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः ।
आद्यमन्तेन संयोगादहमित्येव जायते ॥[3]

एतेन अकारः पुल्लिङ्गः, देवः शिवः कृष्णश्च, वर्णस्य रक्तत्वम् , फलञ्च

सर्ववशीकरणत्वमुक्तम् । बातुलशुद्धाख्यतन्त्रे -

अकार: सर्वदेवत्वं रक्तं वर्णवशीकरम् ।[४]

एतदेवतत्त्वम् **अ इ उ ण्** [५] इत्यादि सूत्रेषु अकारस्य सर्वस्यादौ संयोजने भगवतो महेश्वरस्येष्टमिति । अकारस्यैव दीर्घरूप आकार:। स च स्त्रीलिङ्ग: अत: भगवतो माया शक्ते: पराया: स्वरूपभूत:, तस्या: देवता मायाशक्ति:, शुक्लवर्ण: सर्वेषां जीवानां कृष्णमिव आकर्षणपरं फलं कथितम् । अ इ उ ण् सूत्रे अकारोत्तरं इकारो ह्रस्व: सन् पुल्लिङ्ग:, विष्णुरस्य देवता, वर्णश्याम:, फलमस्य रक्षणम् । तान्त्रिकेषु इयं सृष्टि: परमशिवस्य चितिशक्त्या वा परिणामभूतेति । सृष्टिरूपेण परिणमतेऽपि महेश्वरे वैकृत्यं नोपपद्यते । उक्तञ्च -

या सा शक्तिर्जद्धातु: कथिता समव्यापिनी ।[६]

ई वर्ण: माया शक्ति: प्रधान: स्त्रीलिङ्ग: वर्ण: पीत: फलानाञ्च स्त्रीणां वशीकरणम् । कङ्कालमालिनीतन्त्रे भैरवभैरवीसंवादे षोडश स्वरवर्णानां तत्तद्देवता नामानि कथितानि ।

विद्युद् जिह्वाकरालस्या गर्जिनी धूम्रभैरवी ।
कालरात्रि: विदारी च महारौद्री भयङ्करी ।।[७]

ह्रस्व: उकार: पुल्लिङ्ग: । वास्तुपतिर्देव: कृष्णवर्ण: राज्ञ:वशीकरणं फलम् । ऊ: व्यापक: सगुणै: ईश्वर: भवति । उक्तञ्च -

अकारो ज्ञप्तिमात्रं स्याद् इकारश्चित्कला मता ।
उकारो विष्णुरित्याहुर्व्यापकत्वान्महेश्वर: ।।[८]

दीर्घ: ऊकार: स्त्रीलिङ्ग: देवतास्य भू: स्वरूपं कृष्ण:, सर्वलोकवशीकरणं फलम् ।

ऋ ऌ क् [९]

इत्यत्र ऋकारो नपुंसक: ब्रह्मदेवता, रङ्ग: पीत: फलञ्चास्य दुर्ग्रह फलनाशनं स्वभाव: । दीर्घ ॠकार: नपुंसकलिङ्ग: ब्रह्मदेवता रङ्ग: कृष्ण: ज्वरनाशश्च फलम् । ऌ ॡ वर्णौ नपुंसकलिङ्गौ अश्वनीकुमारौ देवौ, पीतवर्णौ फले ज्वरहारकौ । यदा प्राणवायो: कुम्भकविधिना स्थितिर्भवति तदा सुषुम्रा नार्यां ऋ ॠ ऌ ॡ इति वर्णा: नपुंसका: साधकानामभीष्टं साधयन्ति । शारदातिलकग्रन्थे उक्तम् -

पिङ्गलायां स्थिता ह्रस्वा इडायां सङ्गता परे ।
सुषुम्नामध्यमाज्ञेयाश्चत्वारो ये नपुंसका: ।।[१०]

एवञ्च मातृकावर्णभेदेभ्य एव सर्वे मन्त्रा: समुत्पन्ना: सन्ति । ते च मन्त्रा: सोमसूर्यानिलात्मका: शिवशक्तिमयाश्च । अत्र उपासकानां कृते मन्त्रे पुन्नपुंसकस्यादिकल्पना कृता -

चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणा ।
उपासकानां कार्यार्थं ब्रह्मणो रूप कल्पना ।।
रूपस्थानां देवतानां पुंस्त्र्यङ्गादि कल्पना ।।[११]

ए ओ ङ् [१२]

एकार: पुल्लिङ्ग: । बीरभद्रो देव:, पीतवर्णात्मक:, सर्वार्थसिद्धिद: फलम् । ओकार: पुल्लिङ्ग: ईश्वरो देव: । प्रकाशवर्ण: फलञ्च सर्वफलसाधकम् । अत्र सूत्रे अकारेकाराभ्यां अकारोकाराभ्यां निष्पन्नप्रणव रूपेणैकारौकारेण सगुणनिर्गुणयोरैक्ये बोधिते तेनैव सिद्धान्तेन सर्वत्रैक्य बुद्धौ द्वैतनिरासो ध्वनित: । उक्तञ्च -

एओङ् माहेश्वरात्मैक्यविज्ञानं सर्ववस्तुषु ।
साक्षित्वात् सर्वभूतानां स एक इति निश्चितम् ।।[१३]

ऐ औ च् [१४]

अस्मिन् सूत्रे ऐकार: स्त्रीलिङ: , वाग्भवो देवता, शुभ्रोवर्ण:, ज्ञानसिद्धि: फलम् । औकार: स्त्रीलिङ्ग: आदिशक्तिर्देवता, शुक्लो वर्ण: सर्वार्थसिद्धिद: फलम् , इदतत्त्वम् - अकार इकार योगस्यैव एकारतत्त्वम् अकार उकार योगस्यैव ओकारत्वमुक्तम् । पूर्वसूत्रगत एव । आ ए आ ओ इत्याविर्भावो ऐ औ भवत: । स: प्रज्ञानात्मा माया संवलित: । उक्तञ्च ईश्वर विमर्शिन्याम् अकारेकारोकाराणां ह्रस्व दीर्घाणां संयोगात् सर्वसम्भूतिरिष्यते इति । अत्र ह्रस्वदीर्घप्रभेदात् चतुर्दशस्वराणामेव संकीर्तनं चतुर्दशभुवनचतुर्दशचक्र, चतुर्दशप्रकाराणामिति निष्कर्ष: । मन्त्रतत्त्वप्रकाशिनी ग्रन्थे यथा -

तव मन्त्रं महेशानि मम रूपं त्वमेव हि ।
चतुर्दशात्मकं चक्रं स्वचक्रमितीरितम् ।।
त्रयोदशात्मकं तुर्यमावयोर्मन्त्रमम्बिके ।
उच्छूनकाले विन्द्वात्मा तस्मादक्षरसम्भव: ।।

सानुस्वारसविसर्ग अकारस्य निरूपणम्

अंकारः पुल्लिङ्गः महेशो देवता रक्तवर्णः सुखप्रदश्च फलम् । अः स्त्रीलिङ्गः, कालरूद्रो देवता, रक्तवर्णः, पाशनिष्कृन्तनं फलम् । व्यञ्जनानामपि स्त्रीलिङ्गः पुल्लिङ्गः , नपुंसकलिङ्गश्च भेदेन तत्तद् रङ्गदेवता फलानि संगच्छन्ते । यथा ककारः पुल्लिङ्गः पीतवर्णः प्राजापत्योदेवता पुष्टिकरं फलम् । खकारस्य स्त्रीलिङ्गः गङ्गादेवता, शुभ्रवर्णः सर्वपापनाशनं फलम् । संक्षेपेणात्रप्रतिपाद्यन्ते यथा - क ग च ज ट ड त द प ब ष ह इति द्वादशसंख्यकाः पुल्लिङ्गाः, पीतवर्णाः, प्राजापत्यो देवताः, फलानि पुष्टिकराणि । ख घ छ झ ठ ढ थ ध फ भ श स एताश्च सर्वाः स्त्रीलिङ्गाः, गङ्गादेवता, शुभ्रवर्णाः, सर्वपापनाशकराणि फलानि ।

य र ल व ञ म ङ ण न म इत्यादिशेषाः वर्णाः नपुंसकाः । ते सर्वे क्रमशः श्वेतपीतरक्तवर्णात्मकाः भवन्ति । उक्तञ्च -

यादीनां दशवर्णानां कलाधर्मप्रदा इमाः ।
अभयेष्टकराध्येयाः श्वेतपीतारुणाः क्रमात् ॥[१५]

ईश्वरप्रत्यभिज्ञाविमर्शिनी व्याख्यानुसारेण यथा वर्णानां देवाः भवन्ति तथैव समेषां वर्णानां अधिष्ठातृदेव्यः अपि सन्ति । माहेश्वरसूत्रगतवर्णानां अष्टवर्गाः तथा अष्टौ अधिष्ठातृस्वामिन्यः वर्तन्ते ।

वर्गाः	अधिष्ठातृदेव्यः
१. कवर्गः	ब्राह्मी
२. चवर्गः	माहेश्वरी
३. टवर्गः	कौमारी
४. तवर्गः	वैष्णवी
५. पवर्गः	वाराही
६. यवर्गः	ऐन्द्री
७. शवर्गः	चामुण्डा
८. अवर्गः	महालक्ष्मीः

तथाहि -

सर्वो ममायं विभवः इत्येवं परिजानतः ।
विश्वात्मनो विकल्पानां प्रसरेऽपि महेशता ॥[१६]

किञ्च चितिरेव भगवती विश्वात्मनात् संसारवामाचारत्वात् वामेश्वरी सती खेचरी गोरची दिक्चरी भूचरीरूपैः अन्तः करणस्वभावैः परिस्फुरन्ति । अपरञ्च -

आत्माशून्यः इह ज्ञेयः शिवधर्मैः विना कृतः ।
शिवः शून्योऽधिगन्तव्यो विमलोऽमूर्त विग्रहः ॥[१७]

इति सम्यग् विज्ञाय मन्त्रदेवतयोरनुष्ठाने प्रवर्तितव्यम् । एषां वर्णानां लिङ्गज्ञानं अनुष्ठानेष्वश्यं ध्यातव्यमिति आगमसिद्धान्तः । वर्णानां लिङ्गदेवतारङ्गफलानि च विचार्यैव तत्तन्मन्त्राक्षरघटितदेवतानामाराधनेन तत्तद् फलं लभन्ते । कामधेनुतन्त्रे उक्तम् -वर्णमातृकायाः प्रत्येकं च वर्णस्याद्भुतं माहात्म्यं वर्णितम् । वर्णरहस्यमज्ञात्वा यो जपति ,अनुष्ठीयते च तस्य सर्वं निष्फलं भवति । उक्तञ्च -कामधेनुतन्त्रम्

अज्ञात्वामन्त्रतत्त्वानि महाविद्यां जपेत्तु यः ।
सर्वं तस्य वृथादेवी किं तस्य जप पूजनैः ॥
ध्यानावधारणे चैव तथा योगसमाधिना ।
वर्णज्ञानं यदा नास्ति किं तस्य जपपूजनैः ॥

तन्त्रागमसिद्धान्ते वर्णाः एव सर्वतत्त्वाधारभूताः सारभूताश्च निरूप्यन्ते । तथा हि -कामधेनुतन्त्रे -

मम काण्ठे स्थितं बीजं पञ्चाशतवर्णमद्भुतम् ।
नाना वर्णयुतं शुद्धं तन्त्राणां सारमुत्तमम् ॥

प्रत्येके हि व्यञ्जनवर्णाः सोमसूर्याग्निरूपाः यतो हि 'नहि पुनरन्तरेणाचं व्यञ्जनस्योच्चारणमपि भवति [१८]' महाभाष्यवचनात् शिवशक्तिमयत्वाच्च व्यञ्जनानां स्वरमूलकत्वं ज्ञेयम् । तस्मादेव शब्दार्थमूला सृष्टिरुदेति । तदुक्तं शारदातिलके-

विना स्वैरस्तु नान्येषां जायते व्यक्तिरञ्जसा ।
शिवशक्तिमयान् प्राहुस्तस्मात् वर्णान् मनीषिणः ॥[१९]

अकारादि क्षकारान्तवर्णसमुदायस्य मातृकेति संज्ञा संगच्छते । इयमेववर्णमातृका वर्णसमुदायो वर्णमाला वा संज्ञा अपि संबोध्या भवति । आदौ परे सूक्ष्मे शिवतत्त्वे शक्तेः सम्मेलनेन विन्दुरुत्पद्यते । विन्दोः नादः । नादाच्छक्तिः । शक्तेः शब्दः शब्दाद् वागुत्पद्यते । वाग्भावात् कलाः । कलाभ्यो विकलाः विकलाभ्यो मन्त्राः उत्पद्यन्ते । मन्त्रो वाचको भवति ।

मननत्राणधर्माणो हि मन्त्राः अक्षरमयाः । अक्षराणि च देवमयानि इति वातुलशुद्धाख्यतन्त्रे उक्तम् ।

एकैकमक्षरं पुंसा महापातकनाशनम् ।[२०]

अत्र विन्दुरेव तत्त्वं पराभिधा शक्त्या व्यवह्रियते । नाद एव आदिरिति पदेन शक्तिरेवात्र इच्छा पदेन शब्द एव ज्ञान पदेन व्यवह्रिता भवन्ति । उक्तश्च -

विन्दुरूपा पराशक्तिर्नादश्चैवादिरीरितः ।
शक्तिरिच्छेति विज्ञेया शब्दश्च ज्ञानमीरितः ।[२१]

वाग्भव एव क्रिया शक्तिरितिपदेन कला वै षोडशस्वररूपेण, षोडश स्वराश्च प्रकृतिविकृतिभ्यां अ आ इ ई उ ऊ इत्यादिरूपेण विलसन्तः षोडशत्वमुपच्छन्ति । उक्तश्च -

वाग्भवः स्यात् क्रियाशक्तिः कला वै षोडशस्वराः ।
प्रकृतिः सप्तवर्णाश्च विकृतिस्तु नवार्णकः ।।[२२]

ननु कला नाम का ? इति प्रश्ने उत्तरयति

कला मात्रा स्वरा जीवाः प्रकृतिर्विकृतिस्था ।
प्राणात्मानौ च देही च कलापर्यायवाचकाः ।।[२३]

एवञ्च पञ्चभूतेषु स्वराणां विभागं दर्शयति ।

अ आ इ इति त्रय आकाशबीजम् ।
ई उ ऊ इति त्रयो वायुबीजम् ।
ऋ ॠ ऌ इति त्रय अग्निबीजम् ।
ए ऐ ओ इति त्रयो जलरूपम् ।
औ अं अः इति त्रयः पृथिवी बीजम् ।[२४]

इत्युच्यन्ते ।

स्वराणां प्रकृतयो ह्रस्वरूपाणि बीजानि कथ्यन्ते ।
विकृतयो दीर्घरूपाश्च मूर्तिपदेनाभिधीयन्ते ।

एवञ्च एकमात्रो वर्णो ह्रस्वः द्विमात्रश्च दीर्घः त्रिमात्रस्तु प्लुतः । व्यञ्जनञ्चार्धमात्रकमित्याहुरिति ।

इदं तत्त्वम् - अल्प्रत्याहारघटितचतुर्दशसूत्र समुदाये अकारहकारयोः आरोहावरोहक्रमेणोपक्रम उपसंहारौ भवतः । अतः अन्तः उन्मेषः सदाशिवतत्त्वपदेन बहिरुन्मेषश्च ईश्वरपदेन व्यवह्रियते । यतो हि षट्त्रिंशत्

तत्त्वात्मकं हि तन्त्रागमशास्त्रम्। उन्मेषस्योदयः शक्तिशिवाभ्यां युगबद्धरूपेणैव भवति। अतोऽयं शुद्धः इति। अतः शिवशक्तिस्वरूपमुजृम्भितं भवति। अ इ उ णित्यादिचतुर्दशसूत्रैरवधेयम्। यथा - ईश्वरप्रत्यभिज्ञाविमर्शे -

ईश्वरो बहिरुन्मेषो निमिषोन्तः सदाशिवः।
समानाधिकरण्यश्च सद् विद्याहमिदं धियोः।
सर्वथा त्वन्तरालीनानन्ततत्वौघनिर्भरः।
शिवश्चिदानन्दघनः परमाक्षर विग्रहः।

एवं हि सकलजगदात्मनि सन्निवेश्य अहं रूपेण पुनः इदं रूपेणोत्पादयति। विश्वात्मा शिवः। अतोऽक्षररूपोऽयं माहेश्वरसूत्रं व्याकरणस्योपजीव्यभूतं वर्णसमाम्नायः शिवैव। उक्तञ्च -सूतसंहितायाम्

न शिवेन विना शक्तिर्न शक्तिरहितः शिवः।

वर्णोत्पत्तिविषये इदमवधेयं यत् वर्णानां सृष्टिः सृज्धातोः कर्मणि क्तिन् प्रत्यये जाते सति सृष्टिपदं निष्पद्यते। इदं जगत् हि वाङ्मयं परा पश्यन्ती मध्यमा वैखरी च। प्रोक्तञ्च -परमलघुमञ्जूषायाम्

परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।
हृदिस्थामध्यमाज्ञेया वैखरी कण्ठदेशगा॥
वैखर्या हि कृतो नादः परश्रवणगोचरः।
मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते॥

वस्तुतः वैयाकरणानां राद्धान्ते शब्दः नित्यः, स नोत्पद्यते अपि तु प्रकटितो भवति। शब्दब्रह्मैव एतल्लक्षणम् उत्पादविनाशरहितत्वे सति अक्षरत्वे सति शब्दत्वम् शब्दब्रह्मलक्षणम्। उक्तञ्च वाक्यपदीये ब्रह्मकाण्डे

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥

वैयाकरणाश्च मध्यमानादव्यङ्ग्यः स्फोटब्रह्मैव स्वीकुर्वन्ति। उक्तञ्च -वाक्यपदीये -

यदेकं प्रक्रियाभेदै बहुधा प्रविभज्यते।
तद् व्याकरणमागम्यं परं ब्रह्माधिगम्यते॥

इति शम्।

पादटिप्पणी

१. पाणिनीयशिक्षा६,७,८,९,
२. गीतायाम् १०/३३
३. नन्दिकेश्वरकाशिका ४
४. बातुलशुद्धाख्यतन्त्रम्
५. शिवसूत्रम् १
६. मातृकाचक्रविवेक:
७. कङ्कालमालिनीतन्त्रे
८. नन्दिकेश्वरकाशिका ९
९. शिवसूत्रम् २
१०. शारदातिलकतन्त्रे
११. शारदातिलकग्रन्थे
१२. शिवसूत्रम् ३
१३. नन्दिकेश्वरकाशिका १३
१४. शिवसूत्रम् ४
१५. शारदातिलकम्
१६.ईश्वरप्रत्यभिज्ञा
१७. उच्चैरुदात्तसूत्रे भाष्ये
१८.तन्त्रालोक:
१९. शारदातिलके
२०. वाल्मीकिरामायणे
२१. वातुलशुद्धाख्यतन्त्रे
२२.वातुलशुद्धाख्यतन्त्रे
२३. वातुलशुद्धाख्यतन्त्रम्
२४. वातुलशुद्धाख्यतन्त्रम् २/२९-३०

अष्टमोऽध्यायः

वर्णानां शिवशक्तिस्वरूपपर्यालोचनम्

अष्टमोऽध्यायः

वर्णानां शिवशक्तिस्वरूपपर्यालोचनम्

शीङ् स्वप्ने[1] अदादिगणस्थात् धातोः औणादिक क्वनिप् प्रत्यये निपातनात् ह्रस्वे जाते शिवशब्दः निष्पद्यते। शेते जगत् अस्मिन् इति शिव इति व्युत्पत्तिः। शक्तिशब्दस्यापि शक्लृ शक्तौ[2] स्वादिः शक्धातोः[3] स्त्रियां क्तिन् इति क्तिन्प्रत्यये जाते सति शक्तिशब्दः सिद्ध्यति। व्युत्पत्तिश्च शक्नोति सर्वं कर्तुं शक्यते यया शक्त्या सा शक्तिः। वर्णानां शिवशक्तिमयत्ववर्ण पर्यालोचनायाम् अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः इतीमे स्वराः निर्दिष्टाः। कु चु टु तु पु एते उदितः। यणोऽन्तस्थाः शल् ऊष्माणः वर्गाः उक्ताः। उक्तेन तथ्येन लक्ष्यौ उक्तौ एतन्मते षोडशस्वराः पञ्चविंशति स्पर्शाः। चत्वारो अन्तस्थाः, चत्वारो ऊष्माणः, दुःस्पृष्टळकारः। कूटस्थः क्षकारः इति संकलनया एकपञ्चाशद् वर्णः निर्दिष्टाः सन्ति तन्त्रालोकग्रन्थे।

अकाराज्जात आकारः इकाराद् ई इति स्मृतः।
उकाराद् स्यात् ऊकारश्च ऋकाराच्च नपुंसकम्॥
एकारैस्वरश्चैव ओकार औकार एव च।
अंकारश्च अनुस्वारः अः विसर्ग इति स्मृतः॥[4]

एकदा क्षीरसागरे अनन्तशेषशय्यायां विराजते भगवति विष्णौ देवाः स्व स्तुतिभिस्तं तोषिताः प्रसन्नो हरिः दुःखनिवेदनाय देवान् आदिदेश। तदा अजो भगवान् चन्द्रमौलीश्वरश्च -

स्वस्मिन् प्रसीद विश्वेश के वयं केन भाविताः।
किं मूला किं क्रिया सर्वमस्मभ्यं वक्तुमर्हसि॥[5]

इति पृष्टवन्तौ प्रश्नस्योत्तरं ददता भगवता उक्तं यद् -

इति पृष्टं परं ज्योतिरुवाच प्रमिताक्षरम्।
यूयमक्षरसम्भूताः सृष्टिस्थिति अन्तहेतवः॥
तैरेवविकृतिं यातास्तेषु वो जायते लयः॥[6] इति।

प्रमिताक्षरेषु श्रीविष्णुश्चराचरात्मकस्य जगतः कारकत्वेन अक्षराणीति प्रोक्तवानिति। प्रमिताक्षरं परावाग् इत्युक्तम्। एवं हि अक्षरभूतमेव चराचरमिति

प्रतिपादयन्

मूलार्णमर्णविकृती विकृतेर्विकृतीरपि ।
तत्प्रतिभिन्नानि मन्त्राणि प्रयोगांश्च पृथग्विधान् ।।
वैदिकस्तान्त्रिकांश्चापि सर्वानित्यमुवाच ह ।
प्रकृतिः पुरुषश्चैव नित्यो कालश्च सत्तम् ।।
अणोरणीयसी स्थूलात् स्थूलाव्याप्तचराचरम् ।
आदित्येन्दु अग्नितेजो मद् यद् यत् तत्तद् मयीविभुः[७] ।।

वेदेषु शिवो रूद्रशब्देन प्रायः उपस्थापितो विधत्ते । यथा -

इमा रूद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः।
यथा समसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्नानातुरम् [८]।

किमधिकं ऋग्वेदस्य सप्तममण्डले स्वतन्त्रमेव रूद्रसूक्तं विद्यते । एवं हि ऋग्वेदे यजुर्वेदे च रूद्रस्य विविधानि रूपाणि प्रदर्शितानि । तत्रत्य आलोडनविमर्शादिभिरिदं परिज्ञायते यत् सान्द्रेषु मेघेषु चपलायमानायाः सौदामिन्याः सार्द्धमेव आमन्दमेघनिर्घोषो महावृष्टिश्च प्रकृतेर्यत्तत्त्वं तदेव रूद्रपदेनाभिधीयते इति । रूद्रशब्दस्य कोऽर्थः तस्य निष्पत्तिं व्युत्पत्तिश्च प्रतिपादयन् निरूप्यते इरित् संज्ञक रूदिर् अश्रुविमोचने[९] (अदादिः) रोदिति अशुविमोचनं करोति इति रूद्रः । रुद्धातोः[१०] औणादिक रक्प्रत्यये कृते सति रूद्रशब्दस्य निष्पत्तिर्भवति । रोदनादिति रुद्रः इति च व्युत्पत्तिः । अपरा प्रक्रिया रूधिर आवरणे इत्यस्माद्धातोः सम्पदादित्वात् भावे क्विपि सति सर्वापहारिलोपे स्त्रीत्वविवक्षायां रोधनं रूद् तां रूधम् इति । राति = ददाति इति रूद्रः । योऽरोदीति तत् रूद्रस्य रूद्रत्वमिति श्रुत्युक्तिः ।

अजैक पादहिर्वुध्न्योविरूपाक्षः सुरेश्वरः ।
अयन्तो बहुरूपाश्च त्रयम्बकोऽप्यपराजितः ।।
वैवश्वतश्च सावित्रो हरो रूद्रा इति स्मृताः ।।[११]

रूद्रस्य विशिष्टमस्त्रं धनुरस्ति । अनेन धनुषा ये बाणाः परिचाल्यन्ते ते मनुष्यैः सहैव पशूनामपि संहारकाः भवन्ति । इमे च बाणाः अमोघाः अतस्तेषां सन्निपाते न केषामपि प्राणाः रक्ष्यन्ते रूद्रस्य गोघ्नः, नृघ्नः ,

क्षयद्वीरः, प्रभृतीनि नामानि संहारकत्वेनैव सार्थकानि भवन्ति । इति ऋग्वेदसंहितायामुक्तम् । अथर्ववेदे शैवधर्मस्वरूपं निरूपयन् उच्यते प्रलयकारित्वेन रूद्रो बहुधा वर्णितो विद्यते तस्य शिरो विषयुक्तमस्ति । येन च व्याधयो न वर्द्धन्ते सर्वे हि जीवलोकाः तस्मात् विभ्यति । उक्तञ्च -

रूद्रजलाषभेषजनीलशिखण्डकर्मकृत ।
प्राशं प्रतिप्राशो जहि अरसान् कृणु ओषधे ।।[१२]

अयमाशयः - हे रूद्र यस्य पार्श्वे सन्त्योषधयः यस्य शिखा नीलवर्णा अस्ति , यतो हि कर्माणि सम्पादयति सः प्रतिप्राशो भूत्वा प्राशान् नाशयतु हे ओषधे ! तान् पराभूतान् कुरु । यो हि रुद्रो देवो यष्टव्यरूपेणाग्नौ वरुणरूपेण जले सोमरूपेण लतासु च वरीवर्ति स हि सर्वलोकान् रचयति । तं रूद्रात्मकाग्नये अग्न्यादिगुणात्मकाय रूद्राय च वयं नमामः । तद् यथा - यो अग्नौ रूद्रो यो अप्स्वन्तर्य ओषधीर्वीरूध आविवेश । यो इमां विश्वा भुवनानि चाक्लृप्तं तस्मै रूद्राय नमोस्वत्वग्नये [१३]। एवं शिवाशिवरूपो देवः अस्माकं रूद्र इति आवेदकालादधुनाऽपि वयं भारतीयाः मन्यामहे । इयं स्त्री देवका का ? कथञ्चास्य रूद्रेण सहोल्लेखः इति जिज्ञासायां कृतायां शक्तिसहितस्य शिवस्य प्राक्तन् स्वरूपमम्बिका युतं रूद्रस्यैवासीदिति सिध्यति । शिवोपासने शक्त्युपासनं रूद्रोपासने लिङ्गोपासनम् । लिङ्गं नाम प्राणिनाम सामान्योधर्मः 'लिङ्गचिह्नशेफयो' इत्यमरकोश प्रामाण्येन लिङ्गस्य चिह्नम् शेफश्च उभे नामनी । अतो लिङ्ग्यते अनेन इति लिङ्गमिति व्युत्पत्तिःलिगिगतौ[१४] भ्वादिः इति धातोः 'हलश्च'[१५] इति सूत्रेण घञ् प्रत्यये लिङ्गमिति रूपं सिध्यति । तथा हि -

लिङ्गं चिह्नेऽनुमाने च सांख्ययोगप्रकृतावपि ।
शिवमूर्तिविशेषे च मेहनेपि नुपंसकम् ।।[१६]

प्रायः सर्वत्रदेशेषु साहित्येषु प्राणिषु च लिङ्गस्य स्वाभाविकधर्ममर्यादया समुपतिष्ठते व्याकरणे, सांख्ये , धर्मशास्त्रे चास्मिन् विषये वैशिष्ट्येन विचाराः समुपलभ्यन्ते । सिद्धान्तकौमुद्यां स्त्रीप्रत्ययप्रकरणे मनोरमादिटीकायां -

स्तनकेशवती नारी स्याल्लोमशः पुरुषस्स्मृतः ।

उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥१७

स्तनकेशलोमप्रभृतयः शब्दाः पारिभाषिकाः मन्यन्ते । लिङ्गनिर्वचनमावश्यकमितिविज्ञायैव भगवान् पाणिनिः लिङ्गानुशासनमिति प्रकरणं रचितवान् ।

शिवस्य लिङ्गपूजास्वस्मिन्नीव महत्वं विभर्ति एतदर्थमेव स्वातन्त्र्येण लिङ्गपुराणस्य रचना कृता । शिवपुराणेऽपि लिङ्गपूजाबहुधा प्रकाशिता । इदमतीवविचित्रं तथ्यं यद् अन्ये देवाः मूर्तिरूपेण पूज्यन्ते परं भगवान् शिवः प्रायशो लिङ्गरूपेण पूज्यते । यत्र यत्र ज्योतिर्लिङ्गानि तत्र तत्र लिङ्गपूजैव समादृता दृश्यते ।

अर्घ्याकोरमण्डले लिङ्गस्थापनेन इदं सिध्यति यत् प्रकृतिपुरुषः, स्त्रीपुरुषः,शक्तिशिवमूलकोऽयं जीवलोकः । यतश्चार्घ्यार्थं शक्तिरूपकं लिङ्गञ्च शिवरूपमिति । तयोः सामरस्यादेव शब्दार्थसामर्थ्यात् अर्थनिष्पत्तिवद् सृष्टिसमारम्भो जायते । तत्र शैवदर्शनस्य वास्तविकं नाम शास्त्रीयवाङ्मये आगम इति । स च आगमो ज्ञानरूपोऽनन्तशास्त्रेषु व्यवह्तिो भवति । उक्तञ्च -

आगमो ज्ञानमित्युक्तं ह्यनन्ताज्ञानकोटयः ।
शास्त्रशब्दात्मकं सर्वम् ....॥१८

स च आगमो भगवतो महेश्वरस्य ज्ञानात्मकस्य पञ्चमुखस्य प्रभावादेव उदेति। भर्तृहरिणाऽपि वाक्यपदीये आगमस्य ज्ञानात्मकत्वं स्वीकृतम् । यथा -

चैतन्यमिव यश्चायमविच्छेदेन वर्तते ।
आगमस्तमुपासीनो हेतुवादैर्न वाध्यते ॥१९

कुलमूलावतारतन्त्रे हि -

अनादिनिधनाच्छान्तात् शिवात्परं कारणात् ।
इच्छाशक्तिर्विनिष्क्रान्ता ततो ज्ञानं ततः क्रिया ॥
तपोत्पन्नानि भूतानि भुवनानि चतुर्दश ।
वाङ्मयं चैव यत्किञ्चित् तत्सर्वं मातृकोद्भवम् ॥२०

एवमेव शिवशक्त्यो शब्दार्थयोरिव ऐक्यं सर्वत्र शैव शाक्तदर्शने निगदितम्

यथा -

चिदात्मैव हि देवोऽन्तः स्थितमिच्छावशात् वहिः ।
योगी वनिरूपादानमर्थजातं प्रकाशते ।[२१]

शब्दानां मूलं परापराम्बा, अर्थानाञ्चमूलं शिवः । इममेव सिद्धान्तं कालिदासोऽपि मनुते - लिखति च रघुवंशमहाकाव्यारम्भे -

वागर्थाविवसम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वती परमेश्वरौ ॥[२२]

अयमेव हि सिद्धान्तः शैवदर्शने सर्वत्र समुल्लसति । तदुक्तं वायवीयसंहितायाम्

शब्दजातमशेषंतु धत्ते शङ्करवल्लभा ।
अर्थस्वरूपमखिलं धत्ते मुग्धेन्दुशेखरः ॥[२३]

उपनिषत्सु ग्रन्थेषु शिवशक्तिरूपसना वर्णिता । निगमागममूलिकेयं भारतीया संस्कृतिः । निगमपेदन वेदः आगमपदेन शिवप्रोक्तशैवशाक्तसिद्धान्ताः गृह्यन्ते । आगमपन्थानं तिरस्कृत्य भारतीयजीवनपद्धेः कल्पनमेव दुःशकमिति । अतो क्वचित् साक्षात् वेदादेव क्वचिच्च परम्परया शिवशक्तेरूपासनस्य प्रमाणान्युपलभ्यन्ते । श्वेताश्वेतरोपनिषदि भगवतः शिवस्य सर्वशक्तिमत्वात् ईशमहेश्वरशिवईशान् प्रभृतिभिः पदैः सम्बोधनं भवति । तथा च -

सर्वानन शिरो ग्रीवः सर्वभूतगुहाशयः ।
सर्वव्यापी च भगवान् तस्मात् सर्वगतः शिवः ॥[२४]
मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम् ।
भावग्राह्यमनीडाख्यं भावाभावकरं शिवम् ।
कलासर्गकरं देवं ये विदुस्ते जहुस्तनुम् ॥ [२५]

असावेवशिवः ज्ञाननिधिः, शब्दमयः, ज्ञानं, गुरुप्रभृतिरभिधानैः महर्षिभिरभिहितः । स च शिवः शक्त्यायुक्तो लोकान् भावयति । ततश्चानन्तगुणकर्मा अनन्तलोका चेयं सृष्टिः प्रादुर्भवति । उक्तञ्च श्वेताश्वेतरोपनिषदि य एको वर्णो बहुधा शक्तियोगात् वर्णान् अनेकान् निहितार्थो दधाति । शक्तिश्चेयमनादि सदा शिवमनुवर्तते । सा च रक्त- कृष्ण- श्वेत- त्रिवर्णात्मिका ।

अतस्त्रिगुणात्मिका साऽखिलां विश्वं जातं विरचयति । उक्तञ्च -

अजामेकालोहितशुक्लकृष्णां वह्वीः प्रजाः सृजमानां समानाः ।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोन्यः ॥[२६]

वाल्मीकिरामायणे भगवतः शिवस्य, मातुः पार्वत्याश्च विविधः प्रसङ्गः आयाति । यथा शिवस्य विषपानविषयिणी कथा, गङ्गावतरणकथा, शिवपार्वत्याः विवाहकथा, स्कन्दोत्पत्तिकथा, कामदेवनाशकथा, दक्षकथा, शिवस्त्रीरूप निर्माणकथा, प्रभृतयो विषयाः वैदिकसाहित्ये न्यूनाधिक्येन साम्यमधिगच्छन्ति ।

रामायणे महादेव-महेश्वर-शङ्कर-त्र्यम्बकाणां तथान्येषां नाम्नां प्रयोगाः दृश्यन्ते । अत्रत्यः शिवो रूद्रापेक्षया महाकल्याणकारित्वेनोपतिष्ठते । स वरदाता आशुतोषः दयानिधिश्चास्ति । अतः स महादेवपदमलङ्करोति ।

उपनिषत्सु रूद्रो दार्शनिकदृष्ट्या परं ब्रह्मत्वेनाङ्गी क्रियते । रामायणे देवमण्डलस्थाने प्रायशः ब्रह्माविष्णुशिवाः एवावशिष्यन्ते तथा नान्ये देवाः । तत्रापि विष्णुशिवापेक्षया ब्रह्मा किञ्चिन्न्यूनत्वेमेवावहति ।

यदि होत्पद्यते भूतं कस्तत् प्रतिसहिष्यति ।
अभिगम्य सुराः सर्वे प्रणिपत्येदमब्रुवन् ॥
देव देव महादेव लोकस्यास्य हिते रतः ।
सुराणां प्रणिपातेन प्रसादं कर्तुमर्हसि ॥
न लोकाः धारयिष्यन्ति तव तेजः सुरोत्तम ।
ब्रह्मणे तपसा युक्तो देव्या सह तपश्चर ॥[२७]

शिवस्यामरलोकेऽपि भवति उपासनम् । स च देवानामपि देवः । तथा हि विषपानप्रसङ्गे -

अथ देवा महादेवं शङ्करं शरणार्थिनः ।
जग्मुः पशुपतिं रूद्रं त्राणि त्राहीति तुष्टुवुः ॥
एवमुक्तस्ततो देवैर्देवदेवेश्वरः प्रभुः ॥[२८]

शिवाराधनप्रसङ्गे विश्वामित्रेण -

स गत्वा हिमवत्पार्श्वे किन्नरोरग सेविते ।
महादेव प्रसादार्थं तपस्तेपे महातपाः ॥[२९]

भगवाञ्छिवो लोके गुरुः निग्रहानुग्रहपञ्चकृत्यकर्ता च । स हि सर्ग स्वलीलया आविर्भावयति । स्वेच्छया चेयं संहरति । स सर्वलोकाधारोऽप्यस्ति । स चाव्ययः अक्षरः अमरश्चास्ति । गङ्गावतरणकथा प्रसङ्गे वाल्मीकिरुद्घोषयति यत् शिवतपसैव तस्याः प्राप्तिर्नान्येन भवितुमर्हति । अतो राज्ञा भगीरथेन उग्रं तपोविधायैव शिवं तोषयित्वा गङ्गां भूमौ आनीता । उक्तञ्च -

अथ संवत्सरे पूर्णे सर्वलोकनमस्कृतः ।
उमापतिः पशुपतिः राजानमिदमब्रवीति ॥
प्रीतस्तेहं नरश्रेष्ठ वारयिष्यामि तवप्रियम् ।
शिरसा धारयिष्यामि शैलराजसुतामहम् ॥[३०]

हिमवतः प्रादुर्भावेनास्याः पार्वती नाम अप्याजगाम् ।

यच्चाग्रे समागत्य सर्वाधिकां प्रचारभूमौ समागच्छत् । तथा च -

ततो वृषभमास्थाय पार्वत्या सहितः शिवः ।
वायुमार्गेण गच्छन् वै शुश्राव रुदितस्वनम् ॥[३१]

रूद्रस्य स्त्री सत्वात् पार्वत्याः रुद्राणी इत्यपि नाम अनेक वारं रामायणे पृथक् पृथक् स्थलेषु दृश्यते । तथा च -

कान्वेषेति महाराज न खल्वन्येन हेतुना ।
रूपं चानुपमं कृत्वा रूद्राणी तत्र तिष्ठति ॥[३२]

शिवस्वरूपस्य शिवोपासनायाश्च विषये रामायणादधिकं माहात्म्यं महाभारत्ते प्राप्यते । स परं ब्रह्म असीमः, अचिन्त्यः, विश्वस्त्रष्टा आत्मनि विश्वं समाकलितोऽस्ति । स महाभूतानामधिष्ठाता, आधारः नित्यः कारणश्चास्ति । अयमेव भावो द्रोणपर्वणि उक्तम् -

नमो भवाय शर्वाय रूद्राय वरदाय च ।
पशूनां पतये नित्यमुग्राय च कपर्दिने ॥
कुमारगुरवे नित्यं नीलग्रीवाय वेधसे ।
लोहिताय धूम्राय व्यालयज्ञोपवीतिने ॥
महादेवाय भीमाय त्र्यम्बकाय शिवाय च ।
ईशानाय मखघ्नाय नमोस्तु अन्धकघातिने ॥

अचिन्त्यायाम्बिकाभर्त्रे सर्वदेवस्तुताय च ।
वृषभध्वजाय मुण्डाय जटिने ब्रह्मचारिणे ।।
तपसे तप्यमानाय ब्रह्मणे अमिताय च ।
विश्वात्मने विश्वसृजे विश्वमावृत्त तिष्ठते ।।
नमः सहस्त्रशिरसे सहस्त्रभुजमन्वये ।
सहस्त्रनेत्र पादाय नमोऽसंख्येय कर्मणे ।।
नमो हिरण्यवर्णाय हिरण्यकवचाय च ।
नमोस्तु देवदेवाय महाभूतधराय च ।।
भवतानुकम्पिने नित्यं सिध्यतां नो वरः प्रभो ।।[३३]

एवं हि विष्णुरूपः कृष्णः स्व आराध्यत्वेन भगवन्तं शिवँ स्तौति । एतेन शिवस्य व्यापकत्वं सर्वाराध्यत्वञ्च सिद्धयति । स च शिव भक्त्या वशीकर्तव्य इति वनपर्वपर्यालोचनया गम्यते । तथा च -

तपसा राधिता शम्भुर्भगवान् लोकमानवः ।[३४]

तपसाराध्यस्य भगवतः शिवस्य प्रसन्नतायै पाशुपतव्रतस्याचरणं भारतवर्षे जनाः कुर्वन्ति स्म । व्रतकर्तुः कार्यदृष्ट्या तत् परिस्थित्यनुसारेणास्य व्रतस्य द्वादशदिनानि, द्वादशाब्दानि वानुष्ठानं विधीयते स्म जनैः । अस्य व्रतस्य संक्षेपेणान्वाख्यानं संक्षेपेण कर्णपर्वणि कृतम् । यथा -

यो वः पशुपतेश्चर्यां चरिष्यति स मोक्ष्यते ।
पाशुत्त्वात् इति सत्यं वा प्रतिजाने समागमे ।।
यो चाऽन्येऽपि चरिष्यन्ति व्रतं मोक्ष्यन्ते. तेऽपि युत् ।
नैष्ठिकं द्वादशाब्दं योऽब्दमर्घम् ऋतुत्रयम् ।।
मासं द्वादशरात्रं वा स पशुत्वात् विमुच्यते ।
तस्मात् परमिदं गुह्यं व्रतं दिव्यं चरिष्यथ ।।[३५]

महाभारते मानवसुलभगुणानां समाहारः सपत्नीकस्य शिवस्य दृश्यते । अपरञ्च सर्वो हि लोकः शिवस्योग्ररूपाद् विभेति । तथा च

ईशानायाप्रमेयाय निहंत्रे चर्मवाससे ।
तपो रताय पिङ्गाय व्रतिने कृतिवाससे ।

कुमारपित्रे त्र्यक्षाय प्रवरायुधयोधिने ।
प्रपन्नार्ति विनाशाय ब्रह्मविद् संघघातिने ।।[३६]

शिवस्य सौम्यासौम्य इति रूपद्वयं महाभारते बहुशः प्रदर्शित अस्ति । तद् यथा -

द्वे तनू तस्य देवस्य वेदज्ञा ब्राह्मणा विदुः ।
घोरामन्यां शिवामन्यां ते तनू बहुधा पुनः ।।[३७]

अष्टादशपुराणेषु तथा उपपुराणेषु सशक्तिकस्य शिवस्य वर्णनं बहुधा प्राप्यते । भारतीयजीवनस्य समग्रा सुषमा पुराणेषु समुपलभ्यते । तत्र शिवमुद्दिश्य शिवपुराणम् , देवीमुद्दिश्य देवीभागवतम्, विष्णुमुद्दिश्य विष्णुपुराणादिकञ्च संगच्छन्ते । तत्तत् पुराणेषु तत्तत् देवानां स्वरूपनिरूपणञ्च वर्तते । भगवतः लोकगुरोः परमकारुणिकस्य शिवश्य विषपानं श्रूयते पुराणेषु । अस्याख्यानस्य विवेचनं प्रायोबहुषु पुराणेषु दृश्यते । यथा अग्निपुराणे -

क्षीराब्धेमथ्यमानाच्च विषं हालाहलं ह्यभूत् ।
हरेण धारितं कण्ठे नीलकण्ठस्ततोऽभवत् ।।[३९]

एवं प्रकारेण हि किमुद्दिश्य कीदृशं लिङ्गमर्चनीयं ह्यत्र पुराणे शिवार्चनस्य विविधाः विधयो निर्दिष्टाः वर्तन्ते । यथा

वक्ष्याम्यन्यप्रकारेण लिङ्गमानादिकं श्रृणु ।
वक्ष्ये लक्षणं लिङ्गं धृतजं बुद्धिवर्धनम् ।।
भूतये वस्त्रलिङ्गन्तु लिङ्गं तात्कालिकं विदुः ।
पक्वापक्वं मृण्मयं स्याद् अपक्वात् पक्वजं वरम् ।।
ततो दारुमयं पुण्यं दारुजाच्छैलजं वरम् ।
पूज्यो हरस्तु सर्वत्र लिङ्गे पूर्णार्चनं भवेत् ।।[४०]

लिङ्गपुराणे शिवस्वरूपस्य तत्प्रभावस्य च विपुलं निरूपणं दृश्यते । इदमेव नहि अपितु शैवानां भक्तानां वैशिष्ट्यं सर्वातिश्रेष्ठतरमिति प्रतिपाद्यमानमुच्यते ।

अन्यभक्तसहस्रेभ्यो विष्णुभक्तो विशिष्यते ।
विष्णुभक्तसहस्रेभ्यो रूद्रभक्तो विशिष्यते ।

रूद्रभक्तात् परतरो नास्ति लोके न संशयः॥[४१]

शिवोपासनाँयाः किं फलमिति तत्रैव पुराणे -

सर्वावस्थाङ्गतो वापि मुक्तोऽयं सर्वपातकैः ।
शिवध्यानान्न संदेहो यथा रूद्रस्तथा स्वयम् ॥
हत्वा भीत्वा च भूतानि भुक्त्वा चान्यतोऽपि वा ।
शिवमेकं सकृत् स्मृत्य सर्वपापैः प्रमुच्यते ॥[४२]

इत्थं विचारणायां प्रतिभाति यत् पुराणेषु शैवागमस्य भूयस्त्वेन विमर्शः कृतो विद्यते । पुराणानामिदमेवं वैशिष्ट्यं यत् नार्यः शिवानुरूपं अजरममरं मृत्युजयिनं पतिं कामयन्ते । नराश्च समस्तशुभगुणसम्पन्नां निग्रहानुग्रहसमर्थां साधकसामग्रीसम्पन्नां पार्वतीसन्निभां पत्नीं कामयन्ते । चिरञ्जीवी पतिःस्यात् एतदर्थं शिवाराधनं कर्तव्यमिति स्त्रीणां कर्तव्यता सिद्ध्यतीति ।

भारतीयकवयः शिवशक्तिसमुपासकाः । तेषां काव्येषु शैवधर्मपरम्परा भूरिशः दरीदृश्यते । यथा कालिदासः, भवभूतिः, माघः, अश्वघोषः, बाणभट्टः, मयूरभट्टादयः कवयः भारतीयसंस्कृतिमलञ्चक्रुः । भारतीयजीवने सः कालोऽतीवरमणीयो यस्मिन् सरस्वत्याः वाग् विलासस्य कविकुलगुरोः कालिदासस्य आविर्भावः समजनि । नाम्ना कर्मणा च कालिदासः शैव एवासीत् । तस्य काव्यानि शिवशक्तिशिवस्तुतिमङ्गलैः नाटकानि च शिवस्तुतिभिरेव प्रारभन्ते । कालिदासरचनासु शिवस्य तदेव रूपं दृश्यते यस्य निरुपणमधुना तन्त्रे शैवागमे च दृश्यते । रघुवंशमहाकाव्यं शिवशक्तिस्तुत्यैव ग्रन्थारम्भः । तथा च -

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥[४३]

अस्मिन् श्लोके समासतो यन्निगदितं तस्य शैवागमः एव उपजीव्यभूतः । अत्र श्लोके जगतः कारणत्वेन पार्वती शिवौ च जनकजननीत्वेन स्तुतौ । वागर्थयोस्तादात्म्यसम्बन्धः । शब्दातिरिक्तमर्थस्य कल्पनमेव न स्यात् । अथ विरहितो न कोऽपि शब्दः स्थास्यति । यथा

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।

अनुविद्धमिवज्ञानं सर्वं शब्देन भासते ॥[४४]

कालिदासस्य प्रसिद्धनाटके अभिज्ञानशाकुन्तले मङ्गलश्लोकेन कविः कथयति यत् शिवः पृथिवीजलवायुतेजआकाशसूर्यसोमहोतृरूपेणानुदिनं विश्वं रक्षति । यथा -

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री ।
ये द्वे काले विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्यविश्वम् ॥
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः ।
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥[४५]

मेघदूतकाव्ये उज्जयिन्यां महाकालेश्वरस्य विश्वविश्रुतं मन्दिरं विद्यते । तत्र संध्यायाम् आरार्तिक्यकाले नृत्याङ्गनाः समागत्य स्वनृत्यं प्रदर्शयन्तिस्म । भोः यक्ष उज्जयिनीं गत्वा तत्र भगवतः शिवस्य दिवसावसानिकसंध्यायां मृदुगर्जनेन मृदङ्गतालेषु स्वतालसम्मेलनेन शिवार्चनं सम्पाद्य पुरस्कारस्वरूपेण तत्रत्य नृत्याङ्गनानां कृतज्ञतामयैः कटाक्षैः आनन्दसन्दोहं प्राप्नुहि इति कथा वर्णिता । तथा च -

अप्यस्मिन् जलधरमहाकालमासाद्यकालो
स्थापत्यं तै नयनविषयं यावदत्येति भानुः ।
कुर्वन् सन्ध्यावलिपटहतां शूलिनः श्लाघनीया
मामन्द्राणां फलमिवकलं लप्स्यसे गर्जितानाम् ॥[४६]

इत्थं हि तस्मिन् काले उज्जयिन्यां प्राचीनशिवमन्दिरस्य सत्वात् तत्र हि नृत्यवादित्रैः महाकालस्याराधनवर्णनेन एतत्कल्पनीयं भवति यत्तस्मिन् कालेऽतीव महता समारोहेण तत्र शिवार्चनं भवति स्म । यथा -

नृत्यारम्भे हरपशुपतेरार्द्रनागाजिनेच्छां ।
शान्तोद्वेगस्तनित नयनं दृष्टभक्तिर्भवान्याः ॥[४७]

शिवे शक्त्या सम्बन्धः तात्विकः सात्विकश्च । अत एव शिवतत्त्वेन यत् कल्पनीयं भवति । शक्तित्वेनापि तदेव कल्पनीयं भवति नात्र विसंवादः । शक्तया शिवस्य शक्तत्वस्य, शक्त्याहीनस्य शिवस्य शवत्वात् तस्य पृथक् कल्पनं न कर्तुं शक्यते । प्रमाणं तु शङ्कराचार्यरचितं सौन्दर्यलहरीनाम्नी

रचना । शिवशक्त्या युक्त एव लोकसंरचनायां च प्रवृत्तो भवति । तथा हि -

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि ।
अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि ।
प्रणन्तु स्तोतुं वा कथमकृत्य पुण्यः प्रभवति ॥[४८]

भगवत्याः सरस्वत्याः वाणीभूतस्य महाकवेर्वाणस्य हर्षचरितं , कादम्बरी चेति द्वे रचने प्राप्येते । कविकुलगुरुकालिदासवत् महाकविवाणभट्टोऽपि शैव आसीत् । स कादम्वर्याः मङ्गलश्लोके शक्तिमण्डितस्य शिवस्यैवक्रमशः उत्पादकपालनसंहारकशक्तिमत्वेन स्तवनं करोति । यथा -

रजोजुषे जन्मनि सत्ववृत्तये ।
स्थितौ प्रजानां प्रलये तमःस्पृशे ।
अजाय सर्ग स्थिति नाशहेतवे ।
त्रयीमयाय त्रिगुणात्मने नमः ॥[४९]

कादम्बर्याः महाकविवाणभट्टः उज्जयिन्यां भगवतः महाकालेश्ववस्य मन्दिरस्योल्लेखोऽकारि । राज्ञः उदयनस्य राजमहिषी अपि तन्मन्दिरे पूजार्थं गच्छति स्म । ये अस्माकं भारतीयाः विज्ञानवेत्तारः मुनयः ऋषयः महर्षयश्चासन् ते सर्वे विभिन्नदेशेषु गत्वा जीवलोकानां हितकामनया स्वधर्मस्य प्रचारं अकुर्वन् । उक्तञ्च -

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥[५०]

इति मनुस्मृतौ मनुना प्रोक्तम् । एवं भारतवर्षे एव नहि अपितु अखिलविश्वेऽस्मिन् सशक्तिकः शिवः परब्रह्मत्वेन व्याप्नोति इति ।

अत्र तत्त्वम् -एकमेवाद्वितीयं परं तत्त्वं शून्यवादिभिर्विज्ञानवादिभिश्च बौद्धैः गौणपादशङ्कराचार्यप्रभृतिभिर्वेदानुगामिभिः व्याडिपतञ्जलिभर्तृहरिपुण्यराज हेलाराज नागेशभट्टादिभिर्वैयाकरणैः वैष्णवाचार्यवल्लभेन, माहेश्वर सूत्राणामागमानुसारि व्याख्या कर्ता नन्दिकेश्वराचार्येण शिवाऽद्वयवादिभिः शैवैश्च विभिन्नोपायैः स्वीकृतं समर्थितञ्च । नन्दिकेश्वरदर्शनं प्रत्यभिज्ञादर्शनं, क्रमदर्शनम्,

कुलदर्शनम् ,वेदान्तदर्शनम् ,योगदर्शनम् ,अत्र सर्वत्राद्वैततत्त्वस्य प्रतिपादनं सम्भूतम् । इति दिक् ।

पादटीका

१.धातुसंख्या १०३२ अदादिगण:
२.धातुसंख्या १२६१ स्वादिगण:
३.धातुसंख्या ११८७ दिवादिगण:
४.तन्त्रालोक:
५. प्रपञ्चसारप्रक्रिया
६. प्रपञ्चसारप्रक्रिया
७. प्रपञ्चासारप्रक्रिया
८.ऋग्वेदसंहिता
९.धातुसंख्या १०६७ अदादिगण:
१०.रूध्धातु धातुसंख्या ११७४
११.यजुर्वेदसंहिता
१२. अथर्ववेदसंहिता
१३.अथर्ववेदसंहितायाम्
१४. धातुसंख्या १५५ भ्वादिगण:
१५. पा.सू.३.३.१२१
१६. मेदिनीकोश:
१७. सिद्धान्तकौमुदीबालमनोरमा स्त्रीप्रत्ययप्रकरणप्रारम्भे
१८. स्वच्छन्दतन्त्रम्
१९. वाक्यपदीयम् ब्रह्मकाण्डम् ।
२०. कुलमूलावतारतन्त्रम्
२१. ईश्वरप्रत्यभिज्ञातन्त्रम्
२२.रघुवंशमहाकाव्यम् १.१
२३. यववीयसंहिता
२४. श्वेताश्वेतरोपनिषदि

२५. श्वेताश्वेतरोपनिषदि

२६. श्वेताश्वेतरोपनिषदि

२७. वाल्मीकिरामायणम् १काण्डस्य ३६ अध्यायस्य ८,९,१०तम:श्लोक:

२८.वाल्मीकिरामायणम् १.४५.२१-२२.१/२

२९. वाल्मीकिरामायणम् १.५५.१२

३०. वाल्मीकिरामायणम् १.४३.२-३

३१. वाल्मीकिरामायणम् ७.४.२७

३२. वाल्मीकिरामायणम् ७.१३.२३

३३. महाभारतम् द्रोणपर्व

३४. महाभारतम् वनपर्व

३५. महाभारतकर्णपर्व

३६. महाभारतकर्णपर्व

३८. महाभारतम् अनुशासनपर्व

३९. अग्निपुराणे

४०. अग्निपुराणम्

४१. लिङ्गपुराणम्

४२. लिङ्गपुराणम्

४३. रघुवंशमहाकाव्यम् १.१

४४. वाक्यपदीयम्

४५. अभिज्ञानशाकुन्तलम् १

४६. मेघदूतम्

४७. मेघदूतम्

४८. सौन्दर्यलहरी

४९. कादम्बरी मङ्गलाचरणम्

५०. मनुस्मृति:

नवमोऽध्यायः

व्याकरणदृष्ट्या सृष्टिप्रक्रिया

नवमोऽध्यायः

व्याकरणदृष्ट्या सृष्टिप्रक्रिया

वाक्यपदीयानुमतः सृष्टिक्रमः

वाक्यपदीयविधात्रा श्रीहरिणाऽपि अनादिनिधनं व्यापकं चिद्रूपं वेदान्तवेद्यं यद् ब्रह्म तदेव। वाग् वै ब्रह्म इत्यादिश्रुतिबलेन शब्दरूपतयाऽभ्युपेत्य तत्र जगतो विवर्तोपादानत्वमेवाविद्याशक्तिसहकृतकालशक्तेश्च सहकारित्वं सिद्धान्तितम्। तथा चोक्तम् -

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः [1]॥
अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः।
जन्मादयो विकाराः षड् भावभेदस्य योनयः[2]॥
शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते।
समारम्भाच्च भावानामादिमद् ब्रह्म शाश्वतम् [3]॥
शक्त्यात्मदेवतापक्षे भिन्नं कालस्य दर्शनम्।
प्रथमं तदविद्यायां यद्विद्यायां न विद्यते॥ [4]

किञ्च अनादिनिधनमित्यस्य टीकायामपि ब्रह्मणस्तादृशरूपतः, अविद्याशक्तिकाल शक्त्योश्च सहकारिता स्पष्टमुक्ताऽस्ति। (सर्वपरिकल्पनातीतत्वं भेदसंसर्गमतिक्रमेण समाविष्टं सर्वाभिः शक्तिर्भिविद्याऽविद्याप्रविभागरूपभप्रविभागं कालभेददर्शनाऽभ्या सेन मूर्त्तिविभागभावनाय च व्यवहाराच्च व्यवहारानुपाति भिर्धर्माधर्मैः सर्वाष्वस्थाष्वनादिनिधनं ब्रह्मेति प्रतिज्ञायते [5]।

सृष्टिप्रक्रियाविमर्शः

तत्र वेदत्रय्यैव शब्दब्रह्मणः प्रथमो विवर्तः प्रोक्तः स्वोपज्ञटीकायां हरिवृषभेण -

त्रयीरूपेण तज्जोतिः (प्रथमं) परमं परिवर्तते।
पृथक् तीर्थप्रवादेषु दृष्टिभेदनिबन्धनम्॥

अत्र परमं परिवर्तते इत्यस्य प्रथमं विवर्तते इत्यर्थः कृतः अम्बीटीकाकर्त्रा। किञ्च यो ब्रह्मणं विदधाति पूर्वं यो वा वेदांश्च प्रहिणोति

तस्मै इति श्रुतिबलेन । अनादिनिधनं इति प्रथमश्लोके प्रक्रिया जगतो यतः इत्यंशे जगतो वेदस्य प्रक्रिया प्रथमत उत्पत्तिः विवर्तः इति । सर्वविकाराणां प्रलये वर्णमात्रापदाद्यानुपूर्वीशून्यमुपसंहृतक्रमं शब्दाख्यं ब्रह्मैवावतिष्ठते सेयं ब्रह्मणोऽवस्था संवर्तत इत्युच्यते । अनेकस्यैवोपसंहाररूपत्वात् संवर्तस्य। तद्विपरीतं त्वेकस्यानेकरूपेण प्रतिभासो विवर्त इति च सर्वं स्पष्टीकृतं स्वोपज्ञानुसारिण्याम्बा कर्त्र्याम्। अग्रे च शब्दतन्मात्ररूपवेदशब्देभ्योऽर्थानां नानाविधसृष्टिः परिणामभूतैव स्वीक्रियते हरिणाऽपि तथाहि -

शब्दस्य परिणामोऽयमित्याम्नायो विदो विदुः ।
छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत [६]॥

इत्यनेन शब्दानामर्थोत्पत्तावपि कारणता सुष्ठूक्ता । अत्र शब्दपदं शब्दतन्मात्रापरं न तु शब्दब्रह्मपरम् । एवं छन्दः । पदमपि नित्यत्वशब्दत्वरूच्छन्दः साधर्म्यात् सूक्ष्मावतत्त्वपरमेव लक्षणया । वेदस्यानित्वपक्षे तु सूक्ष्मवाक्तत्त्वकार्यत्वेन कार्यकारणयोरभेदोपचारात् वा तत्परमेव। तथा चोक्तम् -

वागेव विश्वा भुवनानि जज्ञे, वाच इत्सर्वममृतं यच्च मर्त्यम् [७]।
विभज्य बहुधात्मानं स छन्दस्यः प्रजापतिः ।
छन्दोमयीभिर्मात्राभिर्बहुधैव विवेश तम् ॥[८]

एवञ्च व्यवर्ततेति पदं व्यजायत इत्यर्थं बोध्यम् । अथरोत्तरार्धेन श्रीहरिः पुनः स्वीयं हार्दं स्मारयति यत् शब्दतन्मात्रस्य परिणामोऽयं जगद् भवेत् तर्हि भवत्वित्याम्नायविदा मुक्तिर्यथा समर्थयत् एव। किन्तु कूटस्थनित्यस्य शब्दब्रह्मणो विवर्तोपादानत्वमपि सिद्धान्ततत्त्वं भवन्तो न विस्मरन्त्वित्युच्यते। छन्दोभ्य इति । अत्र पक्षे छन्दोभ्य इति न हेतावपादाने वा पञ्चमी, अपि तु उपक्रम्य इति त्यबन्तपदस्य लोपे सति कर्मणि पञ्चमी। अतश्च छन्दांस्युपक्रमयैतद् विश्वं व्यवर्तत विवर्तभावमागतम्। एवं च प्रथमपदस्याप्यत्र पक्षे स्वारसिकता। व्यवर्ततेत्यत्र लक्षणाऽपि न कर्तव्या इति महदनुकूल्यम्। एवं च नास्त्यत्र वाक्यपदीये पूर्वपरविरोधो लेशतोऽपि। किञ्च --

अथेदमान्तरं ज्ञानं सूक्ष्मवागात्मना स्थितम् ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥

स मनोभावमापद्य तेजसा पाकमागतः ।
वायुमाविशति प्राणमथासौ समूदीर्यते ॥
अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः ।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते ॥

आभिः कारिकाभिः स्फुटमेव आन्तरज्ञानरूपस्य शब्दब्रह्मणः शब्दतन्मात्रभूतः शब्दः विवर्ततयोक्तः । तदनु तस्य स्थूलशब्दाकारेण परिणामो मनोभावापत्तिपुरस्सरं प्राणवायुसम्बन्धपूर्वकं च भवति । यथा तेजसः सम्बन्धादिन्धनं स्वरूपं विहाय तेजो रूपं भवति तथा वायुः स्वरूपहानेन मनोरूपतां प्रतिपद्यते । पुनश्चायं प्राणवायुस्तत्तत्स्थानेषु करणानामात्मनश्चाभिघातेन पृथग्विधैः श्रुतिरूप वर्णरूपैः प्राकृततद् अवनिरूपैर्वा स्वात्मनो ग्रन्थीन् ग्रन्थिसदृशावयवान् विभर्जस्तत्तत्वर्णविभागेनावस्थापयन् वर्णान् प्रकाश्य वर्णेष्वेव लीयते । उक्तं च हरिणा -

विभज्य स्वात्तमनो ग्रन्थीन् श्रुतिरूपैः पृथग्विधैः ।
प्राणो वर्णानभिव्यज्य वर्णेष्वेवोपलीयते [१]॥

अयं भावः तेजसाऽनुगृहीतः प्राणवायुः शरीरान्तः स्थिताभ्यः सूक्ष्मशब्दपूर्णाभ्यो नाडीभ्यः सूक्ष्मशब्दावयवान् समुत्पाद्य ताल्वादिष्वभिघातेन संहन्ति । यथा धूमावयवाः वायुना प्रेरिताः संघातं प्राप्नुवन्ति तथा प्राणवायुना शब्दावयवाः ध्वनिपरमाणवः प्रेर्यमाणाः स्थानेष्वभिघातेन घनी क्रियन्ते ।

शब्दार्थोभयोपादानिका सृष्टिः

एवं-रीत्या विश्वस्य शब्दोपादानकत्वमसन्दिग्धं निर्णीतम् । तच्चैवमुप पद्यते पञ्चमीकृततत्तद्भूतसहकृतेभ्यस्तत्तदर्थवाचकतत्तच्छब्देभ्यस्तानि तानि भौतकानि जायन्ते इति ।

न चैवं पृथिव्या अन्नौषधयः इत्यादिश्रुतिविरोधः भूतस्य शब्दस्य चोभयोः समप्रधानतयोपादानत्वेनादोषात् । विजातीययोरप्येककार्योपादानत्वं पूर्वमुक्तमेव । एवं च "स भूरिति व्याहरत् " स भूमिमसृत् इति श्रुत्या सह पृथिव्या अन्नौषधयः इत्यादि श्रुतेर्न विरोधः । तत्र स्थूलशब्दस्योपादानत्रितयमुक्तं वाक्यपदीये --

वायोरणूनां शब्दस्य शब्दत्वापत्तिरिष्यते ।
कैश्चिद् दर्शनभेदो हि प्रवादेष्वनवस्थितः ।।[१०]

तत्रान्तरज्ञानस्य शब्दभावापत्तिप्रकारः पूर्वमुक्त एव । इदानीं वायोरणूनां च स प्रकार उच्यते वक्तुरिच्छानुवर्तिना प्रयत्नेन प्रेरितो वायुरूर्ध्वमाक्रमन्नुरः कण्ठताल्वादिष्वभिहितः शब्दाकारतया परिणमति ।

यथा मेघस्थमुदकं प्रतिकूलवायुसहकृतोदकान्तरेणाहतं विद्युद्रूपेण परिणमति एवं वायोर्नानाशब्दात्मकपरिणामः ।[११] सांख्यशास्त्रे ये शब्दतन्मात्रस्पर्श तन्मात्रादिपदाभिधेयास्त एवात्र शब्दस्पर्शरूपरसगन्धाख्याः परमाणव उच्यन्ते । एते च परस्परं व्यावृत्ता अनन्ताश्च यथाऽदृष्टं यथा सम्भवं यथाकार्यं च समुदेत्याकारिणोऽसमुदेत्यकारिणश्च । तत्र समुदेत्यकार्यकरत्वपक्षः श्रौतीं पञ्चीकरणप्रक्रियामनुसरति । तत्र पृथिवीरूपकार्योत्पत्तौ पञ्चानामपि परमाणूनां संहत्य कार्यकरत्वम् पृथिव्यां सर्वगुणोपलब्धेः । अन्येषु त्रिषु भूतेषु यथासम्भवमदृष्टानुसारेण समुदेत्कार्यकरत्वम् कतिपयानामेव गुणानां तेषुपलब्धेः । आकाशे तु शब्दपरमाणूनामेवाऽसुदेत्यकार्यकरत्वम् शब्दस्यैव तत्रोपलम्भात् ।

अस्य च स्थूलशब्दस्य सत्ता पञ्चस्वपि भूतेषु कथिता श्रीभर्तृहरिणा । आघातादिना निमित्तेन तस्याभिव्यक्तिरप्युक्ता तेनैव ।

अजस्रवृत्तिर्यः शब्दः सूक्ष्मत्वान्नोपलभ्यते ।
व्यजनाद् वायुरिव स स्वनिमित्तात प्रतीयते ।।[१२]

अथ आभ्यन्तरशब्दानां तदर्थानां चोत्पत्तिप्रकारः

सन्ति हि बाह्यशब्दवदाभ्यन्तरा अपि शब्दा अर्थाश्च । ते च बौद्धा इति कथ्यन्ते । बुद्धौ समुपलभ्यमानत्वात् । तत्र बौद्धा अर्थाः विविधाः सन्तोऽसन्तश्च । तत्र प्रथमा बुद्धौ बहिश्चोपलभ्यन्ते यथा घटपटादयः । द्वितीया अपि द्विविधाः अत्यन्तासन्तो नृशृंगादयः तद्विलक्षणाः शक्तिरूपादयः स्वप्नाश्च ।

अत्रापि बुद्धिवृत्यात्मकपदस्य पूर्वं जातस्योपादानत्वमेव, उत्तरजातस्य बुद्धिवृत्यात्मकस्यार्थस्योपादेयत्वम् ।

शब्दतन्मात्रकार्यस्य बुद्धिवृत्यात्मकपदस्य पूर्वं जातस्योपादानत्वम् ।

उत्तरजातस्य बुद्धिवृत्यात्मकस्यार्थस्योपादेयत्वम् ।

शब्दतन्मात्राकार्यस्य चाकाशस्य व्यापकत्वाच्छरीरान्तराकाशेऽपि शब्दतन्मात्ररूपा वर्णरूपाः पदरूपा वाक्यरूपाश्च स्थूलशब्दाः सन्त्येव । तत्र शब्दतन्मात्राणां कारणीभूता आत्मा परावागभिधीयते । शब्दतन्मात्राणि पश्यन्ती पदेन वर्णपदवाक्यरूपाणि च मध्यमा शब्देन अभिव्यक्तास्तु शब्दा वैखरीशब्देनोच्यन्ते । उक्तं च -

परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ।।[१३]

आत्मनः परावागिति निर्देशः स्फुटमुक्तो महाभारते "स्वरूपज्योतिरेवान्तः परा वागनपायिनी " । इति । शब्दतन्मात्रा पश्यन्ती पदेन निर्देशो ज्ञानविषयो भवतीत्यर्थमाश्रित्य । स चार्थो दृशेः कर्मकर्तरि लटः शतरि प्रयोगमनुसृत्य बोध्यः । अथवा स्थूलशब्दानामर्थानां चोपादानभूता सती तेषु साक्षिणीव तिष्ठतीति शुद्ध एव कर्तरि शतृप्रत्ययः । यद्यपि सर्वेषां ज्ञानगोचरत्वं न पश्यन्त्यास्तथापि योगिनां समाधौ ज्ञानविषयत्वमस्त्येव तस्याः । पराख्यवाचस्तु तेषां निर्विकल्पकसमाधौ साक्षात्कारः अयमेव आत्मा साक्षात्कार उच्यते व्याकरणदर्शने ।

वाक्यपदीये ब्रह्मकाण्डे प्रथमे मङ्गलश्लोके एवेयं परावाङ्निर्दिष्टा ब्रह्मपदेन । अन्यासां तिसृणां वाचां तु व्याकरणगोचरत्वमुच्यते ।
एवं रीत्या सृष्टिदृष्टिवादो व्याख्यातः । सृष्टिदृष्टिवादोऽपि संक्षिप्तं निरूप्यते ।

शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी ।
यन्नेत्रः प्रतिभात्माऽयं भेदरूपः प्रतीयते ।।[१४] इति ।

एतत्कारिकाव्याख्यावसरे स्वमेवोक्तं हरिवृषभेण यथाऽपरेषामिन्द्रियेषु विषयमात्राशक्तयः प्रतिलयं गच्छन्ति तथा चेन्द्रियात्राशक्त्यो बुद्धिषु बुद्धिमात्रशक्त्यः प्रतिसंहृतक्रमे वागात्मनि । सा चेयं स्वप्नप्रबोधवृत्तिः प्रविभक्तपुरुषानुकारा महत्यपि वाक्तत्वे कारणे नित्यमवस्थितेति । अयं दृष्टिसृष्टिवादो वस्तुसाजात्य निबन्धनां प्रत्यभिज्ञां स्वीकरोति नत्वर्थैकनिबन्धनाम् । सृष्टिदृष्टिवादस्तत्व बाधितामर्थैक्यनिबन्धनां तामङ्गीकरोति । दृष्टिदर्शनं कल्पना तन्मूलैव या

सृष्टिः सा दृष्टिसृष्टिः । अत्र दृष्टिसमसमयैव रजतादीनां सृष्टिर्न त्ववयवादिक्रमेण गौरवात् ।[१५]

श्रीनागोजिभट्टसम्मतः सृष्टिप्रकारः

प्रलये नियतकालपरिपाकानां सर्वप्राणिकर्मणामुपभोगेन प्रक्षये सर्वं जगद् मायायां लीयते । सा च चेतन ईश्वरे लीयते । ततोऽपरिपक्वप्राणिकर्मभिः कालवशात् प्राप्तपरिपाकैः स्वफलप्रदानाय भगवतोऽबुद्धिपूर्विका सृष्टिर्मायापुरुषौ प्रादुर्भवतः । ततः परमेश्वरस्य सिसृक्षयाऽत्मिका मायावृत्तिर्जायते । ततो बिन्दुरूपमव्यक्तं त्रिगुणं जायते । इदमेव शक्तितत्त्वम् । तस्य बिन्दोरचिदंशो बीजम् । चिदचिन्मिश्रोंऽशो नादः । चिदंशो बिन्दुरिति । अचिच्छब्देन शब्दार्थोभयसंस्काररूपाऽविद्योच्यते ।

अस्माद् बिन्दोः शुद्धब्रह्मनामधेयं वर्णादिविशेषरहितं ज्ञानप्रधानं सृष्ट्युपयोग्य व्यवस्थाविशेषरूपं चेतनमिश्रं नादमात्रमुत्पद्यते । एतज्जगदुपादानमेव। रव परा इत्यादिशब्दैर्व्यवह्रियते । एतत्सर्वगतमपि प्राणिनां मूलाधारे संस्कृतपवनचलनेनाभिव्यज्यते [१६]।

अस्याः पराख्यवाच एव पश्यन्त्यादिक्रमेण स्थूलशब्दा उत्पद्यन्ते । तत्र मध्यमाशब्दः स्वमात्रश्रव्याः वैखरीशब्दास्तु परश्रव्या अपीत्यादिरूपेण शब्दसृष्टिः स्फुटमुक्ता लघुमञ्जूषायाम् । अर्थसृष्टिस्तु पूर्ववदेव बोध्या । यतश्चैतन्मतेऽपि पराख्यवाचः सर्वशब्दतदर्थोभयोपादानत्वं स्वीकृतम् [१७]।

प्रपञ्चसारानुगतः सृष्टिप्रकारः

यतश्च पूर्वोक्तः श्रीनागेशभट्टानुमतः पन्था न वाक्यपदीयाऽनुगतोऽपि तु तन्त्रसारानुगतेति एव, तथा हि

प्रकृतिः पुरुषश्चैव नित्यः कालश्च सत्तम् ।
अणोरणीयसी स्थूलात् स्थूला व्याप्तचराचरा ।।

अत्रोत्तरार्धे प्रकृतिरितिशेषः ।

स जानाति विपाकांश्च तस्यां सम्यग् व्यवस्थितान् ।
सा तत्त्वसंज्ञा चिन्मात्रा ज्योतिषः सन्निधेस्तदा ।।

अत्र सः इति कालपरम् ।

विचिकीषुर्धनीभूता सा चिद्भ्येति बिन्दुताम् ।
कालेन भिद्यमानस्तु स बिन्दुर्भवति त्रिधा ॥
स्थूलसूक्ष्मपरत्वेन तस्य त्रैविध्यमिष्यते ।
स बिन्दुनादबीजत्वभेदेन च निगद्यते ॥
बिन्दोस्तस्मात् भिद्यमानाद्रवोऽव्यक्ततात्मकोऽभवत् ।
स रवः श्रुतिसम्पन्नैः शब्दब्रह्मेति गीयते ॥
अव्यक्तादन्तरूदितत्रिगहनात्मकम् ।
महन्नाम भवेत् तत्त्वं महतोऽहङ्कृतिस्था ।
भूतादिवैकारिकतैजसभेदक्रमादहङ्कारात् ॥
कालप्रेरितया गुणघोषयुजा शब्दसृष्टिरथ शक्त्या ।
शब्दाद् व्योम स्पर्शस्तेन वायुः ताभ्यां रूपाद् वह्निरैतै रसाच्च ।
अम्भांस्येतैर्गन्धतो मूर्धराद्या भूताः पञ्च स्युर्गुणोनाः क्रमेण ।
सत्वं रजस्तम इति सम्प्रोक्ताश्च त्रयो गुणास्तस्याः ।
तत्सम्बन्धाद् विकृतैर्भेदत्रितयैस्तत् जगद् सकलम् ॥[१८]

व्याकरणदर्शने सृष्टिप्रक्रियाविमर्शः

एतत्सम्बन्धे ललितसहस्रनामग्रन्थे श्रीभास्कररायकृते भाष्ये सम्यगधीते सत्ययं क्रमो निःसरति । 'पूर्वं' तावत् प्राणिकर्माभिन्नमायावच्छिन्नस्य ब्रह्मणो घनीभावः । ततो विचिकीर्षा ततोऽव्यक्तम् ततोऽव्यक्तो खः ततः पश्यन्ती ततो मध्यमा ततो वैखरी इति ।

शारदातिलकसम्मतः सृष्टिक्रमः

तथा हि -

निगुर्णः सगुणश्चेति शिवो ज्ञेयः सनातनः ।
निर्गुणः प्रकृतेरन्यः सगुणः सकलः स्मृतः ॥

अत्र सकलः इत्यत्र कला प्रकृतिस्तत्सहित इत्यर्थः ।

सच्चिदानन्दविभवत् सकलात् परमेश्वरात् ।
आसीच्छक्तिस्ततो नादो नादाद् बिन्दुसमुद्भवः ॥

परशक्तिमयः साक्षात् त्रिधाऽसौ भिद्यते पुनः ।
बिन्दुर्नादो बीजमिति तस्य भेदाः प्रकीर्तिताः ॥
बिन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः ।
समवायः समाख्यातः सर्वागमविशारदैः ॥
भिद्यमानात् पराद् बिन्दोरव्यक्तात्मा रवोऽभवत् ।
शब्दब्रह्मेति तं प्राहुः सर्वागमविशारदाः ॥
तत्प्राप्य कुण्डलीरूपं प्राणिनां देहमध्यमम् ।
वर्णात्मनाऽविर्भवति गद्यपद्यादिभेदतः ॥

इत्येवं शब्दसृष्टिमुक्त्वाऽव्यक्ताद् महत्तत्त्वं ततश्चाऽहंकारस्त्रिविधो वैकारिकस्तैजसो भूतादिश्चेत्युक्तम् । अस्मात् त्रिविधाऽङ्कारात् क्रमशो दिग्वातार्कादयो देवाः ज्ञानकर्मेन्द्रियाणि मनश्च पञ्चभूतानि चोत्पद्यन्त इत्येवमर्थसृष्टिरप्युक्ता[१९] ।

पञ्चमषष्ठसप्तविषयाणामालोचनम्

श्रीनागेशभट्टाः शब्दब्रह्मणोऽनित्यताभ्युपयन्ति शब्दब्रह्मऽभवत् परा इत्यादौ अभवत् पदप्रयोगात् यावत्सृष्टिस्थायितया व्यवहारनित्यतयैव वा शब्दब्रह्मणो नित्यत्वस्य तैः स्वीकाराच्च। प्रपञ्चसारस्य शारदातिलकस्य चाप्यत्रैव सम्मतेर्दर्शनाच्च । वस्तुतोऽनादिनिधन पदनिर्दिष्टस्य शब्दब्रह्मणः कूटस्थनित्यत्वमेवाभ्युपेतं श्रीहरिणाऽन्यैश्च प्राक्तनशिष्टैरिति तन्त्रशास्त्रानुरोधेन पराख्यस्य शब्दब्रह्मण उत्पत्ति कथनं श्रीनागेशस्य तन्त्रशास्त्रे श्रद्धातिशयमेव द्योतयति न तु शब्दस्य सिद्धान्तम् । स तु उक्तहरिग्रन्थेन वक्ष्यमाणभाष्यग्रन्थेन च कूटस्थनित्यत्वपर एवेति रम्यम् ।

सृष्टिक्रमे व्याकरणशास्त्रप्रवर्तकस्य पाणिन्यादिमुनित्रयस्य सम्मतिः

तत्र 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम् 'सूत्रयता महर्षिपाणिनिना शब्दस्य नित्यत्वं स्वीकृतमेव । अन्यथाऽर्थबोधकतारूपशक्तेराश्रय एवासिद्धः स्यात् । यतो हि प्रत्येकं वर्णेषु तदाश्रयत्वस्वीकारेऽर्थबोधस्यावृत्तिप्रसङ्गः । वर्णसमुदायस्य तु शब्दनित्यत्वमन्तरा खपुष्पायमाणत्वेन तदाश्रयत्वस्यापि तत्त्वप्रसङ्गः । अत एव सोऽयं शब्दः इति प्रत्यभिज्ञापि सङ्गच्छते । इदमेकं

पदमित्यादिप्रतीत्या चैकत्वमपि शब्दस्य लाघवात् । एवं च नित्ये द्वितीये...... शब्दब्रह्मणि तात्पर्यं पर्यवसन्नम् । अत एव महर्षिणा पतञ्जलिनाऽपि महाभाष्ये चत्वारि वाक्परिमिता पदानि इति ऋङ्मन्त्रव्याख्याने च शब्देन परापश्यन्त्यादीनां वर्णने पराख्यस्य ब्रह्मणः चत्वारि शृङ्गा इत्यादौ च शब्दब्रह्मणः कूटस्थनित्यत्व सुष्ठु प्रतिपादनं कृतम् । 'सिद्धे शब्दार्थसम्बन्धे'[२०] इति वार्तिके च शब्दस्य तादृशं रूपं सिद्धान्तितमेव ।

किञ्च इन्द्रियमिन्द्रलिङ्गसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा इति सूत्रे इन्द्रसृष्टेन्द्रजुष्टेत्यनयोर्मध्ये प्रथम इन्द्रशब्दपरमात्मपरस्तद्येवेन्द्रियसर्जन कर्तृकत्वसम्भवात् । द्वितीयस्तु जीवात्मपरस्तस्यैवेन्द्रियेण भोगप्रसिद्धेः । स चायमिन्द्रो मायातत्कार्योपाधिभ्यां परमात्मजीवात्मसंज्ञे लभते । इन्द्रो मायाभिः पुरुरूप ईयते इति श्रुतेः । एवं च मायाऽविच्छिन्नचितः परमात्मपदेनान्तः करणाऽवच्छिन्नचितश्च जीवात्मपदेनात्र संकीर्तनात् । चित्तवति नित्यम् इति सूत्रोऽपि जीवनित्यमित्यनुक्त्वा चित्तवतीतिकथनेनऽन्तःकरणावच्छिन्नचित एव ग्रहणेन च वेदान्तसिद्धान्त एव श्रद्धातिशयद्योतनेन चित्स्वरूपे शव्दब्रह्मण्येव तात्पर्यमवसीयते । यतश्च 'वाग्वै ब्रह्म' इति श्रुत्या वाचोऽपि ब्रह्मरूपता प्रातिपादितैव । वैदिकसिद्धान्तानां रक्षार्थमेव च व्याकरणस्य प्रवृत्तिरिति भाष्यकृत्प्रमितिरेव।

किञ्च 'जनिकर्तुः प्रकृतिः'[२१] इति सूत्रे प्रकृतिपदमुपादान परतया व्याख्यातं भाष्यकैयटादौ । तच्चोपादानं परिणामोपादानवद् विवर्तोपादानमिति गृहीतं शिष्टैः । 'ब्रह्मणः प्रजाः प्रजायन्ते' इत्युदाहरद्भिः ।

अत एव च 'यतो वा इमानि भूतानि' इति श्रुतौ यत् इति 'पञ्चम्यास्तसिल'[२२] पञ्चमी चैतद्विहितेऽपादान एव ।

एवं च शब्दब्रह्मणो विवर्तोपादानत्वं सुष्ठु समर्थितं भवति । शब्दतन्मात्रेभ्यः स्वावयवेभ्यश्च तत्तत्कार्यरूपः परिणामोऽपि मन्तव्य एव । अत एव कोशाड्ढञ्[२३] इत्यादिसूत्रैर्न विरोधः ।

'सम्भूते'[२४] इत्यस्याधिकारे हि तेन सूत्रेण कोशे सम्भवति कौशेयं वस्त्रमिति व्युत्पाद्यते । नहि परिणामवादं सत्कार्यवादं विनाऽस्य संगतिः ।

'आख्यातोपयोगे'[२५] इति सूत्रे ज्योतिर्वज्ज्ञानानि भवन्ति इति भाष्ये ज्ञानस्य शब्दत्वापत्तिरिति दर्शनमत्र भाष्यकारस्य इति वदता श्रीकैयटेन आन्तरज्ञानस्य शब्दब्रह्मण: स्थूलशब्दविवर्तोपादानत्वं स्पष्टमेवोक्तम् । जनिकर्तु: प्रकृतिरित्यत्र भाष्ये प्रदीपोद्योतयोर्दर्शनेन परिणामवादोऽपि समायाति , सोऽपि पूर्ववदेव योजनीय: ।

किञ्च वृद्धिरादैजित्यारभ्य 'अ अ'[२६] इत्युपसंहरता भगवता सूत्रकृताऽद्वितीयेऽनादिनिधने वाक्तत्व एव स्वीयं हार्दं दृढं प्रकाशितम् । विवृतस्य संवृतकरणात् अकारो वासुदेव: स्यात् इति वासुदेव:, वासुदेव इत्युक्त्या समस्तस्य विश्वस्य ताद्रूपबोधनाच्च । अ मा नोनाप्रतिषेधेन इति प्रतिषेधबोधकस्य अ शब्दस्य द्विरूक्त्या अर्थात आदेशो नेति नेति इतिवत् कृतस्याष्टाध्यायीसाधनस्य पौन: पुन्येन निषेधकरणाच्च ।

पादटिप्पणी

१. वाक्यपदीयम् ब्रह्मकाण्डम् १.१
२. तत्रैव १.२
३.वै.भू.सा.
४.कालसमुद्देश: प्रकरणे
५.वाक्यपदीयम् ब्रह्मकाण्डम् १.१ हरिवृषभटीकायाम्
६.वाक्यपदीयम् १.१२०
७.हरिवृषभकृता टीका ०१/१२०
८.वाक्यपदीयम् ,हरिवृषभकृता १२०
९.१.१५५ वा.प.
१०. वाक्यपदीयम् ब्रह्मकाण्डम् १.११५
११.वाक्यपदीयम् १०८ब्रह्मकाण्डम् अम्बाकर्त्रीटीका पाणिनीय

शिक्षादिषु च।

१२.वाक्यपदीयं ब्रह्मकाण्डम् ११७

१३.वा.प.ब्र.१४२ अम्बाकर्त्री टीकायाम्

१४.वाक्यपदीयम् ११८

१५.ब्र.सू.शा.भा. अध्यासभाष्ये विकासटीका

१६.वैयाकरणसिद्धान्तलघुमञ्जूषा, शक्त्याश्रयनिरूपणम्

१७.वैयाकरणसिद्धान्तलघुमञ्जूषा, शक्तिनिरूपणम्

१८.इति वा.प.१२०कारिकाटीका, भावप्रदीपतः उद्धृताः श्लोकाः

१९.वैयाकरणसिद्धान्तलघुमञ्जूषा, शक्तिनिरूपणम्

२०. कात्यायनवार्तिकम् , महाभाष्यम्

२१.पा.सू.१.४.३०

२२.पा.सू. ५.३.७

२३.पा.सू.४.३.३२

२४.पा.सू.४.३.४१

२५.पा.सू.१.४.२९

२६.पा.सू. ८.४.६८

दशमोऽध्यायः

उपसंहारः

दशमोऽध्यायः
उपसंहारः

विदितमेव तत्र भवतां नितान्तविद्याविद्योतितान्तान्तः करणानां निरन्तरशास्त्रज्ञानलोलुपानां विद्वद् वृन्दानां यत् किल् धर्मार्थकाममोक्षाख्येषु चतुर्षुपुरुषार्थेषु मोक्षस्यैव प्राधान्यमाकलयन्ति पूर्वजाः महर्षिपुङ्गवाः । स च आदिपुरुषनिस्वाससन्ततिसंकलनरूपस्य वेदस्य सम्यगर्थज्ञानसाधनक एव । वेदार्थज्ञानं च अयं शब्दः इदमर्थमवबोधयति अस्य शब्दस्यास्मिन्नर्थे शक्तिः इत्यादिशक्तिग्रहाधीनमेव । शक्तिग्राहकश्च -

शक्तिग्रहं व्याकरणोपमान कोषाप्तवाक्यात् व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सानिध्यतः सिद्धपदस्य वृद्धाः [१]॥

तच्चेदं व्याकरणं परमकारुणिकेन भगवता पाणिनिना सकलजनहिताय अक्लेशेन दुरधिगमशब्दोदधिपाराय साधुशब्दप्रयोगेण वैकल्याय च परमेश्वस्य कृपालोः श्रीशङ्करस्य परमानुग्रहेण लोके साम्प्रतं पाणिनीयव्याकरणनाम्ना प्रथितं व्यरचि । इदं हि व्याकरणं न केवलं वेदानां प्रत्युत सर्वेषां शास्त्राणां महदुपकारकमिति न केवलं प्रशंसामात्रं किन्तु वस्तुस्थितिः । तदुक्तम् -

"काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्"

ऐहिकामुष्मिकोभयविधाऽभ्युदय साधनं वेदार्थावगमः . स च वेदाङ्गाध्ययनादृते न सम्यक्तंया भवितुमर्हति । वेदानां षडङ्गानि च व्याकरणज्योतिषनिक्तशिक्षाकल्पच्छन्दांसि । तत्र मुखस्थानीयस्य व्याकरणस्य षट्स्वङ्गेषु प्राधान्यम् । उक्तश्च -

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ कथ्यते ।
ज्योतिषामनयं चक्षुः निरुक्तं श्रोत्रमुच्यते ।
शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणस्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥[२]

तच्च व्याकरणमद्यत्वे पाणिनीयमेव । तस्य मूलभूतेदं चतुर्दशसूत्रम् यत् व्याख्यातुमुपक्रान्तमस्ति । तत्रादौ सूत्र लक्षणेन सूत्रपदार्थः प्रमीयते ।

उक्तं च सूत्रस्य लक्षणं शिष्टैः -

अल्पाक्षरमसन्दिग्धं सारवद् विश्वतो मुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥

असारगर्भमप्यल्पाक्षरं भवितुमर्हति । यद् व्यावर्तनाय सारवदिति पदमत्र लक्षणे उपात्तम् । अनेन रूपेण व्याख्येयत्वमनादृत्य विश्वतोमुखमिति । यथा शङ्करः वेदान्तिनां नये अद्वैतप्रतिपादकत्वम् । रामानुजीये द्वैतप्रतिपादकत्वं एकत्रैव सूत्रद्वये तत्त्वमसि इति श्रुतिवाक्ये, हाउ हाउ इति मध्ये सामवेदपाठे उच्चार्यते वैदिकैः स एव स्तोभ इत्युच्यते । तद् राहित्यमित्युच्यते । एवं च अस्तोभमिति कथनं ब्राह्मण वसिष्ठन्यायेन बोध्यम् । एवमेवासन्दिग्धमित्यपि प्रकृते अ इ उ ण् इत्यादिष्वल्पाक्षरत्वं सर्वदोषशून्यत्वम् अग्रिमेव्यानैः सारगर्भत्वम् विश्वतोमुखत्वं चेति सूत्रलक्षणम् एषु संघटते । अथसूत्रभेदाल्लक्षणं निरूपयति

संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥

संज्ञासूत्रपरिचयः

तत्र वृत्तिनियमाकत्वं संज्ञासूत्रत्वम् । यथा वृद्धिरादैच्, अदेङ्गुणः इत्यादिः । संज्ञा शास्त्राणां विधिसूत्रघटकपदशक्तिग्रहे उपयोगः यथा वृद्धिरेचि इति विधिसूत्रघटकविधिपदस्य आकार ऐकार औकारेषु शक्तिरिति 'वृद्धिरादैच् ' इति संज्ञासूत्रेणावगम्यते एवञ्च संज्ञासूत्रसाहाय्येन विधिसूत्रेण विधानं भवति ।

परिभाषासूत्रपरिचयः

तथा चांनियमेन तत्र तत्र प्रसक्तस्य विधिशास्त्रस्य प्रवृत्तिनियमकरणे उपयोगः । यथा इको 'यणचि इत्यस्य सूधी + उपास्य इति लक्ष्ये सकारोत्तर उकारे प्रसक्तिः धकारोत्तरेकारे परे । एवं धकारोत्तरेकारे प्रसक्तिः उकारे परे । एवं उपास्य : घटकोकारे प्रसक्तिः पकारोत्तराकारे परे इति एकस्मिन् लक्ष्ये त्रयाणां संस्थानेऽनियमे प्रसक्तस्य यणोऽजव्यवहिते ईकारे, एवं तस्मिन्निति निर्दिष्टे पूर्वस्य इति परिभाषया निर्दिष्टे पूर्वस्य इति समर्पणेन प्रवृत्तिनियम्यते । एवञ्च परिभाषा सूत्राणां विधिसूत्रैकवाक्यतां भवति ।

विधिसूत्रपरिचयः

अपूर्वार्थविधायकत्वं विधित्वम् । यथा आद्गुणः, इको यणचि एचोऽयवायावः विधिसूत्रं तु पूर्वार्थबोधकं भवति । तथा चोक्तम्

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥

यथा उप इन्द्र इत्यत्र पूर्वो योऽर्थः एकारस्तस्य अकारेकारयोः निवृत्तिपूर्वकं विधानम् । आद्गुणः इति सूत्रेण क्रियते । तथा उपेन्द्रः इति सिध्यति ।

नियमसूत्रपरिचयः

अन्यनिवृत्तिफलकत्वे सति सिद्धार्थप्रतिपादकत्वं नियमसूत्रत्वम् । यथा "कृत्तद्धितसमासाश्च" " न लोपः सुप्स्वरसंज्ञातुग्विधिषु कृति " इत्यादिसमासस्य चार्थबोधकत्वेन उभयत्र अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेण प्राप्तायाः प्रातिपदिकसंज्ञायाः गामानय इत्यस्य प्रातिपदिकसंज्ञाऽभावं बोधयति ।

अतिदेशसूत्रपरिचयः

अन्यधर्मारोपबोधकत्वमतिदेशसूत्रत्वम् । यथा स्थानिवदादेशोऽनल्विधौ अन्तादिवच्चेत्यादि । यथा रामाय इत्यत्र ङेर्यः इति सूत्रेण यादेशे कृते सुपि चेति सूत्रेण सुप्त्वाभावात् दीर्घो न प्राप्नोति । 'स्थानिवदादेशोऽनल्विधौ ' इत्यनेन सुप्त्वमादाय दीर्घः क्रियते ।

अधिकारसूत्रपरिचयः

उत्तरोत्तरसम्बन्धोऽधिकारत्वमधिकारसूत्रत्वम् । यथा कारके , प्राग्रीश्वरान्निपाताः । तथा च कर्तुरीप्सिततमं कर्म इति विधिसूत्रे कारके इति सूत्रेण एकवाक्यतया अर्थबोधजनको भवति । निषेधसूत्राणामभाव रूपापूर्वबोधजनकत्वेन विधिसूत्रेष्वन्तर्भावः । यथा नादिन्याक्रोशे पुत्रस्य इति । तस्य पुत्रादिनी त्वमसि पापे इत्यत्र पुत्रशब्दे तकारस्य स्थाने प्राप्तस्य अनचि चेति द्वित्वस्याभावबोधकत्वम् । इत्येवं लक्षण लक्षितानि षड्विधानि सूत्राणि । तेषु विधिसूत्राणि एतानि चतुर्दश सूत्राणि । अत्वाऽवच्छिन्नसाधुः । इत्वावच्छिन्नः

साधुरित्यादिरीत्या वर्णसाधुत्वविधायकत्वात् । इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः [३]।

नहि संज्ञासूत्राणि शक्तिनियामकत्वाभावात् । नापि परिभाषासूत्राणि अनियमे नियमकारिणीत्वाभावात् । नापि नियमसूत्राणि अन्य निवृत्तिफलकत्वेसति सिद्धार्थप्रतिपादकत्वाभावात् । नाप्यतिदेश सूत्राणि अन्यधर्मारोपकत्वाभावात् । यत्तु 'आदिरन्त्येन सहेता' इत्यनेनैकवाक्यतया एषां संज्ञासूत्रत्वमिति शेखरकारै रूक्तम् । तन्न रोचते । विधिसूत्रैः सह एकतामापन्नस्य परिभाषासूत्रादेरपिविधि प्रसङ्गेनोक्तहेतोर्दृष्टत्वात् ।

अस्तु माहेश्वरसूत्राणां व्याकरणतन्त्रागमदृष्ट्या गतपृष्ठेषु विचारः कृतः । व्याकरणदृष्ट्या संक्षिप्तव्याख्यानं कृतम् । तन्त्रविषये किञ्चिदुच्यते ।

गोहर्यादयः शब्दाः बह्वर्था इति ख्यातिः संस्कृतसमाजे श्रूयते चिरात् । तन्त्रशब्दस्तु पञ्चविंशतिसंख्यातोप्यधिकेष्वर्थेषु प्रयुज्यते । नेतोधिका अर्था अन्यस्य कस्यचिच्छब्दस्य । एतस्य मूले विस्तारार्थकः तन्धातुर्विराजते । अस्मादेव धातोस्तन्त्रशब्दवत् तन्तुशब्दोऽपि निष्पद्यते । तन्त्रशब्दः पुनर्धातूभयचुरादौ प्रयुक्तः । वस्तुतः स नामधातुत्वेनाङ्गीकरणीयो भिन्नार्थकः । जीविकोपार्जनोपायेषु तन्तुरूपस्य तन्त्रस्य बाहुल्येन प्रयोग इति कुटुम्बाभरणा र्थश्चुरादौ । तेषूपायेषु कृषिःसिरीस्तन्त्रं तन्वते अप्रजज्ञः वपनसाधनम् स्त्रियौ तन्त्रे अधिरोप्य पटं व्यत्ययो इत्यादयः प्राधान्यं भजन्ते । परतः कुटुम्बधारणात्मके व्यवसाये कुलप्रतिष्ठादिकस्थितिः संजातम् । जीविकोपार्जनोपायार्थेषु प्रयुज्यमान उपयुज्यमात्रार्थको जातस्तन्त्रशब्दः । पश्चाच्चप्रबन्धः स्वराष्ट्रचिन्ता , अर्थसाधनम् , सैन्यम्, धनम् ,गृहम् इति कर्तव्यता हेतुः व्यवहारः नियमादिः सिद्धान्तः ओषधिः शास्त्रमित्यादयोऽर्थाः जाताः ।

कात्यायनश्रौतसूत्रे (१७-१८) तु कर्मणां युगपद् भावस्तन्त्रम् इत्याख्यातम् । प्रायश्चित्ततत्त्वे तु अनेकमुद्दिश्य सकृतप्रवृत्तिस्तन्त्रता । यथा आग्नेयाष्टाकपालेन्द्र दध्यैन्द्रोपयोयागानां त्रयाणां सकृतसकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकारः सिद्धयतीति । चतुःषष्ठिसंख्याके शिवोक्तशास्त्रेऽपि तन्त्रशब्दप्रयोग एवमेवानेकमुद्दिश्य सकृतप्रवृत्योपायनियमादिदर्शनेन जातः स्यात् । । चित्रचित्तचित्यानां तन्त्रोच्चारणमिति । (१२०पृष्ठांकः) प्राकृतभाषा

प्राबल्यात् तन्त्रेणोक्तम् (१४०पृष्ठांक:) इति प्रकृतग्रन्थे भिन्नोऽर्थः स चान्यत्रेषु शास्त्रेष्वपि दृष्यते ।

तन्त्रसम्प्रदाये क्रमकुलप्रत्यभिज्ञाख्यानि त्रीण्यद्वैतदर्शनानि । पञ्चवक्त्रस्य शिवस्य विभिन्नेभ्यो मुखेभ्यो शैवागमा विनिर्गता इति शैवानां परस्परागतमिदं मतम् । क्रमदर्शनस्योपजीव्या आगमाः शिवस्योत्तरमुखोद्गता इति क्रमदर्शनम् औत्तराम्नायनाम्नामपि प्रथितम् । तदुक्तं महार्थमञ्जर्याम् - औत्तराम्नायाद्यशेष शास्त्रार्थावबोधशिक्षाशालिवत् । (पृ.६) अर्थतत्त्वमुपादिक्षदौत्तराम्नायसंविदाम् (१८९पृ.) बभाषे तत्त्वमौत्तरम् (१८९पृ.) उत्तरं मुखं वामतो भवतीति क्रमशूनप्रदर्शितो मार्गो वाममार्गः । वाक्तत्त्वं तावत् क्रमात् सूक्ष्मा पश्यन्ती मध्यमा वैखरीति चतुर्धा भिद्यते । यथोक्तं साम्बपञ्चाशेति ।

या सा मित्रावरुणसदनावृच्चरन्ती त्रिषष्टिं
वर्णानत्र प्रकटकरणैः प्राणसङ्गात् प्रसूते ।
तां पश्यन्तीं प्रथमुदितां मध्यमां बुद्धिसंस्थां
वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये ॥[४]इति ।

तत्र वैखरीति प्रसिद्धा वाक् । ताल्वादिकरणव्यापारोपारूढस्फुरणतया क्रियाशक्तिरित्यध्यवसीयते । मध्यमा च बुद्धिवृत्तिमात्रप्रवर्त्यमानत्वाद् ज्ञानशक्तिः । पश्यन्ती पुनरिच्छा, बहिः प्रसरणाभ्युपगमरूपत्वात् तस्याः यतः परावाक् पश्यन्तीति पश्यन्त्या व्युत्पत्तिः । नाभिसंस्थितत्त्वं पश्यन्तीवाक्तत्त्वम् । परावाक् पुनस्तस्यैव परमेश्वरस्य स्वरूपमनुप्रविशन्ती परिस्फुरति । यदुक्तमस्मत्परमगुरुभिः श्रीमदृजुविमर्शिन्यां मातृकां परवागात्मनाहतभट्टारकपरम शिवस्वरूपां षट्त्रिंशतत्त्वप्रसरणहेतुभूतां संविदमित्यर्थ इति । तस्य च वक्तीति कर्तृव्युत्पत्या वाक्तत्त्वम् । न पुनरुच्यत इति कर्मानुगुण्यात् । यदुक्तमस्मत्परम गुरुभिः श्रीसंवित्स्तोत्रे - त्वामुपसितगुरुत्तमताः परां वाचमाहुरविभक्तविश्वकाम् । स्व प्रकाशनविमर्शनात्मिकां वक्ति वागिति निरुक्तिमास्तिाः इति । तस्मांदिच्छादिशक्तित्रितयविस्तारात्मा सर्वोऽपि वाग्विलास इत्युक्तं भवति । यथा योगिनीहृदये

इच्छाशक्तिस्तथा सेयं पश्यन्तीवपुषा स्थिता ।

ज्ञानशक्तिस्त्रिधा प्रोक्ता मध्यमा वागुदीरिता ।

क्रियाशक्तिस्तु वर्णीयं वैखरी विश्वविग्रहा ॥

तथा च श्रीतन्त्रालोके -

प्राक् पश्यन्त्यथ मध्याऽन्या वैखरी चेति ता इमाः ।

परापरा परा देवी चरमा त्वपरात्मिका ॥

इच्छादिशक्तित्रितयमासां निगद्यते ।

एतत्त्रितयमेताः प्रतीयते ॥

इच्छादिस्वभावैव च संवित्स्फुरत्ता । तन्मयी च काचिदनुभूति-तत्त्वशब्दार्थ इति सर्वं संगच्छते । इच्छा पुनः ... उद्देश्योपादेययोर्व्यत्यासे नार्थान्तरमपि द्योत्यते ।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।

इति नीत्या सर्वोऽपि प्रत्ययः पर्यन्ततो वाङ्मयतां नोल्लङ्घयति । अयं प्रकाशरूपस्यात्मनो विमर्शशक्तिरनुभवामः । सा च मन्त्रजपपूजादिषु शब्दब्रह्मदेश्या भवति । केवलं तद्द्वारमात्रमेव ... इति ।

इति श्रीवत्सगोत्रोत्पन्नेन श्रीमता रामदेवशर्मसूनुना
प्रोफेसरशेषनारायणमिश्रेण
उत्तरप्रदेशान्तर्गतेन सुलतानपुरमण्डलान्तर्गतेन
बैतीकलापत्रालयान्तर्गतेन
छतौनाकलाग्रामनिवासिना
लिखितोऽयं ग्रन्थः पूर्णः ।

पादटिप्पणी

१. न्यायसिद्धान्तमुक्तावली, शब्दखण्डः
२. पाणिनीयशिक्षा
३. महाभाष्यम्
४. साम्बपञ्चाशतम्

सहायकग्रन्थानां सूची

ग्रन्थाः लेखकाः प्रकाशकाः

१.वाक्यपदीयम् हेलाराजपुण्यराजटीकोपेतयम् ।सं.सं.वि.वि.वाराणसी

२.महाभाष्यम् प्रदीपोद्योतटीकोपेतम् मोतीलालबनारसीदासः

३.सिद्धान्तकौमुदी तत्त्वबोधिनी,बालमनोरमाटीकोपेता चौखम्भासं.सं.वारा.

४.प्रौढमनोरमा शब्दरत्नभावप्रकाशसरलाव्याख्या समन्विता चौ.सं.सिरीज

५.लघुशब्देन्दुशेखरः शेखरदीपिकाख्यटिप्पण्यासमन्वितः २००७

६.पदवाक्यरत्नाकरः सं.सं.वि.वि. वाराणसी

७.पाणिनि अष्टाध्यायी डॉ.नरेशझाः, चौ.सु.भारती वाराणसी २००८

८. परिभाषेन्दुशेखरः सभूतिटीकया राजराजेश्वरीप्रकाशनं,दुर्गाघाट वारा.२००१

९.भाट्टतन्त्ररहस्यम् आचार्यमुद्रणालय कर्णघण्टा वाराणसी

१०.पाणिनीयव्याकरण का अनुशीलन इण्डोलोजिकल बुकहाउस, नैपालीपाढा, वाराणसी

११.पाणिनीयशिक्षा कालिदास अकादमी उज्जैन,सं.२०५०

१२. लघुसिद्धान्तकौमुदी गीताप्रेस गोरखपुरम् ,२००६

१३.शब्दशक्तिप्रकाशिका जगदीशतर्कालङ्कार चौ.प्रकाशन २०१३

१४.काशिका न्यासपदमञ्जरीटीकाद्वयोपेता स्वामिद्वारिकाप्रसादशास्त्री सम्पादिता

१५.माधवीयाधातुवृत्तिःप्राच्यभारतीयप्रकाशन कमच्छा वाराणसी

१६.श्रीमद्भागवतम् गीताप्रेसगोरखपुररम् २००६

१७.महाभारतम् गीताप्रेस गोरखपुरम् २०११

१८.नेत्रतन्त्रम्

१९.पाणिनि अष्टाध्यायी स्वामी प्रह्लादगिरिवेदान्तकेशरी, चौ.कृ.अ.वारा.०६

An Analysis of 14 Maheshwar Sutra in the light of Vyakaran, Tantra and Agam



लेखकपरिचयः

डॉ. शेषनारायणमिश्रः

व्याकरणप्राध्यापकचरः

१. श्रीशास्त्रार्थसंस्कृतमहाविद्यालयः, दशाश्वमेधः, वाराणसी
सम्मानितव्याकरणप्राध्यापकचरः

२. श्रीसम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी-०१
शास्त्रचूणामणिसम्मानितः

३. राष्ट्रियसंस्कृतसंस्थानम् (मनितविश्वविद्यालयः) नवदेहली-५८

ग्रामः छतौनाकला, पत्रालयः- बैतीकला, जनपदः-सुलतानपुरम्
उ.प्र., पिन संख्या-२२२३०१

दूरभाषसंख्या-९३६९३१२९२३

प्रथमं संस्करणम् २०१६

First Print 2016

मूल्यम् : ३२५/-

Price : 325/-

Publisher :

THE BANARAS MERCANTILE CO.

Publishers,Booksellers & Exporters
125 Mahatma Gandhi Road, Kolkata-700 007
Phone : 033-2219 3608
web : www.banarasmercantile.com
E-mail : banarasmercantileco@gmail.com